प्रवेश सं० — विषय: धर्मशास्त्रम् क्रम सं०

नाम [illegible] ग्रन्थकार [illegible]

पत्र सं० २६-२२८

श्लोक सं० — अक्षर सं० (पंक्तौ) पंक्ति सं० (पत्रे)

आकार: ६.५"×८.९" लिपि: देवना. आधार: [illegible]

13999

लि० काल [illegible]

आ० = २२

मं० ए० ई० पु० प्रा०—११ एम० सी० ई०—२४५४—५० ००० (?)

तिमिश्राः॥ तैलादौ विशेषयति कात्यायनः॥ तैलानांचैव सर्वेषां मघानामपि स
र्पिषां। वृद्धिरष्टगुणा प्रोक्ता गुडस्य लवणस्य च॥ गौतमः॥ कुषीदं पशुपजलोमक्षे
त्रसदवाह्येषु नातिक्रामति पंचगुणं। अत्र पशुपजं घृतं विहाय दुग्धादिघृतानाम
ष्टगुणा वृद्धिः प्रागुक्तत्वात्। एतेन पशुपजं क्षीरघृतादि द्विति चंडेश्वरोक्तं हेयं। वस्त्रा
दौ विशेषमाह वृहस्पतिः। हिरण्ये द्विगुणा वृद्धिस्त्रिगुणा वस्त्रकुप्यके। धान्ये च
तुर्गुणा प्रोक्ता सदवाह्येलवेषु च। कुप्यं सुवर्णरूप्याभ्यामन्यत्ताम्रादिकं सदो धा
न्यातिरिक्तक्षेत्रभवं फलादि। दास्यादीनां गोमहिष्यादीनां च पोषणासमर्थस्य
कस्मिंश्चित् क्षीरादिकं वृद्धिर्व्यवस्थार्थं पोषणासंततस्थं प्रयुक्तानां चिरावस्थाने सं
ततिरेव वृद्धिर्न वृद्ध्यंतरमित्याह विष्णुः संततिः स्त्रीपशूनां। शाकादौ विशेषयति
वृहस्पतिः। उक्ताः पंच गुणाः शाकबीजेक्षौ षड्गुणाः स्मृताः। तथाहि विष्णुः॥ रसस्या

Indira Gandhi National
Centre for the Arts

२६ षड्गुणा। अत्र रसपदं न वनाणादिपरं प्रागुक्तकात्यायनबृहस्पतिवचनैकवा
क्यत्वात्। अन्यत्र तेषु विशेषमाह वशिष्ठः। द्विगुणं हिरण्यं द्विगुणं धान्यं धान्येनै
व रसा व्याख्याताः पुष्पफलानि च। तुलाधृतमष्टगुणं। रसास्तु रसादयः तेऽपि
त्रिगुणा इत्यर्थः॥ एवं पुष्पादीनि त्रीणि तुलाधृतमपि सुवर्णादिव्यतिरिक्तक
पूरादिविषयं। तेषामन्यविधवृद्धिविशेषत्वात्। तथा काष्ठादौ चिरकालेऽपि वृ
द्ध्यभावमाह बृहस्पतिः। तथा काष्ठेष्टकासूत्रकिण्वपर्णास्थिचर्मणां। हेतिपु
ष्पफलानां च वृद्धिस्तु न विधीयते। किण्वं सुरामलं भक्तबीजद्रव्यं अस्थि दंतशं
खादि चर्म कृष्णसारादिकृत्तिः हेतिरायुधं। पूर्वत्र वृद्धिविशेषवचनं या पुष्पफ राम·
लयोर्बोधनात् तेन न विरोधः स्थूलसूक्ष्मभेदेन परिहरणीय इति रत्नाकरः। २६
अनंगीकृतवृद्ध्यंगीकृतवृद्धिभ्यां विरोधो निरसनीय इति मिश्राः। अत्र च प्रा

गुक्तवचनेषु धान्यानां यद्द्विगुणा त्रिगुणा चतुर्गुणा पंचगुणामुक्तं तन्मूल्यानुसारेण
बोद्धव्यं। तथा चैयं व्यवस्था यत्र प्रयोगकाले शस्योत्पत्तेः प्राक् यादृशं मूल्यं शस्योत्प
त्त्यनंतरं तस्मादल्पह्रासस्तत्र द्विगुणं यत्र तादृशस्थले ततोऽधिकह्रासस्तत्र त्रिगुणं
यत्र तादृशस्थले ततोऽप्यधिकतरह्रासस्तत्र चतुर्गुणं यत्र तादृशस्थले ततोऽप्यधिक
तमो ह्रासस्तत्र पंचगुणत्वमिति मिश्रमहाचार्याः। प्रदानकाले मूल्यस्याधिक्ये प्रा
गुक्तक्रमेणाव्यवस्थितिर्लक्ष्मीधरः॥ चंडेश्वरस्तु अधमर्णोपकृष्टगुणत्वमध्यगु
णत्वउत्कृष्टगुणत्वैर्व्यवस्थितिरिति न विरोध इत्याह। एतच्च वृद्धिकथनं तत्तद्धान्योत्
पत्तिकालमात्र एव कालांतरस्यानुपादानात्। तथा च हारीतः। तत्र द्विगुणं धान्यं
त्रिगुणमेव च वर्द्धते। मूल्यानुसारेण वृद्धिव्यवस्थामनुस्त्वाह। समुद्रयानकु
शला देशकालार्थदर्शिनः। स्थापयेयुस्तु यां वृद्धिं सा तत्राधिगमं प्रति।

Indira Gandhi National
Centre for the Arts

२० समुद्रयाने लाभानिश्चायं ज्ञात्वाधिकां कलां कुर्वंति मिश्राः। एतद्विषय एव हारीतोऽ
थाह पुराणोपलिकं मासमिस्रेके। नारदेनाप्युक्तं। ऋणानां सार्वभौमोयं विधिर्वृ
द्धिकरः परः। देशाचारस्थितिस्त्वन्यायत्रर्णमवतिष्ठते। द्विगुणां त्रिगुणां चैव त
थान्यस्मिंश्चतुर्गुणां। तथाष्टगुणमन्यस्मिन्देयं देशेऽवतिष्ठति। अन्यस्मिन्दे
शे यावता प्रस्थं लभ्यते उत्पन्नैः प्राक्तावतैव प्रस्थचतुष्टयमुत्पन्नौ लब्धव्य
मिति देशकालज्ञानं यत्र द्विगुणपादिलाभस्तत्रवर्णाक्रमेणैवास्तु अस्तुवामासस्थानेतरनी।
द्वित्रेऽपि मासे स्त्रलो द्विगुणां। ऊनापगमेनुत्रिगुणमिति विवादचिंतामणौ। पुराणे नु
मासेन पणांवृद्धिरिति संकरजातिपरमिति रत्नाकरः ॥०॥ अथ वृद्धिनिषेधः॥ वि राम·
क्रयमूल्यवेतननिक्षेपदत्तमसाहसादिरूपदंडछलादिगृहीतधर्मानुद्देशदत्ता २०
नर्पितघृतादिजितेषु न वृद्धिः। पण्यमूल्यं भृतिर्न्यासो दंडो यच्चाभिहारिकं। वृथादा

नाह्निकपणाव्वर्द्धंते नाविवक्षिताः। इति नारदीयात्। पण्यमूल्यं विक्रयमूल्यं भृतिर्वेत
नं न्यासो निक्षेपः पण्यमूल्यस्यास योऽप्रयाचितादत्तान्ययोऽपाराने न योऽपूर्वं वृद्धिवि
धानात्। दंड उत्तमसाहसादिरूपः। आभिहारिकं छलादिना गृहीतं वृथादानं धर्मम
नुद्दिश्य परदत्तमनर्पितं आह्निकपणापृतेन जितधनं अविवक्षिताः उभाभ्यामपरि
भाषिता वृद्धयः। यदि उभाभ्यामेषापि वृद्धिः परिभाषितास्यात्तदास्यादेवा। स्त्रीधना
दौ विशेषयति सम्वर्तः। न वृद्धिः स्त्रीधने लाभे निक्षेपे च तथास्थिते। संदिग्धे प्राति
भाव्ये च यदि न स्यात्स्वयं कृता। स्त्रीधनं प्रीतिव्यपितं। लाभे वृद्धौ निक्षेपे च तथास्थि
ते याचितादत्तान्यस्मिन् संदिग्धे देयमदेयं वेति प्रथमं संदेहास्पदे अग्रे देयतया
निश्चिते पुनर्वृद्धिः। यदि न स्यात्स्वयंकृता स्वयंकृता तु एष्वपि देयेति भावः। भर्तृपु
त्रादीनुपक्रम्य स एवाह। यदि स्यैकतरोऽमीषां स्त्रीधनं भक्षयेद्बलात्। सवृद्धिं प्रतिद

Indira Gandhi National
Centre for the Arts

२९ यःस्याद्विनयंचसमाप्नुयात्।तदेवयद्यनुज्ञाप्यभक्षयेत्प्रीतिपूर्वकं।मूल्यमेवसदाप्यः
स्याद्यदासधनवान्भवेत्।तथाव्यासः॥प्राप्तिभावंभुक्तबंधमगृहीतंचदित्सतः।न
वर्द्धतेप्रपन्नस्यद्रमःभुक्तंप्रतिश्रुतं।भुक्तबंधोगोप्याधिःदित्सतोदातुंप्रवर्त्तोधम
र्णेनागृहीतंधनंप्रपन्नस्यात्रलोकवशागतस्ययश्चोत्तमसाहसादिद्रमःप्रतिश्रुते
यच्चभुक्तंदातुमंगीकृतंदित्सतोऽगृहीतमित्यत्रविशेषयतियाज्ञवल्क्यः॥हीयमाने
नगृह्णातिप्रयुक्तंयस्वकंधनं।मध्यस्थस्थापितंतत्स्यात्वर्द्धतेननतःपरं॥तथागौ
तमः॥भुक्ताधिर्नवर्द्धतेदित्सतोऽवरुद्धस्यच॥भुक्तआधिर्गोप्याधिर्यस्यधनस्यवृत्ति
र्युतपस्यागोप्याधिरित्यर्थः।धनंदित्सतोधनमधमर्णस्यअवरुद्धस्यगृहीतम राम·
र्णंभोक्तुमवरुद्धस्यअधमर्णस्यावरोधनाद्राजभयनवृद्धिर्देया॥०॥अथाधिविधिः॥ २९
तत्रकतिधाआधिरित्यपेक्षायामाहबृहस्पतिः॥आधिर्बंधःसमाख्यातःसचप्रोक्तश्च

तुर्विधः।जंगमःस्थावरश्चैवगोप्योभोग्यस्तथैवच॥याद्दच्छिकःसावधिश्चलेख्यारूढोथ
साक्षिमान्।अत्रजंगमस्थावरादियुग्मचतुष्टयेनचतुर्विधत्वंतद्भेदेनाष्टत्वमितिक
ल्पतरुः॥तथानारदः॥उपचारस्तथैवास्यलाभहानिर्विपर्यये।प्रमादाद्धनिनस्त
द्वदाधौविकृतिमागते।उपचारोरक्षणं।अस्यआधेस्तथैवउपचारोयथैवस्थाप
नंतथैवरक्षणमित्यर्थः।धनिनःप्रमादात्विपर्ययेआधिनाशविकृतिरोगेतिभग्नता
दिकंलब्धेधनिकस्यलाभहानिरित्यर्थः॥कात्यायनः॥गोप्याधिभोगिनोवृद्धिः
सोपकारेचहापिते।गोप्याधस्तात्कदाहादेर्भोगेनभोक्तुर्धनिकस्यवृद्धिर्लभ्यासो
पकारेवलीवर्दादौहापितेसम्यग्व्यवहारासमर्थानीतेतेनकस्याथाधेर्धनिकदोषे
णाव्यवहारासमर्थत्वेनवृद्धिरित्यर्थः॥तथामनुः॥यःस्वामिनाननुज्ञातमाधिंभुंक्तेवि
चक्षणः।तेनार्द्धवृद्धिर्मोक्तव्यातस्यभोगस्यनिष्कृतिः।अकाममननुज्ञातमाधिंयः

Indira Gandhi National
Centre for the Arts

कर्म्म कारयेत्। भोग्याकर्म्मफलं हार्थी वृद्धिं वा लभते न सह इति कात्यायनीयात्। अ
निष्टतो भोगे सर्ववृद्धिहानिः। गोप्याधिभोगे न सर्ववृद्धिहानिरित्युक्तमसक्
त् भोगविषायं। विष्णुः॥ आध्युपभोगे वृद्ध्यभावो दैवराजोपघातमृते विनष्ट
माधिमुत्तमर्णो दद्यात्। दैवोपघातं अस्मदादिप्रयत्नानपेक्षं राजोपघातं राज
प्रयत्नापेक्षं। उभयत्रैव स्वापराधं विना कृतमिति विवक्षितं। यत्तु विनष्टे मूलहानिः
स्यात् दैवराजकृताद् ते। इति नारदेन मूलहानिरित्युक्तं। तदाधिरक्षानपेक्षितस्य
मिति चंडेश्वरः॥ बृहस्पतिः॥ तास्तिमत्स्वं विधिसुहृदामतां दैयं स बंधकं। अन्येषां
लग्नकीयेत लेख्यसाक्षियुतं तथा। स्वेच्छादेयं हिरण्यादौ रसधान्यं तु सावधि। 
देशस्थित्या प्रदातव्यं गृहीतव्यं तथैव तत्। हिरण्यदानेऽवधौ स्वेच्छा रसादौ अ 
वधे रावरूपकल्लं। समवेते लाभ यद् तं प्रार्थनीयं तथैव तत्। न याचते च यः कश्चि

त्लाभात्स परिहीयते। वाह्यबीजात्ययादेयस्पष्टे तत्र हानिः प्रजायते। तेनैव साप्रदातव्या
सर्वेषां कृषिजीविनां। क्षेत्रे हानिर्यस्य विसामस्याप्यतः क्षेत्रं पतितं तत्क्षतिस्त
नैव सोढव्या। तथा बृहस्पतिः॥ भुक्तेश्वासारतां प्राप्ते मूलहानिः प्रजायते। बहुमू
ल्यं यत्र नष्टमल्पिकं तत्र तोषयेत्। असारतां प्राप्ते सर्वथा व्यवहारात्मतां नीते
बहुमूल्यं ल्पधनापेक्षया॥ व्यासः गृहीत्वा दोषान्नष्टं च बंधं हेमादिकं भवेत्।
ऋणी मूल्याभं संशोध्यानन्तं त्यं दाप्यते धनी। तथा॥ धनं ऋणी कृतं दत्वा यस्याधिं
प्रार्थयेद्दणी। तदैव तस्य मोक्तव्या त्वन्यथा दोषवान् धनी। एतच्चावधिविरहितभो
ग्याधिविषयं। तथा याज्ञवल्क्यः॥ उपस्थितस्य मोक्तव्य आधिस्तेयोन्यथा भवेत्
प्रयोजके सति धनं कुले रत्नाधिमाप्नुयात्। आधिस्तज्जनायोपस्थितस्याधमर्णं
स्य धनिनाधनं गृहीत्वा आधिर्मोक्तव्यः। असीचने तु चौरवद्दंवेत प्रयोजके आ

Indira Gandhi National
Centre for the Arts

३० षिधनप्रयोक्तरिअसतिअसन्निहितेकुलेपुत्रादावाधिधनंदत्वाअधमर्णोआधिं
गृह्णातीत्यर्थः॥०॥अथाधिसिद्धिः॥तत्रमनुः॥नचाधेःकालसंरोधान्ननिसर्गो
नविक्रयः॥कालसंरोधाच्चिरकालावस्थानात्निसर्गोत्रान्यत्रतदधिकधनेनाधे
करणंदानमितिहलायुधः।ननिसर्गोनविक्रयउत्तमर्णोनकर्तव्यइतिशेषः।कि
न्तुउत्तमर्णस्यसत्ताभावेनप्रसक्त्यभावान्निषेधोनयुक्तः।अतःसंरोधादव
धिकालनियमनात्तदभ्यंतरेचास्वातंत्र्यादधमर्णोननिसर्गोऽन्यस्मैदानंविक्र
यश्चाधेर्नकर्तव्यइतिसमुदितार्थइत्याहुः।आधीकृतस्यविक्रीतस्यविक्रयोबल
वानितितुतादृगवधिरहिताधिपरं।अनिर्मुक्तस्यचबाधेनेदानंनचविक्रय राम
इतिनुनिर्मूलं।एतच्चमनुवाक्यंभोग्याधिविषयमितिकल्पतरौप्रायोवादःस्या ३०
वसाम्यादकृतम्यवस्थगोप्याधिविषयत्वस्यापिसम्भवात्॥कात्यायनः॥आ

धिमेकंद्वयोर्यत्रकुर्य्यातकाप्रतिपद्भवेत्।द्वयोःपूर्वतरंग्राह्यमाधानंचोरदंडभा
क्।प्रतिपद्यवस्थापूर्वतरंपूर्वमाधानंग्राह्यमित्यर्थः।तथाविष्णुः॥गोचर्ममा
त्रामपिभूमिमन्यस्याधीकृतांतस्मादनिर्मोच्यान्यस्ययःप्रयच्छतिसवध्यस्तुनाचे
त्पूर्वोड्मासुवर्णानदंड्यः।उत्तराधिर्नसिध्यतीत्यर्थः।पारिजातादयोप्येवं।गोच
र्मपदार्थमाहविष्णुः।एकोक्ष्णायायादुत्पन्नेनरःसाम्वत्सरंफलं।गोचर्ममात्रा
साक्षोराशिस्तोकावायदिवाबहुः।आधेःपौर्वापर्य्यसंदेहेत्वाह।ययोर्निक्षिप्तआ
धिस्तौविवदेतांयदानरौ।यस्यभुक्तिर्जयस्तस्यबलात्कारंविनाभवेत्।तुल्य
कालोपभोगोचेत्भोगोपिसमकोभवेत्।प्रदानेविक्रयेचैवविधिरेषःप्रकीर्ति
तः।ताभ्यांविभज्यभोक्तव्यमित्यर्थः।इदंचाधेःपौर्वापर्य्यसंदेहेज्ञेयं।उभयत्रदृश्य
मानतोत्वेअदृष्टेननिर्णयइतिमिश्राः।भोगानुसारेणाव्यवस्थितिविश्वरूपधा

Indira Gandhi National
Centre for the Arts

३९ दृष्टितो॥ बृहस्पतिः॥ क्षेत्रमेकं द्वयोर्बंधे दत्तं यत्समकालिकं। येन भुक्तं भवेत्पूर्वं तत्
स्यात्तस्य सिद्धिमाप्नुयात्। समकालिकं पूर्वापरभूततयाऽशक्यावधारणं द्वाभ्यां व
चनाभ्यां पूर्वापरभूततयाऽशक्यावधारणो यस्य बलात्कारेण भुक्तिस्तस्या
धित्वं भवतीत्युक्तं। यत्र तु द्वयोरपि न तादृशो भोगस्तत्राह स एव॥ तुल्यकालोप
स्थितयोर्द्वयोरपि समं भवेत्। प्रदाने विक्रये चैव विधिः स परिकीर्तितः। यत्रैक
क्रिया साक्षीमती अन्या च लेख्यवती तत्र लेख्यं बलवदित्याह स एव। आधानं
विक्रयो दानं साक्षिलेख्यकृतं यदा। एकक्रियानिबंधनलेख्यं तत्रापहारकं। अप एम·
हारकं बलवत् आधित्वादिसाधकमिति यावत्। एकक्रियानिबंधेन एकस्य पुंसः ३९
क्रियाया निबंधेन लेख्यनिवेशनहेतुनेत्यर्थः॥ तथा। अनिर्दिष्टं च निर्दिष्टमेक
त्र च विशेषितं। विशेषलिखितं ज्यायः इति कात्यायनोऽब्रवीत्। इत्यनेन सामान्येन स

कमेकत्राधीकृतं अन्यस्मिन्प्रदत्तं च नाम चिह्नितं तत्र विरोधे सति नाम चिह्नितमा
धित्वं भजत इत्युक्तं॥ तथा॥ बलात्कारो मयत्राधिमनिर्दिष्टं प्रवेशयेत्। प्राप्नुयात्
सोऽहसंपूर्वमाधाता चाधिमाप्नुयात्। यत्राहितक्षेत्रादेरधिकमपि क्षेत्रादि बलाद्दाधो प्रवे
श्य धनिको भुंक्ते तत्रासौ दंड्यः। आधाता च अदायमप्यामदत्त्वेवाधीकृतं क्षेत्रादि लभत
इत्यर्थः॥०॥ अथ प्रतिभूविधिः॥ कतिविधः प्रतिभूरित्याह बृहस्पतिः॥ दर्शने प्रत्य
ये दाने ऋणे द्रव्यार्पणे तथा। चतुःप्रकारः प्रतिभूः शास्त्रे दृष्टो मनीषिभिः। आद्यौ
दर्शयाम्येनं साधुरेषोऽपरोऽब्रवीत्। दाताहमेतद्द्रविणमर्पयाम्यपरोऽब्रवीत्। ऋणि
दानेऽपि संबंधः। अर्पणमत्र याचितकविषयं तेन यत्केनचित् प्रार्थनीतं तत्रा
परो वदति। यद्ययं नानीयार्पयति तदाहमर्पयामि। तेन तत्रार्पणमात्रं न द
ने ऋणेऽनुदानमेव द्वयोरिति भेदः। सम्प्रदायस्तु ऋणे द्रव्यार्पणे ऋणे द्रव्यस्य धनि

Indira Gandhi National
Centre for the Arts

32 कायार्पणाद्युसाह॥ प्रतिभूभेदेन व्यवस्थाभेदमाह स एव आद्यौ तु वितथे दाप्यौ तत्का
लावेदितं धनं। उत्तरौ तु विसम्वादे तौ विना तत्सुतावपि। वितथे दर्शनाकरणे।
उपदर्शितसाधुत्वभंगे च। तत्कालावेदितं धनं दाप्यौ। उत्तरौ तु विसम्वादे स्वयं स्व
वसेन दानविरहेऽनर्पणे वा तौ विना दातृलग्नकार्पणलग्नकौ विना तत्सुता
वपि दाप्यौ। याज्ञवल्क्यः॥ दर्शनप्रतिभूर्यत्र मृतः प्रात्ययिकोऽपि वा। न तत्पुत्रा ऋणं
दद्युर्दद्युर्दानाय ये स्थिताः दानार्थं यः प्रतिभूत्वेन ये स्थिताः तत्पुत्रा दद्युरित्यर्थः।
दर्शनप्रतिभूर्यत्र दर्शकाले वा दर्शनं कारयितुं स्वीकृतवान् तत्र राजदैवोपघा
तमंतरेणादर्शयन्प्रतिभूर्धनं दद्यादित्याह कात्यायनः। दर्शनप्रतिभूर्यत्र का एम:
ले देशे न दर्शयेत्। निबंधमावहेत्तत्र दैवराजकृतादृते। काले व्यतीते प्रतिभूर्य 32
दि तं नैव दर्शयेत्। निबंधं दापयेत्तत्र प्रेते चैवं विधिः स्मृतः। प्रेतेऽभियोगिनि दर्शना

वधिमतिक्रम्य मृते। यदि बंधकं गृहीत्वा दर्शनप्रतिभूर्मृतस्तदा तत्पुत्रोऽपि दाप्यः।
गृहीत्वा बंधकं यत्र दर्शनेऽस्य स्थितो भवेत्। विभाव्यो वादिना तत्र दाप्यः स्यात्तदृ
णं सुतः। इति कात्यायनीयात्। बंधकं गृहीत्वा दर्शनप्रतिभूर्यः मृत इति विभा
व्य तस्मिन् मृते धनिकाय दर्शनप्रतिभूपुत्रस्तदृणं दाप्यो मध्यस्थेनेत्यर्थः। पि
तामहस्य सकलमृणं पौत्रेणानिष्कलं देयं पितुः प्रातिभाव्यागतमृणं पुत्रेणा
निष्कलं देयं। प्रपौत्रपौत्रौ च न दद्यातामित्याह व्यासः। ऋणं पैतामहं पौत्रः प्रा
तिभाव्यागतं सुतः। समं दद्यात्तत्सुतौ तु न दाप्याविति निश्चयः। यत्र बहवः
प्रतिभुवस्तत्र विशेषयति याज्ञवल्क्यः॥ बहवः स्युर्यदा स्वांशैर्दद्युः प्रतिभुवो
धनं। एकच्छायाश्रितेष्वेषु धनिकस्य यथारुचिः। एकस्य प्रतिभुवश्छायां सा
दृश्यं निरूपेण स्वकार्यकर्तृत्वमाश्रितेषु। एकैकोऽपि धनिकस्य धनं सर्वं दाप

Indira Gandhi National
Centre for the Arts

३३ यितव्यमिति विवादरत्नाकरः॥ यथाह वीर्तियत्र धनिको व्यवहारकाले वदति ममै
षयायमेकस्यापि पार्श्वे गृह्यते न मे मेलनाय यत्नस्तत्रैकोपि लग्नकोधनं
सर्वं दद्यात् तौ समर्थौ। इति विवादचिन्तामणिः। अत्र लग्नकोऽङ्गानियमेन प्रतिभूत्वा
त्तत्र मलनग्नकाभावे स्वकीयमंशं निर्दघुः। एकस्य प्रतिभुवश्छायायां सहस्र
माश्रितेषु प्रतिभूषु धनिकः स्वेच्छया एकस्मिन्नेव प्रतिभुवि सर्वं धनं गृह्णीया
दिति दीपकलिका। पलायितस्याधमर्णस्यान्वेषणे प्रतिभुवे पक्षादिकालं
दद्यात्। यथाह व्यासः। नष्टस्यान्वेषणे कालं दद्यात् प्रतिभुवे धनी। द्विश्रान्
हूपनः पक्षं मासं सार्द्धमथापि वा। नातः ऊर्ध्वं पीडनीयाः स्युर्लग्नकाः शनैः श एम
नैः। स्वसात्ते न निर्यात्याः स्युर्विधिः प्रतिभुवामयं। नष्टः पलायितः। नाशः पला
यने विष्यादिरनुशासनात्। पलायितस्याधमर्णस्येति शेषः। स्वसात्ते स्वसम

ऋत्ते निष्ठितोर्द्दत्सति वा अधमर्णो प्रतिभुवोद्दशेनाय वा नानियोज्याः स्वार्थः। वि
स्मृनारदे॥ यंचार्थे प्रतिभूर्दद्यात् धनिकेनैव पीडितः। लग्नकस्तं प्रतिभुवो द्विगु
णं दातुमर्हति। अत्र विशेषयति। प्रातिभाव्यं तु यो दद्यात् पीडितः प्रतिभाविनः। त्रि
पक्षात् परतः सोऽर्थं द्विगुणं लब्धुमर्हति। त्रिपक्षादर्वाक् तथाविधधनं निष्फलं प्रा
प्नो। तथा च कात्यायनः। यस्यार्थे येन यद्दत्तं धनिना पीडितेन तु। साक्षिभिर्भावितेनै
व प्रतिभूस्तत्समाप्नुयात्। यत्प्रतिभुवा दत्तं तत्समाप्नुयादिति वचनान्निष्फल
त्वमवगम्यते इति चण्डेश्वरः। महेश्वरमिश्रास्तु। यस्यार्थे येन यद्दत्तमित्यादि प्र
तिभुवा धनिकसमाधानाय यदन्यदपि दत्तं स्यात्तदपि तेन लग्नकपार्श्वे गृही
तव्यमित्यर्थोऽवतारणामिति प्राहुः। प्रतिभूस्तु ग्रहणौचः साक्षिसिद्धो समर्थत्वमेवोप
युज्यते। यथा कात्यायनः। नाधमर्णोऽधनिने दातुं दण्डं राज्ञे च तत्समं। नाविज्ञातो ग



Indira Gandhi National
Centre for the Arts

३४ हीनद्व्यः प्रतिभूस्त्वक्रियां प्रतिसमर्थं लोकतश्चैवज्ञेयं। तथा कात्यायनः। न स्वामीन
पिता भ्रातुः स्वामिनाधिकृतस्तथा। निरुद्धो दंडितश्चैव संशयस्थश्च न क्वचित्। नि
वसन्कुथीनमित्रं च न चैवांतेनिवासिनः। नैव राजानियुक्तश्च येच्च प्रव्रजिता नराः
। संशयस्थ आसन्नमरणो संशयविषयं अभिशस्त इति यावत् इति केचित्॥
अकृष्णौ धनिकेनाकलितो केनवा साधारणो अकथः अंतेनिवासिनः शिष्याः।
मितास्त्राकारेणासंतनिवासिन इति पठित्वानैष्ठिकब्रह्मचारिण इति व्याख्या
तं॥ ० ॥ अथर्णोद्दानविधिः॥ तत्र बृहस्पतिः॥ परहस्ताद्गृहीतं यत्तत्कुसीदवि
धिनाऽर्णं। येन यत्र यथादेयमदेयं वोच्यतेऽधुना॥ याचमानः यद्दानव्यमप्रका एमं
लकृतं ऋणं। पूर्णो वधो श्रोतलाभमभावे च पितुः सुतैः। प्रकालोऽवधिः। तेना ३४
वधिमंतरेणाय द्गृहीतमर्णं। तथा याचमानाय याचमानमात्राय यद्दातव्यं सान

धिनुगृहीतमवधौ पूर्णो देयमित्यर्थः। एवमवचंडेश्वरादयः। मिश्रास्तु यत्र धनि
केच्छेवद्दानावधित्वेन भाम्यां नियमितं तत्रैरमवताररणीयमिति प्राहुः। त
थानादरः॥ पितर्युपरते पुत्रा ऋणं दद्युर्यथांशतः। विभक्ता अविभक्ता वा यो वा ता
मुद्वहेद्धुरं॥ याज्ञवल्क्यः॥ पितरि प्रोषिते प्रेते व्यसनाभिप्लुते पि वा। पुत्रपौत्रै
ऋणं देयं निह्नवे साक्षिभावितं। पितृविद्गतमंशाऽऽपुत्रैश्चान्तरभावे पौत्रैरः
ऋणं देयं निह्नवे ऋणिकेन गोपनकृतं सा साक्षिभावितं देयं न यद्यप्रमापित्भि
र्नियातमृ इति रत्नाकरः। अन्याय्यादिलोपितृविप्रोषितेमृतेघृतवेश्यापानाक्ष
कैवाशंक्षातद्भिदिकित्सिन तस्य व्याध्यादिगृहीतपतितेन तद्दत्तां पुत्रैर्णं देयं अ
भावे पौत्रैर्णं विप्रतिपत्तौ साक्ष्यादिप्रतिपादितं देयमिति दीपकलिका॥
विभावितमर्णं पित्र्यमातमीवत् सहद्धिकं पुत्रैर्दातव्यं पौत्रैरवृद्धिकं देयं प्र

Indira Gandhi National
Centre for the Arts

३५ पौत्रैस्तु न देयं। ऋणमात्मीयवत्पित्र्यं पौत्रैर्देयं विभावितं पितामहं समं देयं न देयं
तत्सुतेन तु इति बृहस्पतिवचनात्। अत्र प्रपौत्रमारभ्य यद्दायादेयत्वमुक्तं त
त्सत्रादिकं भोग्याधिमनिच्छित्य यत्प्रपितामहादिनाऋणं कृतं तत्र मंतव्यं।
भोग्याधिं तु दत्वा कृतमृणं चतुर्थादिभिरपि तत्कुल्यैर्देयमित्याह रत्नाकरधृत
याज्ञवल्क्यवचनं। ऋणं लेख्यकृतं देयं पुरुषैस्त्रिभिरेव तु। आधिस्तु भुज्यते ताव
त्यावत्तन्न प्रदीयते। प्रोषिते तु विशेषयति नारदः॥ नार्वाक् संवत्सराद्विंशात्
पितरि प्रोषिते सुतः। ऋणं दद्यात्पितृव्ये वा ज्येष्ठे भ्रातर्यथापि वा॥ कात्यायनः
॥विद्यमानेपि रोगार्ते स्वर्देशात्प्रोषिते तथा। विंशात्संवत्सराद्देयमृणं पि
तृकृतं सुतैः। इदं च रोगार्तस्य ज्ञानाप्रतिक्रियत्वसम्भावनायां प्रोषितस्य पुन
न१ रागमनसम्भावनायां चज्ञेयं। यदित्वसाध्यत्वेन रोगावधारणं प्रवासिनश्च पुन

रागमनव्यतिरेकावधारणं तदा पुनर्जीवतोपि मृतस्येव पितुः पुत्र एव ऋणं दा
तुमर्हतीति विंशतिवर्षपर्यन्तं प्रतीक्षानकार्येत्याह नुः कात्यायनबृहस्पती॥ व्याधितोन्म
त्तवृद्धानां तथा दीर्घप्रवासिनां। ऋणमेवंविधं पुत्रान् जीवतामपि दापयेत्। सोन्ध्ये
पि पितुः पुत्रैर्ऋणं देयं विभावितं। जातांधपतितोन्मत्तक्षयश्वित्रादिरोगिणां॥ जातां
धोजन्मांधः। क्षयश्वित्रेत्यसाध्यरोगोपलक्षकं। पारिजातस्तु यदि पिता सर्वदा अस
मर्थस्तदा पुत्रा ऋणं दातव्यमिति समुदायार्थ इत्याह। रत्नाकरस्तु॥ यद्यसावंशा
नधिकारप्रयोजकरूपवान् पिता अविभक्तधनश्च पुत्रस्तदा पुत्रेणैव तदृणं दे
यमिति। यदित्वसावसाधारणधनः पिता तथाभूतोपि तदा तेनैव दातव्यं। यदा
तु पिता सर्वथैव ऋणदानासमर्थः पुत्रस्तु समर्थस्तदा पुत्रेणैव दातव्यमिति प्रा
हायत्परं तेन सह पितृकच्छाया कृतमृणं तत्परस्याभावप्रोषिते पितरि पित्र्यं

Indira Gandhi National Centre for the Arts

३६ परांशं च पुत्रो दद्यात्। मृते पितरि पित्र्यंशमात्रं दद्यादित्याह बृहस्पतिः॥ एकच्छाया
श्रितं सर्वं दद्यात् प्रोषिते सुतः। मृते पितरि पुत्रांशं परस्तेन कदाचन। अविभक्तै
रेकच्छायाश्रितैर्यदृणं कृतं तदेकोपि यस्तेषां मध्ये यस्तिष्ठेत् स दद्यात्। पितृक
मप्यविभक्तानां भ्रातॄणां मध्ये यस्तिष्ठति स सर्वमेकोपि दद्याद्विभक्तास्तु
भ्रातरो यथांशं दद्युरविभक्तैः कृतं तु ऋणं तदेकोपि यस्तेषां मध्ये तिष्ठति स दद्यात्
पितृकमप्यविभक्तानां भ्रातॄणां विभक्तास्तु दायादानुरूपमंशमिति विज्ञानेश्व
राः। अविभक्तानां मध्ये एकेनापि कुटुम्बार्थं कृतमृणं तदन्यः कर्त्तरि मृते प्रोषिते वा राम ३६
अन्येप्यविभक्ता दद्युः। यथाचतुर्विंशतिमते याज्ञवल्क्यवचनं। अविभक्तैः कुटुम्बार्थं
यदृणं तु कृतं भवेत्। दद्युस्तद्रिक्थिनः प्रेते प्रोषिते वा कुटुम्बिनि। एकत्वेन वसद्भिः
पितृभ्रातृभ्रातृजादिभिरेकेन कुटुम्बार्थं यदृणं कृतं तस्मिन् कुटुम्बिनि प्रेते प्रो

षिते वा तदृणं येन तद्धनाधिकारिणस्ते दद्युः। सामान्यकुटुम्बार्थं कृतं विभक्तैर
पि देयमित्याह मनुः। गृहीता यदि नष्टः स्यात् कुटुम्बार्थं कृतो व्ययः। दातव्यं बा
न्धवैस्तत् स्याद्विभक्तैरपि च स्वतः। इति दीपकलिका। गृहे कुटुम्बार्थमन्यैर
पि कृतमृणं गृहेणादातव्यं पितृव्यभ्रातृपुत्रस्त्रीदासशिष्यानुजीविभिः य
द्गृहीतं कुटुम्बार्थं तद्गृही दातुमर्हतीति बृहस्पतिवचनात्॥ अत्र विशेषो य
ति कात्यायनः। नाप्राप्तव्यवहारस्तु पितर्युपरते क्वचित्। काले तु विधिना देयं
वसेयुर्नरकेन्यथा। पितरि प्रेते त्वप्राप्तव्यवहारैः पुत्रैरृणं न देयं व्यवहार
प्राप्तिकाले तु देयं विधिना यथांशप्राप्तीत्यर्थः॥ तथा बृहस्पतिः॥ ऋणं पुत्र
कृतं पित्रा शोध्यं यदनुमोदितं। सुतस्नेहेन वा दद्यान्नान्यथा दातुमर्हति। का
त्यायनः। ऋणं पुत्रकृतं पित्रा न देयमिति धर्मतः। देयं प्रतिश्रुतं यच्च यच्चस्या

Indira Gandhi National
Centre for the Arts

३० दनुवर्त्तितं। प्रतिश्रुतं ऋणादानसमयेऽङ्गीकृतं। आदानानंतरं स्वीकृतं वानुवर्त्ति-
तं। पुत्रपदमुपलक्षणं ॥ मनुः ॥ प्रातिभाव्यं वृथादानमाक्षिकं सौरिकं च यत्। दं-
डशुल्कावशेषं च न पुत्रो दातुमर्हति। दर्शनप्रातिभाव्ये तु विधिः पूर्वप्रचोदितः।
प्रातिभाव्यमित्यत्र दर्शनप्रत्ययप्रातिभुवौ विवक्षितौ। वृथादानमफलदानं। आ-
क्षिकं द्यूतनिमित्तं। सौरिकं सुरापाननिमित्तं। अत्र द्यूतसुरापानयोर्निमित्तत्वे
विवक्षितं। दर्शनप्रातिभाव्यादिस्थलेन प्रत्ययप्रातिभाव्यमप्युपलक्षणीयं ॥ बृह-
स्पतिः। सौराक्षिकं वृथादानं कामक्रोधप्रतिश्रुतं। प्रातिभाव्यं दंडशुल्कशेषं पुत्रा-
न दापयेत्। कामेन क्रोधेन वा प्रतिश्रुतमित्यर्थः। कामक्रोधकृतमाह कात्या- राम:
यनः। लिखित्वा स्वकृतं वापि दत्तं यत्तु प्रतिश्रुतं। परपूर्वस्त्रियै यत्तु विघातका- ३०
मकृतं ऋणं। यत्र हिंसासमुत्पाद्य क्रोधाद्द्रव्यं विनाशयेत्। उक्तं तुष्टिकरं यत्तु

विघातक्रोधकृतं तु ततः। शेषः सान्निध्याद्दंडशुल्कस्यैव व्युत्क्रमाह व्यासः॥ दंडं वा
दंडशेषं वा शुल्कं तच्छेषमेव वा। न दातव्यं तु पुत्रेण यच्च न व्यावहारिकं। न व्याव-
१ हारिकं व्यवहारं चार्हकृतमित्यर्थः॥ तथा गौतमः॥ प्रातिभाव्यवणिक्शुल्कमद्यद्यू-
तदंडाः पुत्रानध्याभवेयुः। प्रातिभाव्यवणिज्यादिनिमित्तानि ऋणानि न पुत्रानध्या-
भवेयुः। न पुत्रान्परिभवेयुः। न पुत्रैर्देयानीति तात्पर्यार्थः॥ विष्णुः॥ न स्त्रीपति-
पुत्रकृतं न स्त्रीकृतं पतिपुत्रौ अत्र विशेषयति नारदः॥ न भार्य्याया कृतं ऋणं क-
थंचित्सत्सुतो भवेत्। आपत्कालादृते पुंसः कुटुम्बार्थं हि दुस्तरः। आपत्कृतं कुटु-
म्बार्थं कृताद्दृते भार्य्याकृतमृणं न पत्सुतो भवेत्। न पत्युर्देयमित्यर्थः। याज्ञवल्क्यः
॥ गोपशौण्डिकशैलूषरजकव्याधयोषितां। ऋणं दद्यात्पतिस्तासां यस्माद्वृत्तिस्त-
दाश्रया। शैलूषो नटः। गोपादीनां स्त्रीकृतं ऋणं पतिर्दद्यात्यस्माद्वृत्तिस्तदाश्रया

Indira Gandhi National
Centre for the Arts

३८ इति हेतुनिर्द्दिश्यादिति दीपकलिका। बृहस्पतिः॥ शौण्डिकव्याधरजकगोपनाविकयोषि
तां। अधिष्ठाता ऋणं दाप्यस्तासां भर्त्ता क्रियास्तु ता। तासामृणमधिष्ठाता भर्त्ता दाप्यो
यस्मात् भर्त्तुरेव क्रियास्तत्तदृणं ताभिः कृतमिति योजना। इदं च प्रपंचमात्रं। तेनान्यत्रा
पि यत्र प्राधान्यं स्त्रीणां तत्र तथैवमनुज्ञासादरं कार्य्यं। तत्र योषिदेव सर्वमनुसंधत्ते
पुरुषस्यात्र लादित्वं तुम्बरवाचस्पतिमिश्रादयः। अन्यत्र यादृशं स्त्रिया देयं तत्राह
याज्ञवल्क्यः॥ प्रतिपन्नं स्त्रिया देयं पत्या वा सह यत्कृतं। स्वयंकृतं वा यदृणं नान्यत्
स्त्री दातुमर्हति। कात्यायनोऽपि भर्त्रा पुत्रेण सार्द्धं वा केवलं वात्मना कृतं। ऋणमेवं एम·
विधं दद्यात् नान्यथा तत्कृतं स्त्रिया। तत्कृतं भर्तृपुत्रकृतं॥ नारदः॥ न स्त्री पतिकृतं ३८
दद्यात् ऋणं पुत्रकृतं तथा। मर्त्तुकामेन वा भर्त्रोक्ता देयमृणं तया। अप्रपन्नापि सा
दाप्या धनं यद्याश्रितं स्त्रिया। प्रत्यासन्नमरणेन प्रत्यासन्नप्रवासेन वा भर्त्रोक्ता देयमृणं

तया देयमित्यत्रापि तायासा उक्तास्मिन्मृते देशांतरगते वा ऋणं अनिच्छंत्यपि दाप
यितव्या यदि भर्त्तृधनं तदाश्रितमित्यर्थः। मर्त्तुकामेनेत्युपलक्षणं॥ नारदः॥ अंतिमा
स्वैरिणीनां या पुनर्भूः प्रथमा च या। ऋणं तयोः पतिकृतं दद्याद्यस्ते समश्नुते। चतुर्वि
धानां स्वैरिणीनां व्यभिचारिणीनां मध्ये या अंतिमा चतुर्थी पुनर्भूश्च त्रिविधानां म
ध्ये प्रथमा प्रथमोक्ता ते एव स्त्रियौ परिगृह्णन् तत्पतिकृतं ऋणं दद्यात् पुनर्भूर्वैवि
ध्यं नारदस्य वाहनघ्या। परपूर्वाः स्त्रियस्त्वन्याः सप्त प्रोक्ता यथाक्रमं। पुनर्भूस्त्रिविधा ता
सां स्वैरिणी च चतुर्विधा। कन्यैवाक्षतयोनिर्या पाणिग्रहणदूषिता। पुनर्भूः प्रथमा
प्रोक्ता पुनः संस्कारकर्म्मणा। देशकर्म्मोऽनवेक्ष्य स्त्री गुरुभिर्या प्रदीयते। उत्पन्नसा
हसाऽन्यस्मिन् द्वितीया सा प्रकीर्तिता। असत्सु देवरेषु स्त्री बांधवैर्या प्रदीयते।
सवर्णाय सपिंडाय सा तृतीया प्रकीर्तिता। स्त्री प्रसूताप्रसूता वा पत्यावेव तु जीवति।

Indira Gandhi National
Centre for the Arts

३९ कामात्समाश्रयेद्यं प्रथमा स्वैरिणी तु सा। कौमारं पतिमुत्सृज्य या त्वन्यं पुरुषं श्रिता। पुनः
पत्युर्गृहं यायात्सा द्वितीया प्रकीर्तिता। मृते भर्तरि तु प्राप्तान् देवरादीनपास्य या। उपा
गच्छेत्परं कामात्सा तृतीया प्रकीर्तिता। प्राप्ता देशाद्धनक्रीता क्षुत्पिपासातुरा तु या।
तवाहमित्युपगता सा चतुर्थी प्रकीर्तिता॥ कात्यायनः॥ निर्धनेन रनपत्येन यत्कृतं
श्रोत्रियकारिभिः। तत्स्त्रीणामुपभोक्तानुरघान्तरणमेव तु। आदिशब्देन स्वाधीन
वृत्तयो ग्राह्याः॥ कात्यायनः॥ दीर्घप्रवासिनिर्बन्धजडोन्मत्तादिलिंगिनां। जीविनाम
पि दातव्यं तत्स्त्रीद्रव्यसमाश्रिते। दीर्घप्रवासिप्रभृतीनां याः स्त्रीयच्चद्रव्यं तत्ग्राहकै
दित्यर्थः। अत्र च पितुर्मातृभ्रातॄणां पुत्रपौत्रादेश्चैतादृशेन वक्ष्यमाणग्राहिप्रभृतिभिः किं राम·
त्वैतेर्वृद्धो व पुत्रवत्त्रापि वद्धित्वानान्निधानादित्तिशेषः। यत्र तु ब्राह्मणस्य धनिकं ३९
स च निरन्वयो ध्वस्त त्राहनारः। ब्राह्मणस्य तु यद्द्रव्यं सान्वयस्यान चास्ति सः। सकुल्यभो

ऽस्मिन्निनयेत्तदभावेऽस्य बंधुषु। यदा च न सकुल्याः स्युः न च सम्बंधिबांधवाः। तदा दद्यात्
द्विजातिभ्यस्तेष्वसत्स्वप्सु। निक्षिपेत्। ब्राह्मणस्य धनिकस्य सान्वयस्य द्रव्यं तेन त
स्मिन्नदूरत रच्चयाय दातव्यं यदि तु सान्वयो नास्यसौ तदानुक्रमेण सकुल्यादिभ्यस्त
दभावेऽप्सु निक्षिपेत्। बांधवान्वयसकुल्येष्वपि न मापितृसम्बंधाः। क्षत्रियादेस्तु॥ राजै
व तद्गृह्णीयात्॥ ब्राह्मणधनवर्जं हि राजगामीति वचनात्तेन ब्रह्मस्वं राज्ञा कथम
पि न गृहीतव्यमित्यर्थः॥ ०॥ अथोद्ग्राहणविधिः॥ यत्रर्णी प्रार्थने काले प्रार्थितो
पि ऋणी न ददाति तत्र धनिकेन यत्कर्तव्यं तदाह मनुः॥ यैर्यैरुपायैरर्थं स्वं प्राप्नुयादु
त्तमर्णिकः। तैस्तैरुपायैः संगृह्य साधयेदधमर्णिकं। धर्मेण व्यवहारेण छलेना
चरितेन च। प्रयुक्तं साधयेदर्थं पंचमेन बलेन च। पूर्वपूर्वस्यासामर्थ्याभावे उत्तरोत्तरसंग्र
हावश्यकत्वाद्धर्मो बृहस्पतिराह॥ सुहृत्संबंधिसंदिष्टैः सामोक्त्यानुगमेन चा प्रा

Indira Gandhi National
Centre for the Arts

४० येणावाऋणीदाप्यो धर्म्मएष उदाहृतः। ऋणिकस्य ये सुहृत्संबंधिनस्तेषु संदे
शो यो यत्र स्यात् मवचनं यत्रानुगमनं प्रायोपवेशनं वा धनिकस्य स धर्म ऋणोद्ग्रा
हणोपाय इत्यर्थः। ब्राह्मणास्तु परिक्षीणाः शनैर्दाप्या यथोदयं॥ व्यवहारे कात्याय
नः॥ धार्म्यो वरुद्ध ऋणिकः प्रकाशं जनसंसदि। यावन्न दद्याद्देयं च देशाचारस्थिति
र्यथा॥ यावद्दानं जनसंसदि। ऋणिकस्य धनिकेन धारणं व्यवहार इत्यर्थः छला
चरितं बलात्कारे ग्रुवहृत्स्य तः। छद्मना याचितार्थमानीय ऋणिकाद् ऋणी। अ
न्याहिताहि वाहसदाप्यते यत्र सोपधिः। धनिकस्य धनमन्याहिताहिनाछद्मना
आहृत्य वा यत्र साधनोपायः तदुपधिश्छलमुच्यत इत्यर्थः। पुत्रदारपशूनवद्धा एम·
कृत्वा द्वारोपवेशनं। यत्र ऋणी दाप्यतेऽर्थस्तदाचरितमुच्यते। बद्धास्वगृहमा ४०
नीय ताडनाद्युपक्रमैः। ऋणिकोदाप्यते यत्र बलात्कारः स उच्यते। पुत्रदारप

शूरोधो द्वारोपवेशनं च यत्र उद्ग्राहणोपाय आचरितमुच्यते इति पूर्ववचनार्थः। द्वितीय
वचनस्य तु स्वगृहमानीय ताडनादिलक्षणः उद्ग्राहणोपायो बलात्कार उच्यत इत्य
र्थः। इदानीं कोधमर्णः केनोपायेन साध्यस्तदाह कात्यायनः॥ राजानं स्वामिनं विप्रं सा
न्त्वेनैव प्रसाधयेत्। ऋक्थिनं सुहृदं वापि छलेनैव प्रसाधयेत्। ऋक्थिनं दायादं तथा
वणिजः कर्षकांश्च वणिज्येन प्रब्रवीत् भृगुः॥ देशाचारेण दाप्याः स्युः दुष्टान् सं
पीड्य दापयेत्। वणिजादीन् धिकृत्य देशाचारेण दाप्याः स्युरिति भृगुरब्रवीदित्यर्थः
। यत्र धारणोपि धनेन लभ्यते तत्राहृत्य स्मृतिः॥ निर्धनं ऋणिकं कर्म्म गृहमानीय का
रयेत्। शौण्डिकाद्यं ब्राह्मणास्तु दापनीयाः शनैः शनैः॥ याज्ञवल्क्यः॥ हीनजातिं परि
क्षीणमृणार्थं कर्म्म कारयेत्। ब्राह्मणास्तु परिक्षीणाः शनैर्दाप्या यथोदयं। ऋणा
र्थे ऋणानित्तारार्थे यथोदयं यथाधनोत्पत्तिरिति रत्नाकरः॥ उत्तमर्णोपि तथा अ

Indira Gandhi National
Centre for the Arts

४१ पकृष्टजातिऋणशोधनार्थं स्वजात्यनुरूपकर्मकारयेत् ब्राह्मणः पुनस्तथाविधः कु
टुम्बाविरोधेन यथासंभवं दापनीयं इति दीपकलिका। व्यापारद्वारा ऋणशोधने
न ब्राह्मणस्य च यथा कात्यायनः॥ कर्मणा क्षत्रविट्शूद्रान् समहीनांश्च दाप
येत् कर्मणा व्यापारद्वारा यत्र ब्राह्मणानया उत्तमर्णाधमर्णौ तत्र साम्ये ब्राह्म
णस्यापि छेदेनैव शनैर्दाप्य इति वाक्यादिति रत्नाकरः। यत्पुनरुत्तमर्णो ऋणमोचना
र्थमात्मविपरिभाषितं निन्दितं कर्म कारयेत् तदासोऽत्रापूर्वसाहसं दंड्यः। ऋ
णिकश्च ऋणान्मुच्यते इति कात्यायनः। यदि ह्यादावलादिष्टमशुभं कर्म कार
येत्। प्राप्नुयात् स साहसं पूर्वमृणान्मुच्येत चर्णिकः॥ वाचस्पतिमिश्रेण प्रथम ऋण·
तमेव बलात्कारे दंडमाह कात्यायन इत्याभाष्य यदि वा शावलादिष्टमिति पठितं ४१
यद्याशारणिकं गर्हितं कर्म ऋणनिर्यातनाय धनिकः कारयेत् तदा स पूर्वसाहसं दं

ड्यः। ऋणिकश्च ऋणान्मुच्यते इति व्याख्यातं॥ अथ शक्तिविहीनः स्याद्दणी का
लविपर्ययात्। शक्त्यपेक्षमृणं दाप्यः काले काले यथोदयं। शक्तिविहीनस्य ऋणं
दातुमिच्छाः कालविपर्ययात् दुर्भिक्षादेः यदि परमवृद्धिप्राप्तं धनमृणिको दातुं
न शक्नोति तदा चक्रवृद्ध्या स्वेच्छया धारयेत् यथाह बृहस्पतिः॥ पूर्णावधौ शांतला
भमृणमुद्राहयेद्धनी। कारयेद्वाधनी लेख्यं चक्रवृद्धिव्यवस्थया। शांतलाभं पर
मवृद्धिप्राप्तं। बृहस्पतिः द्विगुणस्योपरि यदा चक्रवृद्धिग्रहणे। भोगलाभस्त
थानत्र मूलं स्यात् सोदयमृणं। यत्र यत्र तत्र तत्रे साध्याहार्य। तथा च यत्र चक्रवृ
द्धिर्गृह्यते तत्र यथा सोदयमृणं द्विगुणस्योपरि भवति तथा भोगलाभोपि सर्व
ऋणपभावे स एव बृहस्पतिः॥ हिरण्ये द्विगुणीभूते मृते नष्टेऽधमर्णिके। द्रव्यं
तदीयं संगृह्य विक्रीणीत ससाक्षिकं। रसैद्वाक्कृतमूल्यं नु रक्षाहं जनसंसदि। ऋण

४२ नुरूपं परतो गृह्णीतामन्यत्तु वर्जयेत्। स्वधनं च स्थिकरोति स गणानां कुशलैर्नरैः। नष्टं बन्धु
ज्ञातिविदितं प्रमूल्ह्णा पराभ्रु यात्। नष्टे पलायनादिना असतां दर्शनविषयेन दी
यद्द्रव्यं बंधकरूपमिति धारेश्वरः। नष्टं बन्धुज्ञातिविदितं तदधमर्णविषयविश्वास
विदितं। नष्टं ज्ञातविदितमिति विवादचिंतामणौ पाठः। मनुः यः स्वयं साधये
दर्थमुत्तमर्णोधमर्णिकात्। स राज्ञा नाभियोक्तव्यः स्वकं संसाधयन् धनं। यथावि
षयं धर्मादीन् धनसाधनोपायेन प्रयुंजानो न राज्ञा निवर्तनीयः। इति तात्पर्या
र्थः। याज्ञवल्क्यः॥ प्रतिपन्नं साधयतार्थं न वाच्यो नृपतेर्भवेत्। साध्यमानो नृपं ग
छन् दण्ड्यो दाप्यश्च तद्धनं। वाच्योऽनिषिद्धः स्वत्वप्रतिपन्नं अर्थं उत्तमर्णः साधयन् य एम
द्यधमर्णो राज्ञि निवेदयेत् तदा तत् कथं करोति। न राज्ञा नो वक्तव्यः। बलादिना तु सा ४२
ध्यमानोऽधमर्णो यदि राज्ञि निवेदयेत् तदा तद्धनमुत्तमर्णाय दापयेत् दण्डं स्वयं प्रा

ह्यमिति शूलपाणिः॥ प्रपन्नो स्वीकृतस्तत्त्वतः इति चंडेश्वरः॥ यत्तु विप्रतिपन्नो न्यायवा
दी सन्नासेध्यः॥ तथा च बृहस्पतिः॥ नासेद्धव्यः क्रियावादी संदिग्धेऽर्थे कथंचन। आ
सेधयंस्तु नासेध्यं दंड्यो भवति धर्मतः। प्रशांतव्यं यद्भवति धर्मतस्तद्दशाप्यहं। ए
वं यत्र शास्त्रोक्तो वृत्तिः क्रियावादी स उच्यते। रूपसंख्यादिलाभेषु यत्र भ्रांतिर्द्वयोर्भ
वेत्। अदेयदेययोर्वापि संदिग्धार्थः प्रकीर्तितः। रूपं धनस्य रूपं सुवर्णरजता
दि संख्यायामियत्तायां आदिपदाद्धाद्देशलाभे कलायां देयादेययोर्यत्र द्वयोर
र्थिप्रत्यर्थिनोर्भ्रान्तिर्विप्रतिपत्तिर्भवति सोऽर्थः संदिग्ध उच्यते॥ मनुः॥ अधम
र्णार्थसिद्ध्यर्थमुत्तमर्णेन चोदितः। दापयेद्धनिकस्यार्थमधमर्णाद्विभावितं। अ
स्यार्थः। अधमर्णाद्यो लभ्योऽर्थस्तत्सिद्ध्यर्थमुत्तमर्णेन चोदितो राजा प्रकृतत्वात्
धनिकस्यार्थं प्रदापयेत्। अधमर्णाद्विभावितं अधमर्णाल्लभ्यतया धनिकेनैव

Indira Gandhi National
Centre for the Arts

४३ विभावितंप्रमाणेनबोधितं।यत्रतुदंडनीयोधनवान्भवतितत्रविवादविषयात्द्वि
गुणंधनंदंड्यः।योयावन्निह्नुवितार्थंमिथ्यायावतिवावदेत्।तौन्टपेणह्यधर्म्मज्ञौ
दाप्यौतद्द्विगुणंधनं।योऽभियुक्तआप्तपरोषेणनिह्नवंकरोतिअभियोक्तावामि
थ्याभियोगंकरोतितावुभावपिअधर्मव्यवहारेणन्टपेणविवादविषयाद्धना
द्द्विगुणंदंडनीयावितिसमुदितार्थः॥यमः॥श्लोकःसधनोयस्तुदौरात्म्या
न्नप्रयच्छति।राज्ञादापयितव्यःस्याद्गृहीत्वाद्द्विगुणंततः।नारदः॥श्लोकःस
धनोयस्तुदौरात्म्यान्नप्रयच्छति।राज्ञादापयितव्यःस्याद्गृहीत्वांऽशंतुविंशकं॥
विंशकंविंशतितमभागं।एषचगुरुलघुदंडविकल्पोदंडनीयगुणजातिप्र राम:
त्यपेक्षयाद्रष्टव्यः।तथा।ऋणंदेयंप्रतिज्ञातेपंचकंशतमर्हति।अपह्नवे ४३
तद्द्विगुणंतन्मनोरनुशासनं।अस्यार्थः।आदौविमतेपश्चादनुमतेशतंपं

चकंपश्चादपिविमतेप्रमितेशतेदशकंविमतोराज्ञादंड्यः।इदंदंड्यात्स्वधनविषयं॥
याज्ञवल्क्यः॥निह्नवेभावितोदद्याद्धनंराज्ञेचतत्समं।मिथ्याभियोगीद्विगुणम
भियोगाद्धनंहरेत्।कारणाविरोधःस्याज्जितस्यैकतरस्यच।प्रान्यायवादेचतथा
जितस्यैकतरस्यतु।मध्यविधधनस्यमिथ्याकारणप्रान्यायवादेस्विदं॥विष्णुः
॥उत्तमर्णश्चेद्राजानमियात्तद्विभावितोऽधमर्णोराज्ञेधनदशमभागंदंडंदद्या
त्।प्राप्तार्थश्चोत्तमर्णोविंशतितममंशंदद्यात्।इत्यस्यऋणाभिसादि।कात्यायनः
॥नानर्णसमवायेतुयद्यत्पूर्वंकृतंभवेत्।तत्तदेवाग्रतोदेयंराज्ञःश्रोत्रियतोऽनुच
।एकाहेलिखितंयत्रतत्रकुर्याद्दणांसमं।ग्रहणंदत्तणांलाभमन्यथानुयथाक्रमं।
यस्यद्रव्येणयस्तांपसाधितंयोविभावयेत्।तद्द्रव्यमन्येनैवदातव्यंतस्यनान्य
था।अन्यद्रव्याभावेतस्यैवकृतंतद्देयमित्यर्थः।याज्ञवल्क्यः॥दत्त्वर्णंपाटयेल्लेख्यं

Indira Gandhi National
Centre for the Arts

४४ मुद्रेचान्यच्चकारयेत्। साक्षिमच्च भवेद्यद्दा दानक्रयतत्समासिकं॥ याज्ञवल्क्यः
॥लेख्यस्य पृष्ठेऽभिलिखेत् दत्त्वा दत्त्वा धनं ऋणी। धनी चोपगतं दद्यात् स्वहस्त
परिचिह्नितं। उपगतं उपगतलिखनं। समग्रऋणशोधनासामर्थ्ये यावद्दत्तं
दद्यात्तावदृणी लेख्यपृष्ठेऽभिलिखेत्। ऋणी च प्रायेणापत्रं दद्यात् लेख्यासन्नि
धाने दृष्टं यथा विष्णुः॥ असमग्रदाने लेख्यासन्निधाने चोत्तमर्णः स्वलिखितं दद्या
दिति स्मृत्यपारिगः॥ बृहस्पतिः॥ धर्म्मादिनोद्याद्य धनं यस्तत्परिलेखयेत्। नचे
वोपगतं दद्यात्तस्य तद्दृद्धिमाप्नुयात्। अत्र वृद्धिहानिरिति कल्पतरुः॥ अथ दाय दाय·
भागः॥ तत्राह नारदः॥ विभागोऽर्थस्य पित्र्यस्य पुत्रैर्यत्र प्रकल्प्यते। दायभाग इ ४४
ति प्रोक्तं तद्विवादपदं बुधैः। पितृत आगतं पित्र्यं पितुर्मरणापातित्यादिअनधीन
जातस्वत्वकमिति यावत्। पित्र्यस्येति पुत्रैरिति च संबंधिमात्रोपलक्षणं। संबंधिमा

त्रेणसंबंधिमात्रधनविभागो दायपदप्रयोगात् दायभागविवादपदमुपक्रमणाद्दे
नमात्रादिधनविभागस्योपदर्शितत्वात् पित्रादिपदं मदत्रैव सपत्नीपुंसयोरुक्तो
धर्म्मो वो रतिसंज्ञितः। आपद्यपसप्राप्तिश्च दायभागनिवोधत इत्युपक्रम्य यावत्सं
बंधिधनविभागस्य मनुनाशुक्तत्वाच्च दीयत इति व्युत्पत्त्या दायशब्दो दत्तिप्रयो
गश्चगोणः। मृतप्रव्रजितादिस्वत्वनिवृत्तिपूर्वकपरस्वत्वोत्पत्तिरूपफलसाम्या
त्। ततश्च पूर्वस्वामिनः स्वत्वोपरमे पूर्वस्वामिसंबंधाधीनं यत्र द्रव्ये स्वत्वं तत्र नि
रूढो दायशब्दः। तत्र मृतस्य पतितस्य उपरतस्पृहस्य तादृश धनं प्रथमं पुत्रोधि
कारी। यद्यहवश्चेत्पुत्राः समं विभजेरन्। एवमन्यत्रापि। तदभावे पौत्रः। तदभा
वे प्रपौत्रः। पुन्नाम्नो नरकाद्यस्मात्त्रायते पितरं सुतः। तस्मात्पुत्र इति प्रोक्तः स्व
यमेव स्वयंभुवा इति मनुवचनेन पुत्रेणालोकान् जयति पौत्रेणानंत्यमश्नुते।

Indira Gandhi National
Centre for the Arts

४५ अथपुत्रस्यपौत्रेणब्रध्नस्याप्नोतिविष्टपं।इतिवशिष्ठवचनेनलोकानंत्यदिवप्राप्ति
पुत्रपौत्रप्रपौत्रकैरितियाज्ञवल्क्यवचनेनचपुत्रादीनांजन्मप्रभृतिपित्रादेःपरलो
कोचितमहोपकारत्वप्रतिपादनेनधनभागित्वज्ञापनात्।ज्येष्ठेनजातमात्रेणपुत्री
भवतिमानवः।पितॄणामनृणश्चैवसतस्माल्लब्धुमर्हतीतिमनुनोपकारकत्वेनै
वस्फुटंधनाधिकारप्रतिपादनात्।सतत्र्यंगजेपुनर्ह्रामीस्वार्थोभवतीतिबोधाय
नवचनात्मृतपितृकपौत्रमृतपितृपितामहकप्रपौत्रयोःपुत्रेणसहतुल्या
धिकारः।पार्वणपिंडदातृत्वेनउपकारविशेषात्।जीवत्पितृकपौत्रजीवत्पि राम·
तृपितामहकप्रपौत्रयोर्नाधिकारः।पार्वणपिंडदानाभावेनोपकारकत्वाभावा ४५
त्।एषामभावेविभक्ताविभक्तस्यावरादिधनेपत्न्यधिकारिणीतिश्रीकृष्णत
र्कालंकारस्वामिभट्टाचार्यजीमूतवाहनप्रभृतयःप्राहुः।विभक्तधनेपत्नीअधि

कारिणी।अविभक्तधनेभ्रातरःक्रमेणाधिकारिणः।पत्नीतुग्रासाच्छादनमात्र
भागिनीइतिनृसिंहाः।धर्मपरायणासतीपत्नीअधिकारिणी॥अपुत्राशयनंभ
र्तुःपालयंतीव्रतेस्थिता।पत्न्येवदद्यात्तत्पिंडंकृत्स्नमंशंलभेतच।इतिवृहन्मनुव
चनात्।पत्नीदुहितरश्चैवपितरौभ्रातरस्तथा।तत्सुतोगोत्रजोबंधुःशिष्यःस
ब्रह्मचारिणः।एषामभावेपूर्वस्यधनभागुत्तरोत्तरः।स्वर्यातस्यह्यपुत्रस्यसर्व
वर्णेष्वयंविधिःइतियाज्ञवल्क्यवचनाच्च।पतिस्वर्गार्थंगुरुणावृद्धेभ्योदानम
प्यनुमतं।तत्तद्गुणावनेदेयंपतिप्रीणनकाम्ययाइतिवचनात्।स्त्रीणांस्वपतिदा
यस्तुउपभोगफलःस्मृतः।नापहारंस्त्रियःकुर्युःपतिवित्तात्कथंचनइतिवच
नाच्च।अपहारश्चधनस्वाम्यनुपयोगेभवति।अतएववर्त्तनाशक्तौआधानेविक्र
येणाप्यनुमतेदेहनाशेउपकारविलोपात्।तस्यापतिपरतंत्रत्वान्नतुस्वात

Indira Gandhi National
Centre for the Arts

४६ त्र्यंभते भर्त्रैर्य पुत्रायाः पतिपक्षः प्रभुः स्त्रियाः। विनियोगेऽर्थरक्षायां भरणे तु स ईश्व
र इति वचनात्। तदभावे पितृपक्षः प्रभुः पतिक्षये पतिकुले निर्मनुष्ये निराश्रये
। तत्पिंडेषु वा सत्सु पितृपक्षः प्रभुः स्त्रिया इति वचनात् पत्नी चाधुना सवर्णेव क
लावसवर्णा विवाहनिषेधात्। अस्याएव धनभागित्वं। अपुत्रा शयनं भर्तुः पाल
यंती गुरौ स्थिता। पत्न्येव दद्यात्तत्पिंडं कृत्स्नमंशं लभेत च इति वचनात्। इतिप
त्न्यधिकारः पत्न्यभावे कुमारी धनाधिकारिणी। यथैवात्मा तथा पुत्रः पुत्रेण दु
हिता समा। तस्यामात्मनि जीवंत्यां कथमन्यो धनं हरेदिति मनुवचनात्। अपु
त्रस्य मृतस्य कुमारी ऋक्थं गृह्णीयात् तदभावे चोढेति पराशरवचनाच्च तत्राये राम.
विशेषः। कन्या जाताधिकारा पश्चात्परिणीता। अविद्यमानपुत्रा यदि मृता ४६
तदा तत्रापत्यदायेऽसपुत्रायाः संभावितपुत्रायाश्च भगिन्योः तस्योऽधिकारेण तु

तत्र भर्त्रीरीणां स्त्रीधन एवं तेषामधिकारात् तदभावे पुत्रवती संभावितपुत्रा च
तुल्याधिकारिणी। एतयोरेकतराभावे अन्यतराधिकारिणी। पुत्राभावे दुहिता
तुल्यसंतानदर्शनात्। पुत्रश्च दुहिता चोभे पितुः संतानकारिके इति वचनात् सद
शीसदृशेनोढा साध्वी शुश्रूषणे रता। कृता कृता वाऽपुत्रस्य पितुर्धनहारिणी तु सा इति वचना
त्। स्वपुत्रद्वारा पार्वणपिंडदात्त्वं न याद्युयोरुपकाराविशेषाच्च। संतानस्य पिंडदोऽभि
मतः अपिंडदस्यानुपकारकत्वेनान्यसंतानादसंतानाच्चाविशेषात्। कृता पुत्रिका अ
कृता न इत्या अपुत्रस्य पत्नीकुमारिकस्यैतापि बोध्यं। पत्नीकुमार्योरभाव एव तु दु
हित्रधिकारावगमात् वंध्या पुत्रहीनविधवयोः कृताधिकारः। स्वसन्ततया स्वजन्यसन्तया
चपार्वणपिंडदानाभावात्। किंतु पतिकुले वर्त्तमानत्वाभावे ग्रासाच्छादनभागित्वमि
ति। तयोरभावे दौहित्रः। अपुत्रपौत्रे संसारे दौहित्रा धनमाप्नुयुरिति वचनात्। यथा

४७ पितृधनेस्वाम्यं तस्याः सत्स्वपि बंधुषु। तथैव तत्सुतेपीष्टं मातृमातामहेधने इति व
चनाच्च। अत्र पुत्रपौत्रपदं दुहितृपर्यंताभावपरं अन्यथा याज्ञवल्क्यवचनविरो
धः स्यात् इति श्रीमत्कौलंकारस्मार्त्तभट्टाचार्यजीमूतवाहनादयः प्राहुः॥ पु
त्राद्यभाव एव दुहितृसत्वेपि दौहित्राधिकार इति गोविंदराजलिखितं॥ यथा येन
दौहित्रेय पिंडेन दुहिता पितृधनाधिकारिणी तथैव तेनैव पिंडदानेन दुहितृ
सुतोऽपि मातामहधने स्वामी सत्स्वपि पित्रादिषु। तदभावे पिता तदभावे माता
प्रागुक्तयाज्ञवल्क्यीयात्। अनपत्यस्य धनं पत्न्यभिगामि तदभावे दुहितृगामि तद
भावे दौहित्रगामि तदभावे पितृगामि तदभावे मातृगामीति विष्णुवचनात् तद एम:
भावे भ्रातरः॥ पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा। तत्सुतो गोत्रजो बंधुः शिष्यः ४७
सब्रह्मचारिणः। एषामभावे पूर्वस्य धनभाग् उत्तरोत्तरः। स्वर्यातस्य ह्यपुत्रस्य सर्व

वर्णेष्वयं विधिरिति याज्ञवल्क्यीयात् प्रागुक्तविष्णुस्मृतेश्च। तत्रापि प्रथमं सोदरः
सोदरस्यानु सोदर इति वचनात् धनिभोग्यपित्रादित्रिकपिंडदानात् मातामह
हादिभोग्यपिंडदानाच्च। तदभावे वैमात्रेयः तद्भोग्यपित्रादिपिंडत्रयमात्रदातृ
त्वात्। अत्रापि वैमात्रेयस्य संसृष्टत्वे सोदरस्यासंसृष्टत्वे तयोस्तुल्याधिकारः।
सोदरासोदरयोः संसृष्टत्वे सोदरः सोदराणामेकतरस्य संसृष्टत्वे अपरस्यासं
सृष्टत्वे संसृष्टसोदर एव गृह्णीयात्। संसृष्टिनस्तु संसृष्टी सोदरस्य तु सोदरः।
दद्याच्चापहरेदंशं जातस्य च मृतस्य च। अन्योदर्यस्तु संसृष्टी नान्योदर्यो धन
हरेत्। असंसृष्ट्यपि चादद्यात् संसृष्टो नान्यमातृजः इति याज्ञवल्क्यीयात्। असंसृ
ष्ट्यपि सोदरो गृह्णीयात् सोदरपदमनुवर्त्तते नान्यमातृज एव संसृष्टो गृह्णीयात्
संसृष्टपदमेव वा सोदरमभिधत्ते। अत एव बृहद्याज्ञवल्क्यवचने सोदरो नान्य

Indira Gandhi National
Centre for the Arts

४८ मातृजइति जितेंद्रियत्वादिविशेषणं तदा च पूर्वार्द्धस्य संसृष्टी सानुवर्त्तनेनैनकेवलम
सोदर्य एव संसृष्टी गृह्णीयात् किंत्वसंसृष्ट्यपि सोदर इत्यर्थः तेनासंसृष्टिना सोदरे
णासंसृष्टिना असोदरेण च विभज्य गृहीतव्यं। अविभक्तस्थावराणां तु सोदरत्वा
सोदरत्वानादरेण सर्वैरेव समं विभजनीयं। यथा यमः अविभक्तं स्थावरं यत्
सर्वेषामेव तद्भवेत्। विभक्तं स्थावरं ग्राह्यं नान्योदर्यैः कथंचन। सर्वेषां सोदराणां सो
दराणामित्यर्थः। भ्रातृपुत्रे चयं रीतिरनुसर्त्तव्या। तदभावे भ्रातृपुत्रः तत्रापि प्र
थमं सोदरभ्रातृपुत्रः ततो वैमात्रेयभ्रातृपुत्रः तद्दत्तधनिपितृपितामहपिंडेष
निमातृपितामही भोग्यत्वाभावेन सोदरभ्रातृपुत्रपित्स्यान्नूनोपकारकत्वात् राम
।स्विन्नभर्त्रा सह श्राद्धं माता भुंक्ते स्वधामयं। पितामही च स्वेनैव स्वेनैव प्रपिता ४८
मह्यादि पुषित्रादिपिंडे पिंडदानुमात्रादीनां भोगश्रुतेः। तदभावे वैमात्रेयभ्रा

---

तृपुत्रः तदभावे गोत्रजः। तत्रायं क्रमः। भ्रातृपौत्रः प्रागुक्तयाज्ञवल्क्यीयात् धानंतः
पितुः पिंडदातृत्वात् सपिंडत्वाच्च। अत्रापि सोदरवैमात्रेयभ्रातृपुत्रवत् क्रमो
बोध्यः। इति श्रीकृष्णनकीलंकारः॥ तदभावे पितृदौहित्रः धनिनः पित्रादिपिंडत्र
यदानात्। तदभावे पितामहः। दौहित्रांतस्वसंतानाभावे पितुरधिकारवत्तद्दौ
हित्रांतपितृसंतानाभावे पितामहाधिकारस्य सौदर्षिकन्यायसिद्धत्वात् धनि
भोग्यप्रपितामहपिंडदातृत्वाच्च। तदभावे पितामही अनपत्यस्य पुत्रस्य माता
दायमवाप्नुयात्। मातर्यपि च वृत्तायां पितुर्माता हरेद्धनमिति मनुवचनात्
यथा पितृभावे माता तथा पितामहाभावे पितामहीति सौदर्षिकन्यायेन पितामहा
६ त्वं पितामह्या अधिकार इत्यर्थः। तदभावे पितृव्यः धनिभोग्यपितामहप्रपि
तामहपिंडदातृत्वात्तदभावे पितृव्यपुत्रः। तस्यापि धनिभोग्यपितामहप्रपि

Indira Gandhi National
Centre for the Arts

४९ तामहपिंडदातृत्वात् तदभावे पितृव्यपौत्रधनिभोग्यपितामहपिंडदातृत्वात्तद
भावे पितामहदौहित्रः धनिभोग्यपितामहप्रपितामहपिंडदातृत्वात् नचध
निभोग्यपिंडद्वयदातृत्वेन धनिभोग्यपिंडैकदातुः पितृव्यपौत्रादस्योपकार
धिक्यमिति वाच्यं। पितृव्यपौत्रस्य सपिंडत्वेन बलवत्त्वात्। अत्र पितामहदौ
हित्राभावे पितृव्यदौहित्रः धनिभोग्यतत्पितामहप्रपितामहपिंडदातृ
त्वात्। श्रीकृष्णतर्कालंकारआह तन्न्यिंत्यं तदभावे प्रपितामहः तदभावे प्रपि
तामही प्रागुक्तसांदृष्टिकन्यायसिद्धत्वात्। तदभावे प्रपितामहपुत्रः तद एम·
भावे प्रपितामहप्रपौत्रः तदभावे तत्प्रपौत्रः तेषामपि धनिभोग्यतत्प्र ४९
पितामहपिंडदातृत्वात् तदभावे प्रपितामहदौहित्रः धनिभोग्यप्रपितामह
पिंडदातृत्वात् तदभावे मातामहः तदभावे मातुलः तदभावे तत्पुत्रः तदभा

वे तत्पौत्रः। मनुनात्रयाणामुदकं कार्य्यं त्रिषुपिंडः प्रवर्त्तते। अनंतरः सपिंडा
द्यस्तस्य तस्य धनं भवेत्। इत्याभ्यां वचनाभ्यां उपकारानंतर्य्यक्रमेणाधि
कारः प्रतिपादकाभ्यां तेषामधिकारप्रतिपादनात् दायभागप्रकरणांतर्यो
दभिधानस्य उपकारक्रमेणाधनाधिकारज्ञापनैकप्रयोजनकत्वात् अन्यथा
एतत्प्रकरणांतदुपादानवैयर्थ्यं स्यात्। तदभावे वृद्धप्रपौत्रः तदभावे अ
तिवृद्धप्रपौत्रः तदभावे अतिवृद्धप्रपौत्रः तेषामन्नभोग्यलेपदातृत्वात्। तद
भावे वृद्धप्रपितामहः तदभावे तत्पुत्रः तदभावे तत्पौत्रः तदभावे तत्प्रपौत्रः
तदभावे वृद्धप्रपितामहदौहित्रः तदभावे अतिवृद्धप्रपितामहः तदभावे त
त्पुत्रः तदभावे तत्पौत्रः तदभावे तत्प्रपौत्रः तदभावे अतिवृद्धप्रपितामह
दौहित्रः। तदभावे अस्यानिवृद्धप्रपितामहः तदभावे तत्पुत्रः। तदभावे तत्पौत्रः। त

५० द्भावे तत्पौत्रः। तदभावे प्रसतिवृद्धप्रपितामहदौहित्रः बहवो ज्ञातयो यत्र स
कुल्या बांधवास्तथा। यो ह्यासन्नतरस्तेषां सोऽनपत्यधनं हरेत्। इति बृहस्प
तिवचनात् आसन्नतरत्वं चोपकारातिशयेन त्रयाणामुदकं कार्यमिति प्रा
गुक्तवचनात्। अनंतरः सपिंडाद्यद् इति प्रागुक्तमनुवचनात्। तदभावे समा
नोदकाः। सकुल्यपदेनैव तेऽपि उपात्ता मंतव्याः। तदभावे बृहस्पत्युक्तबांधवाद्
यस्तेन आत्मपितृमातृबांधवा यथाक्रमं धनाधिकारिणो मंतव्याः। तदभावे
आचार्यः तदभावे वेदाध्यायिशिष्यः आचार्यः शिष्य एव वेति मनुनाक्रमेण राम·
तयोरधिकारप्रतिपादनात्। तदभावे सब्रह्मचारी सतीर्थः सब्रह्मचारिणाद् ५०
तियाज्ञवल्क्यवचनात् तदभावे स्वग्रामस्थः सगोत्राः तदभावे तथाविधाः स
मानप्रवराः पिंडगोत्रार्षिसंबंधाः ऋक्थं हरेयुरिति वचनात् तदभावे स्वग्राम

स्थाः त्रैविद्यादिगुणयुक्ता ब्राह्मणाः। एतेषामभावे क्षत्रियादीनां धने राजा ब्रा
ह्मणधनवर्जं राजगामीति वचनात्। ब्राह्मणानां तु। सर्वेषामप्यभावे तु ब्राह्मणा
धनहारिणः। त्रैविद्याः शुचयो दांता एवं धर्मो न हीयते इति मनुवचनात् तद
भावे ग्रामांतरस्थस्य ब्राह्मणस्याधिकार इति॥ ०॥ अथ वानप्रस्थयतिब्रह्म
चारिणां धनभागिनः। तत्र नैष्ठिकस्य ब्रह्मचारिणो धने आचार्योऽधिकारी य
तिधने सच्छिष्योऽध्यात्मशास्त्रप्रवणो धारणानुष्ठानदक्षोऽधिकारी वान
प्रस्थधने धर्मभ्रात्रैकतीर्थोऽधिकारी वानप्रस्थयतिब्रह्मचारिणामृक्थभा
गिनः क्रमेणाचार्यसच्छिष्यधर्मभ्रात्रैकतीर्थिन इति याज्ञवल्क्यवचनात्।
क्रमेण प्रातिलोम्यक्रमेण संबंधः॥ ०॥ अथ स्त्रीधनाधिकारिणः॥ तत्रादौ स्त्री
धनं निरूप्यते॥ तत्र विष्णुः॥ पितृमातृसुतभ्रातृदत्तमध्यग्न्युपागतं। आधिवेदनिकं

Indira Gandhi National
Centre for the Arts

५१

बंधुदत्तंशुल्कान्वाधेयकं इति स्त्रीधनं। अन्वाधेयमाह कात्यायनः। विवाहात्परतोय
त्लब्धंभर्तृकुलात्स्त्रिया। अन्वाधेयंतदुक्तंचलब्धंबंधुकुलात्तथा। ऊर्द्ध्वंलब्धंच
यत्किंचित्संस्कारात्प्रीतितःस्त्रिया। भर्तुःपित्रोःसकाशाद्वा। अन्वाधेयंतुतद्भृगुः
।बंधुपदेनमातापित्रोरुपादानंनतेनायमर्थः। भर्तृद्वारेणसंबंधिनांश्वश्रुप्रभृती
नांमातापितृद्वारेणसंबंधिनांमातामहपितामहादीनांचसकाशात्विवाहा
त्परतोयल्लब्धंधनंतदन्वाधेयमितिप्रथमवचनार्थः। विवाहात्परतोभर्तुः
पित्रोर्वासकाशात्यल्लब्धंधनंतदन्वाधेयमितिद्वितीयवचनार्थः। विष्णुवच
नेनचबंधुपदंमातुलाद्यभिप्रायंपित्रादीनांस्वस्वपदेनैवनिर्दिष्टत्वात्। मनु राम·
कात्यायनौ॥ अध्यग्न्यध्यावाहनिकंदत्तंतुप्रीतितःस्त्रियै। मातृभ्रातृपितृप्रा ५१
प्तंषड्विधंस्त्रीधनंस्मृतं। तथानारदः॥ अध्यग्न्यध्यावाहनिकंभर्तृदायस्तथै

वंच। भ्रातृदत्तंपितृभ्यांचषड्विधंस्त्रीधनंस्मृतं। तद्व्याकुरुते कात्यायनः॥ विवा
हकालेयत्स्त्रीभ्योदीयतेह्यग्निसंनिधौ। तदध्यग्निकृतंसद्भिःस्त्रीधनंतुप्रकी
र्तितं। यत्पुनर्लभतेनारीनीयमानाहिपैतृकात्। अध्यावाहनिकंनामतत्स्त्री
धनमुदाहृतं। विवाहकालश्चरद्विप्राद्यग्निप्रसभिवादनोत्तकालः। तत्का
ललब्धमेवधनंयौतुकं। युमिश्रणेइतिधात्वनुसारेणमिश्रताचस्त्रीपुंसयो
रेकशरीरतापत्तायातोविवाहाद्भवतितथाचश्रुतिः। अस्थिभिरस्थीनिमां
सैर्मांसंत्वचात्वचमिति। पैतृकादिति एकशेषेणपितृमातृकुलाल्लभतेय
द्धनंभर्तृगृहंनीयमानात्तदाध्यावाहनिकं। भर्तृदायोभर्तृदत्तधनं। भर्तृदाय
मनभिधायमन्वादिभिर्भर्तृदत्तस्याभिधानात्नारदेनापिभर्तृदत्तमनभि
धायभर्तृदायस्याभिधानात्अन्यत्रापि॥ भर्तृदत्तेभर्तृदायपदप्रयोगोदृष्टः। यथा

Indira Gandhi National
Centre for the Arts

५२ कात्यायनः। भर्तृदायं मृते पत्यौ विन्यसेत् स्त्री यथेष्टतः। विद्यमाने तु संरक्षेत् क्षपयेत् तत्
कुलेऽन्यथा। अस्यार्थः भर्त्रा दत्तधनं भर्तरि मृते यथेष्टं विनियुञ्जीत जीवति तु तद्
क्षेत्। अमुं च हस्ततात्पर्यार्थमाह याज्ञवल्क्यः। पितृमातृपतिभ्रातृदत्तमध्यग्न्यु
पागतं। आधिवेदनिकं चैव स्त्रीधनं परिकीर्त्तितं। यच्च द्वितीयविवाहार्थिना पूर्व
स्त्रियै पारितोषिकं धनं दत्तं तदाधिवेदनिकं अधिकस्त्रीलाभार्थत्वात् तस्यात
था देवलः। वृत्तिराभरणं शुल्कं लाभश्च स्त्रीधनं भवेत्। भोक्त्री तत् स्वयमेवेदं
पतिर्नार्हत्यनापदि। वृत्तिरन्नाच्छादनं। शुल्कमाह कात्यायनः। गृहोपस्करवाह्यानां
दोह्याभरणकर्म्मिणां। मूल्यं लब्धं च यत् किंचित् शुल्कं तत् परिकीर्त्तितं। स्त्रिया राम:
गृहादिकर्म्मिरूपशिल्पिस्व भर्तृद्वारेण गृहादिनिष्पादनादुत्कोचविधायान्ये ५२
भ्यो यल्लब्धं तच्छुल्कं तदेव भर्तृव्यं भर्तृव्यरणार्थत्वात्। उपस्करो मार्जनी शाखावली

वडवादयः। दोह्या धेनवः। लाभो निध्यादिः। तथा व्यासः विवाहकाले यत् किंचित् वरायो
द्दिश्य प्रदीयते। कन्यायास्तद्धनं सर्वमविभाज्यं च बन्धुभिः। उद्दिश्येति कन्याया द्वारं
भवत्विति उद्दिश्य यद्दायदानं न पुनस्तदभिसंधिं विनापीत्यर्थः। अत एव विवा
हकालेऽग्निप्रदक्षिणार्थं न पुनरेतदेव प्रयोजकं दात्रादिसंबन्धिनिमित्तत्वात् स्वत्वस्य
तथा च प्रामाणिकं वचनं। यद्दत्तं दुहितृपत्ये स्त्रियमेव न दद्यात्। मृते जीवति वा प
त्योतरपस्मृते स्त्रियाः। विवाहे इति न विवक्षितं। अभिसंधिस्तु हि तत्त्वया
भिधानादेव लब्धत्वाच्चोक्तः। तदेवमेतैर्वचनैः स्थिते संख्यास्त्रीधनकीर्त्तनात् न षट्सं
ख्या विवक्षिता। किं तु स्त्रीधनकीर्त्तनपराणि मुनिवचनानि। तदेव च स्त्रियाध
नं यत्र भर्तुः स्वातन्त्र्येण दानविक्रयभोगान् कर्तुमधिकारोऽस्ति तदिदं संज्ञि
थ्याह कात्यायनः। शिल्पैस्तु यद्वित्तं प्रीत्या चैव यदन्यतः। भर्तुः स्वाम्यं भवेत्तत्र

५३ शेषं तु स्त्रीधनं स्मृतं। अन्यत् इति पितृमातृभर्तृकुलव्यतिरिक्ताद्यल्लब्धं शिल्पेन
चित्रकर्मसूत्रकर्त्तनादिना यदर्जितं तत्र भर्त्तुः स्वाम्यं स्वातंत्र्यं। अनापद्यपि भ
र्त्ता ग्रहीतुमर्हतीति तेन तदुभयधनस्य स्त्रीस्वामिकत्वेपि न तस्याः स्वातंत्र्य
विषयः। किंतु वचनबलात् भर्त्तुरेव स्वातंत्र्यविषयः। तथा च स्त्रियास्तद्धन
विनियोगे भर्त्रनुमत्यपेक्षेति स्त्रीधनं स्मृतं। स्त्रिया स्वातंत्र्येण यथेष्टविनि
योगार्हं स्मृतं तेन स्त्रिया अपि धनं न स्त्रीधनं अस्वातंत्र्यात्। एतद्दानातिरि
क्तधनं तु स्त्रीधनं स्त्रिया एव दानविक्रयाधिकारात् तदाह कात्यायनः॥ ऊढया
कन्यया वापि भर्त्तुः पितृगृहेथवा। भर्त्तुः सकाशात् पित्रोर्वा लब्धं सौदायिकं धनं राम
।सौदायिकं धनं प्राप्य स्त्रीणां स्वातंत्र्यमिष्यते। यस्मात्तदानृशंस्यार्थं तैर्दत्तं त ५३
त्प्रजीवनं। सौदायिके सदा स्त्रीणां स्वातंत्र्यं परिकीर्त्तितं। विक्रये चैव दाने च यथे

ष्टं स्थावरेष्वपि। सुदायेभ्यः संबंधिभ्यो लब्धं धनं सौदायिकं। आनृशंस्यमनुकम्पा
स्थावरेपि भर्तृदत्तमात्रे स्त्रिया दानाद्यनधिकारः। तदाह नारदः। भर्त्रा प्रीतेन
यद्दत्तं स्त्रियै तस्मिन्मृतेपि तत्। सा यथाकाममश्नीयाद्दद्याद्वा स्थावरा
दृते। तत्र भर्तृदत्तेति विशेषणात् भर्तृदत्तस्थावरादृते अन्यस्थावरं देयमे
व अन्यथा यथेष्टं स्थावरेष्वपीति विरुद्धेत भर्त्रापि यदि दुर्भिक्षादौ स्त्रीधनं वि
नावर्त्तनाक्षमः तदा ग्रहीतुमर्हति नान्यदा यदाह याज्ञवल्क्यः॥ दुर्भिक्षे धर्मका
र्य्ये वा व्याधौ संप्रतिरोधके। गृहीतं स्त्रीधनं भर्त्ता न स्त्रियै दातुमर्हति। संप्रतिरो
धके उत्तमर्णादिना स्वधनप्राप्त्यर्थं कृतस्नानभोजनादिप्रतिबंधे। अन्यत्रापु
नरनधिकारमाह कात्यायनः। न भर्त्ता नैव च सुतो न पिता भ्रातरो न च। आदा
ने वा विसर्गे वा स्त्रीधने प्रभविष्णवः। यदि ह्येकतरोऽमीषां स्त्रीधनं भक्षयेद्बला

Indira Gandhi National
Centre for the Arts

५४ तासवृद्धिं प्रतिदाप्यः स्याद्दंडं चैव समाप्नुयात्। तदेव यद्यनुज्ञाप्य भक्षयेत्प्रीतिपूर्व
कं। मूलमेव स दाप्यः स्याद्यदा सधनवान्भवेत्। अथ चेत्स द्विभार्यः स्यान्न
चतां भजते पुनः। प्रीत्या निसृष्टमपि चेत्प्रतिदाप्यः स तद्बलात्। ग्रासाच्छाद
नवासानामाच्छेदो यत्र योषितः। तत्र स्वमादद्यात्स्त्री विभागं रिक्थिनां तथा
। सवृद्धिमिति वचनाद्गृहीतस्त्रीधनस्योपयोगार्थमिति शेषः। अतो न स्त्रीधनवि
शेषणं तथात्वे सवृद्धौ सैव साधुः स्यादिति मूलमेवं द्रव्यकरेणा वृद्धिव्यवच्छे
दः। स्त्रिया धनं गृहीत्वा यदि अपरभार्यया सह वसति तां चावजानीते गृहीत ·
धनं एतद्बलात् दापयितव्यः। भक्ताच्छादनादिकं यदि भर्त्ता न ददाति तदा नद दाम·
पि स्त्रिया आकृष्य गृहीतव्यं भर्त्तरि मृते तत्प्राप्तियोग्यांशोऽत्र कथ्यतां दैवदा ५४
दीनां शकाद्याहारहीनत्वर्थः। कात्यायनः॥ अपकारक्रियायुक्ता निर्लज्जा चा

थेनाशिनी। व्यभिचाररता या च स्त्रीधनं न च मार्हति॥ इति स्त्रीधनलक्षणं॥ तत्रकु
मारीधने प्रथमं सोदरभ्राता अधिकारी तदभावे माता तदभावे पिता। अत्र कथंमृ
तायाः कन्याया गृह्णीयुः सोदराः समं। तदभावे भवेन्मातुस्तदभावे भवेत्पितुरि
तिनारदीयादेतच्च कन्याया वरदत्तानि रिक्तविषयं वरदत्तधने तु वरोऽधि
कारी। स्वं च शुल्कं वरो गृह्णीयात् इति पैठीनसिवचनात्। अथागच्छेत्समूढा
यां दत्तं पूर्ववरो हरेत्। मृतायां पुनरादद्यात्परिशोध्योभयव्ययमिति नार
दीयाच्च। यौतुकातिरिक्तस्त्रीधने विवाहपूर्वापरकालपितृदत्तानि रिक्ते स्त्री
धने च पुत्रकन्ययोस्तुल्याधिकारः। सामान्यं पुत्रकन्यानां मृतायां स्त्रीधनं स्त्रि
यां। अप्रजायां हरेत् भर्त्ता माता भ्राता पिता पि वेति देवलीयपूर्वार्द्धात्। जन
न्यां संस्थितायां तु समं सर्वे सहोदराः। भजेरन्मातृकं रिक्थं भगिन्यश्च सनाभयः

Indira Gandhi National
Centre for the Arts

५५ इतिवाररत्नाकरकारधृतमनुवचनाच्च।सामान्यंसाधारणंसमंज्येष्ठाद्वारभूत्वी
भगिन्योअत्राप्रत्ताविवक्षिताः॥तथाचबृहस्पतिः॥स्त्रीधनंस्यादपत्यानांदुहि
ताचतदंशिनी।अप्रत्ताचेत्समूढातुलभतेमानमात्रकं।अपत्यानांपुत्राणांत
दंशिनीसमांशिनीसमूढायैमानानुसारेणकिंचिद्देयंइतिचंडेश्वरः॥जीमू
तवाहनेनतुचतुर्थपादेनलभेन्मात्रकंधनमितिपठितं।सनाभयःसहोदराः
।एतयोरन्यतराभावेअन्यतरस्यैकतरभावेचोढायास्तत्रपुत्रवत्याःसम्भावित
पुत्रायाश्चतुल्याधिकारःस्वपुत्रद्वारेणपार्वणेतो।सपिंडीकरणादूर्द्ध्वंयतपित
भ्यःप्रदीयते।सर्वेषांग्रहणमातातूनिधर्मेषुलिप्सयःइतिशातातपोक्तंतद्भोग्य राम
पतिपिंडदानसंभवात्तथाचनारदः।पुत्राभावेतुदुहितातुल्यसंतानदर्शनादिति ५५
।तयोरन्यतराभावेअन्यतरस्यातदभावेपौत्रःतदभावेदौहित्रःपार्वणेतद्भोग्यप

तिपिंडदातृत्वात्।दौहित्रोपिह्यमुत्रैनंसंतारयतिपौत्रवत्।इतिमनुवचनेदौहि
त्रेपौत्रधर्मातिदेशात्।पुत्रेणापरिणीतदुहितुर्बाधात्।बाधकपुत्रेणबाध्य
दुहितृपुत्रबाधस्यन्याय्यत्वाच्च।तदभावेप्रपौत्रः।तदभावेसपत्नीपुत्रःतदभावे
सपत्नीपौत्रः।तदभावेसपत्नीप्रपौत्रः।एतेषांतद्भोग्यपतिपिंडदातृत्वात्।ततो
वंध्याविधवाचतुल्यवदधिकारिण्यौ।एषांतयोरपितत्प्रजात्वात्प्रजासामान्या
भावएवभर्तुरधिकारात्।अप्रजस्त्रीधनंभर्तुर्ब्राह्म्यादिषुचतुर्ष्वपीतिमनूक्तेः
एतयोरेकतराभावेचान्यतरस्याःतदभावेब्राह्म्यादिविवाहपंचकविवाहिता
याधनेयौतुकवत्भर्तृमातृभ्रातृपितृणांक्रमशोऽधिकारः।आसुरादित्रिक
लब्धंतुपंचयौतुकवत्तयोरभावेमातातदभावेपितातदभावेभर्त्तीएतदप
थ्यंताभावेव्यवस्थावक्ष्यते।विवाहकालेतत्पूर्वपरकालेवास्त्रियैयद्दत्तंपित्रार

Indira Gandhi National
Centre for the Arts

५६ त्तं तद्धने प्रथमं कुमार्य्यास्तदनंतरं तूढायाः पुत्रवती संभावितपुत्रयोस्तदनं
तरं च वंध्याविधवयोः सर्वदुहितृभावे पुत्रादेर्यौतुकधनां तत्स्वत्वक्रमेणाधि
कारः। स्त्रियास्तु यद्भवेद्वित्तं पित्रा दत्तं कथंचन। ब्राह्मणी तद्धरेत्कन्या तदप
त्यस्य वा भवेत्। इति मनुवचनात्। अत्र पित्रा दत्तमिति विशेषणात्विवाह
समयादन्यत्रापि यत्पित्रा दत्तं तत्र प्रथमं कन्यायास्तदनंतरं तदपत्यस्य पु
त्रस्य सर्वः ब्राह्मणीपदं चानुवाद इति दायभागः। यौतुकधने तु सत्यपि पुत्रे दु
हितरोऽधिकारिण्यः। तत्र प्रथमं अवाग्दत्तानदभावे वाग्दत्तानदभावे चो
ढा तत्र पुत्रवत्याः संभावितपुत्रायाश्च युगपदधिकारः मातुः पारिणाय्यं स्त्रि दाय·
यो विभजेरन्निति वसिष्ठोक्तेः। मातुश्च यौतुकं यत्स्यात् कुमारीभाग एव सः। ५६
इति मनूक्तेः स्त्रीधनं दुहितॄणामप्रत्तानामप्रतिष्ठितानां च इति गौतमीयात् पा

रिनाय्यं परिनयनकाललब्धं परिनयनकालश्च विवाहपूर्वापरीभूतकालः स
च हरिद्राहारंभकालप्रभृति प्रसभिवादनांत इति स्मार्त्ताः। पारिनाय्यं परिछद
आदर्शकंकनादीनि रत्नाकरः। अप्रत्तानां अवाग्दत्तानां अप्रतिष्ठितानां वाग्द
त्तानामीप्सार्थेन च चकारात् समूढानां च दुहितॄणामिति सामान्यतः सर्वदु
हितॄणामधिकारप्राप्तौ अप्रत्तानामित्यादेः क्रमार्थत्वेनैव सार्थक्यं तेन अवा
ग्दत्तासमूढानां क्रमेणाधिकार इत्यर्थः। तयोरभावे वंध्याविधवयोस्तत्याधि
कारः तयोरपि तत्प्रजातात्। अत्र कुमारी वाग्दत्ता वाजाताधिकारानंतरं प
रिणीता सती पश्चात् वंध्यात्वेनावधृता पुत्रमनुत्पाद्यैव मृता तदा तत्स्वाम
तायां तत्संक्रांतमातृधने तद्भगिन्योः पुत्रवतीसंभावितपुत्रयोरभावे वंध्या
विधवयोरप्यधिकारः न तु तद्भर्त्तुः भर्त्रधिकारस्य स्त्रीधनमात्रविषयत्वात्

Indira Gandhi National Centre for the Arts

५७ अस्य च संक्रान्तधनत्वेन स्त्रीधनत्वाभावादिति बोध्यं। तदभावे पुत्रः। मातुर्दुहित
रः शेषमृणात्ताभ्य ऋतेऽन्वयः इति याज्ञवल्क्यवचनात् ऋणात् शेषमवशिष्टं
ताभ्यो दुहितृभ्य ऋते विना तदन्वयः पुत्रः पुत्राभावे दौहित्रः ननु पौत्रः पुत्रवद
धिकायाः पुत्रेणाबाध्य पुत्रपुत्रबाधस्यान्याय्यत्वात् दौहित्राभावे पौत्रः तदभावे
प्रपौत्रः उपकारकत्वात् तस्मात् तदभावे सपत्नीपुत्रः। मातुः स्वसा मातुलानी पि
तृव्यस्त्री पितुः स्वसा। श्वश्रूः पूर्वजपत्नी च मातृतुल्याः प्रकीर्तिताः। यदासामौ
रसो न स्यात् सुतो दौहित्र एव वा। तत्सुतो वा धनं तासां स्वस्रीयाद्याः समाप्नु राम
युः। इति बृहस्पतिना सुतपदेन सपत्नीपुत्रस्याधिकारप्रतिपादनात् अन्यथा ५७
सुतपदस्यौरसविशेषणत्वेन वैयर्थ्यात् सपत्नीपुत्रसत्वे दौहित्रादेरधिकाराप
त्तेश्च तदभावे सपत्नीपौत्रः तदभावे सपत्नीप्रपौत्रः तयोः स्वभोग्यस्वभर्तृपिंडदा

त्वात्। एतत्पर्यंतमभावः। ब्राह्मादिविवाहपंचकलब्धयौतकधने भर्ता अधिकारी। ब्रा
ह्मदैवार्षगांधर्वप्राजापत्येषु यद्धनं। अप्रजायामतीतायां भर्तुरेव तदिष्यते इति
मनुवचनात्। ब्राह्मादिविवाहमाह याज्ञवल्क्यः। ब्राह्मो विवाह आहूय दीयते शक्त्य
लंकृता। यज्ञस्थायर्त्विजे दैव आदायार्षस्तु गोयुगं। इत्युक्त्वा चरतां धर्मं सह या दी
यतेऽर्थिने। स कायः पावयेत्तज्जः षड्वंश्यान् सहात्मना। आसुरो द्रविणादानाद्गां
धर्वः समयान्मिथः। राक्षसो युद्धहरणात् पैशाचः कन्यकाछलात्। भर्तुरभावे भ्रा
तुः। बंधुदत्तं तथा शुल्कमन्वाधेयकमेव च। अप्रजायामतीतायां बांधवास्तदवा
प्नुयुः। इति याज्ञवल्क्यवचनाच्च। अत्र बंधुपदेन मातापित्रोरुपादानात् अतए
व भ्रातरो बांधवाः। पितृभ्यां चैव यद्दत्तं दुहितुः स्थावरं धनं। अप्रजायामतीतायां
भ्रातृगामी तच्च सर्वदा। इति कात्यायनैकवाक्यत्वात् अत एव स्थावरग्रहणाद्दंडा

Indira Gandhi National
Centre for the Arts

५८ पूर्वन्यायेनापरधनस्यापिलाभइतिश्रीकृष्णतर्कालंकारः।सर्वेषापरेनब्राह्माद्यष्ट
विवाहपरिग्रहः।तदभावेमाताअधिकारिणी।तदभावेपिता।भगिनीशुल्कंसो
दर्याणांतुर्द्धंमातुःपितुःततःपूर्वंचैकेइतिकात्यायनवचनात्।अस्यार्थःभगिनीशु
ल्कंप्रथमंसोदर्याणांतेषामभावेमातुःतदभावेपितुःपूर्वंचकेदानपरमतंस
पत्नीप्रपौत्रपर्यंताभावेआसुरादिसपैशाचविवाहत्रिकलब्धंतुस्त्रीधनंजीव
त्यपिभर्तरिमातामहीयात्।तदभावेपिता।।यद्यस्याःस्याद्धनंदत्तंविवाहेष्वासु
रादिषु।अतीतायामप्रजायांमातापित्रोस्तदिष्यते।इतिवचनात्क्रमावगतेः राम
युगपदधिकारेपित्रोरितिसाभिरध्यात्।कन्याधनेचमातुरभावेपितुरधिकार ५८
श्रवणात्।अत्रापितथात्वस्ययुक्तत्वात्।पित्रभावेभ्रातुरधिकारः।एषांपुनरभा
वेतद्धनंभर्तुः।यथाकात्यायनः।बंधुदत्तंचबंधूनामभावेभर्तृगामितद्बंधुमीनाप

ताबंधूनामभावेइत्यनेनभ्रातुरभावइत्यपिसूचितं।ततोब्राह्मादिविवाहपंचक
लब्धयौतुकधनेषुपितृपर्यंताभावेआसुरादिविवाहत्रिकलब्धयौतकेषुभर्तृप
र्यंताभावेऽन्येषुसत्सुसर्वेष्विदमुच्यते।।तत्रबृहस्पतिः।।मातुःस्वसामातुलानी
पितृव्यस्त्रीपितृष्वसा।श्वश्रूःपूर्वजपत्नीचमातृतुल्याःप्रकीर्तिताः।यदासामौरसो
नस्यात्सुतोदौहित्रएववा।तत्सुतोवाधनंतासांस्वस्रीयाद्याःसमाप्नुयुः।औरस
पदंकन्यापुत्रोभयपरंसुतइतिसपत्नीपुत्रपरंतेनौरसविशेषणवैयर्थ्यात्स
पत्नीपुत्रसत्वभावेस्वस्रीयाद्यधिकारापत्तेश्च।तत्सुतइतिपौत्रसपत्नीपौत्रप
रंतुकन्यादौहित्रोभयपरमपिकन्यापुत्रस्यदौहित्रपदेनैवोपपत्तिलाद्दौहि
त्रसुतस्यचस्वभोग्यभर्तृपिंडदानानधिकारात्वाप्रज्ञात्प्रपौत्रसपत्नीप्रपौत्र
योःसमुच्चयः।अत्रपिंडदानविशेषतोवभगिनीसुतादीनांवक्ष्यमाणाधिकारक्रमः

Indira Gandhi National
Centre for the Arts

५६ प्रसेतव्यः पाठक्रमादर्थक्रमस्य बलवत्त्वात् अन्यथा सर्वशेषे देवरादेरधिकारे सर्व
जनविरोधः स्यात् तत्र प्रथमं देवरः तत्सपिंडतत्भर्तृदेयपुरुषत्रयपिंडदातृत्वा
त्सपिंडत्वाच्च ज्येष्ठभ्रातृस्त्रीधनेऽधिकारी तदभावे देवरभ्रातृश्वशुरसुतो नु
स्याधिकारित्वात् तत्पिंडतदूर्ध्वदेयपुरुषद्वयपिंडदातृत्वात् सपिंडत्वाच्च तदभा
वे स्वभगिनीपुत्रः। तत्पिंडतत्पुत्रदेयतत्पित्रादिपुरुषत्रयपिंडदातृत्वात्त
दभावे भर्तृभागिनेयः। पुत्रात् भर्तुर्दुर्बलत्वेन तत्स्थानपातिनोरपि भगिनीपु
त्रभर्तृभागिनेययोस्तथैव बलाबलस्य न्याय्यत्वात् तत भर्तृदेयपुरुषत्रयपिंड
दातृत्वात् तत्पिंडदानात् तत्भर्तृपिंडदानाच्च तदभावे स्वभ्रातृपुत्रः। तत्पिंडतत् धम· ५६
पुत्रदेयपित्रादिपिंडद्वयदातृत्वात् तदभावे स्वजामाता श्वश्रुरयोः पिंडदानात्।
एषां यस्यापुनरभावे श्वश्रुरभ्रातृश्वश्रुरादेः सपिंडानां यथाक्रमेणाधिकारः।

तदभावे अधस्तनसकुल्यानामधिकारः। तदभावे तु ऊर्ध्वतनसकुल्यानामधिकारः।
तदभावे समानप्रवराः। तदभावे सगोत्राः। तदभावे समानप्रवराः। तदभावे
। तदभावे समानोदकाः। तदभावे सगोत्राः। क्षत्रियादिधने तु राजस्वाधिका
ब्राह्मणीधने स्वग्रामस्थो ब्राह्मणोऽधिकारः। क्षत्रियादिधने तु राजस्वाधिका
रः॥ इति स्त्रीधनाधिकारिणः॥ अथ विभागानधिकारिणः कथ्यन्ते॥ तत्प
क्लीबपतितजन्मान्धजन्मबधिरोन्मत्तजडमू
र्कपुहासेपनाधिकारस्थापनार्थं। क्लीबपतितजन्मान्धजन्मबधिरोन्मत्तजडमू
कनिरिंद्रियपितृद्विट्पंडोपपातिकापात्रीकृतविकर्मस्थपतितपतितपुत्रा
चिकित्स्यरोगार्त्तकुष्ठिभ्रातृद्रोह्यादिरहिततपोविज्ञानवर्जिताचारहीन
लिंगिप्रव्रजितान्यायोपार्जितवित्तकपंचकमोढासुतसगोत्रनियोगोत्पन्नाप
तेनाधिकारिणः। अतिपतितक्लीबकुष्ठ्युन्मत्तजडांधकाः। पतिताः पतितापसं
लिंगीदायांशभागिनः। एषां पतितवर्ज्येभ्यो भक्तवस्त्रं प्रदीयते। तत्सुतापितृदा

६० यांशाल्लभेरन् दोषवर्जिताः॥ इति देवलीयात्॥ पितृद्विट्पतितः षंढो यश्च स्यादौ
पपातिकः। औरसा अपि नैतेंऽशं लभेरन् क्षेत्रजाः कुत इति नारदीयात्॥ अनं
शौ क्लीबपतितौ जात्यंधबधिरौ तथा। उन्मत्तजडमूकाश्च ये च केचिन्निरिंद्रि
याः इति मानवीयात्॥ शास्त्रशौर्यादिरहितस्तपोदानविवर्जितः। आचारही
नः पुत्रस्तु मूत्रोच्चारसमस्तु सः। इति कात्यायनीयात्। सर्वे एव विकर्मस्था ना
र्हन्ति भ्रातरो धनमिति याज्ञवल्कीयात्। पतितस्तत्सुतः क्लीबः पंगुरुन्मत्तको ज
डः। अंधोऽचिकित्स्यरोगार्त्ता भर्त्तव्यास्ते निरंशकाः। इति मनुवचनात्। सर्वे हि धर्म राम·
युक्ता भागिनो भवंति। यस्त्वधर्म्मेणाद्यं प्रतिपादयति ज्येष्ठोऽपि तमभागं कु ६०
र्वीत इत्यापस्तंबवचनात्। अक्रमोढासुतश्चैव सगोत्राद्यश्च जायते। प्रव्रज्या
वसिताश्चैव न रिक्थं तेषु कर्हिचित्। इति कात्यायनीयाच्च। क्लीबः कात्यायनेना

भिहितो यथा। न मूत्रं फेनिलं यस्य विष्ठा चाप्सु निमज्जति। मेढ्रं चोन्मादशुक्राभ्यां ही
नं क्लीबः स उच्यते। जडो हिताहितावधारणाक्षमः। इति मिश्राः॥ धर्मकार्य्यनिरु
त्साह इति स्मार्त्ताः। लिंगी कपटव्रतधारी पितृद्विट् पितरि जीवति तत्ताडनादिकृत्
मृते न श्राद्धादिविमुखः। वर्णानुच्चारको मूकः। निरिंद्रियः पाण्यादिविकलः।
षंढो नपुंसकविशेषः। अपपात्रितः राजवधादिदोषेण बांधवैर्भिन्नोदकीकृ
तः। औपपातक इति इति पठित्वा नानाउपपातकयुक्त इति स्मार्त्ताः॥ जात्यंधब
धिरौ स्वभावतो न त्वागंतुकहेतो रंधबधिरौ जन्मावध्यंधबधिरौ वा इत्यर्थः। विक
र्मस्थः श्रुतिस्मृतिनिषिद्धकर्मा सततकारी पद्भ्यां न गच्छतीति पंगुरिति श्री
कृष्णतर्कालंकाराः। पदा न गच्छतीति दायभागः॥ अक्रमोढासुतः हीनवर्णापरि
णयनानंतरं उत्तमवर्णास्त्रीपरिणयने द्वयोरपि अक्रमोढात्वं तयोः पुत्रः। स

Indira Gandhi National
Centre for the Arts

६१ गोत्रान्नियोगेनोत्पन्नः। अक्रमोढायामपि सवर्णायां परिणीतायामुत्पादितः पुत्रो धनाधिका
री। अक्रमोढायामप्यसवर्णाजातोपि न दायहरः कात्यायनः। अक्रमोढासुतस्त्वृक्थी
सवर्णश्च यदा पितुः। असवर्णः प्रसूतस्तु क्रमोढायामपि यो भवेत्। गतिलोमप्रसू
तायास्तस्याः पुत्रो न सक्थभाक्। सोपि सवर्णोप्यनधिकारी। एतेषां मध्ये पतितभि
न्नाग्रासाच्छादनैर्भर्तव्याः। तदाह बौधायनः॥ अतीतव्यवहारान्ग्रासाच्छादनैर्बिभृयु
रंधजडक्लीबव्यसनिव्याधितादींश्चाकर्मिणः। पतिततज्जातवर्जं तत्पुत्राः पाभि
त्साहिरोषरहिताश्चेदधिकारिणः। कन्याश्च विवाहपर्यंतं भर्तव्याः। अपुत्रायो
षितश्च साधुवृत्तयो भर्तव्याः। व्यभिचारिण्यः पतिप्रतिकूलाश्च निर्वास्याः। यथा राम·
अपुत्रा योषितश्चैषां भर्तव्याः साधुवृत्तयः। निर्वास्या व्यभिचारिण्यः प्रतिकूला ६१
स्तथैव च। सुताश्चैषां प्रभर्तव्या यावद्वै भर्तृसात्कृताः। ततस्ताः पतिसादि

दोषरहिताश्चेदधिकारिणः॥ अविभाज्यविभाज्यं चोच्यते॥ तत्र च पितृपितामहो
पार्जितं साधारणसंबंधेन साधारणव्यापारेण साधारणधनोपघातेनार्जितं
च विभाज्यं यथा कात्यायनः॥ पैतामहं च पित्र्यं च यत्किंचित्स्वयमर्जितं। दाया
दानां विभागे तु सर्वमेतद्विभज्यते॥ स्वयमर्जितमसाधारणप्रयोजकत्वव्यति
रेकेणेति चंडेश्वरः॥ तेन साधारणधनोपघातादिनार्जितार्जकस्य भागद्वयं
इतरेषामेकैकांशित्वं। साधारणं समाश्रित्य यत्किंचिद्वाहनायुधं। शौर्यादिना
प्नोति धनं भ्रातरस्तत्र भागिनः। तस्य भागद्वयं प्रोक्तं शेषास्तु समभागिनः। इति
व्यासवचनात्। अत्र भ्रातर इत्युपलक्षणं पितृव्यादयोपि बोद्धव्याः। तस्यार्जक
स्य न साधारणधनयुक्तं चेत्तदा अर्जकस्यैव द्वारेण प्राप्तिरायासेन चानर्जकानां तु के
वलसाधारणधनद्वारेणार्जितत्वात्। एवं यत्रैकेन प्राप्तिर्व्यापारमात्रेणापरेण



Indira Gandhi National
Centre for the Arts

६२ चासाधारणधनशरीरायासाभ्यांअर्जितंधनंतत्रशरीरायासमात्रेणार्जकस्यएकां
शित्वंधनशरीरायासाभ्यामर्जकस्यद्व्यंशित्वंन्यायसाम्यातइतिश्रीकरमतकीर्त्तं
काः॥साधारणधनोपघातेविषयस्यावतोऽंशस्याल्पस्यमहतोवाउपघातस्त
दनुसारेणभागकल्पनाकार्येतिजीमूतवाहनादयःप्राहुः।अनुपघातार्जितम
र्जकस्यैवनेतरेषां।तत्रापिविद्यालब्धधनेविशेषंवक्ष्यमाणवचनपटलात्।वि
द्यालब्धधनेअनुपघातार्जितेपिसमविद्याधिकविद्ययोरेकांशः।न्यूनविद्यावि
द्ययोर्नांशः।नाविद्यानांतुवैद्येनदेयंविद्याधनंक्वचित्।समविद्याधिकानांतुदेयंवै एम·
द्येनतद्धनमितिकात्यायनीयात्।मध्यपठितविद्यापदमुभाभ्यांसंबध्यते।काकाक्षि ६२
न्यायात्तेनसमविद्याधिकविद्यानामित्यर्थः।अत्रापिविशेषःपितृपितामहपि
तृव्यभ्रात्रादिभ्यःप्राप्तविद्यानांविद्यालब्धधनेन्यूनविद्याविद्ययोरप्येकांशः।

यथाकात्यायनः॥कुलेविनीतविद्यानांभ्रातॄणांपितृतोपिवा।शौर्यप्राप्तंचयद्वि
त्तंतद्विभाज्यंबृहस्पतिः।अपिवाशब्दाभ्यांपितामहपितृव्यादयःसमुच्चिताः
शौर्यप्राप्तंसाधारणधनोपघातेनशौर्यार्जितंधनंसाधारणधनोपघातार्जित
धनस्यविभाज्यतायाउक्तत्वात्।विद्यामभ्यस्यतोभ्रातुःकुटुम्बंयदिपरोभ्रा
तास्वसाधारणधनशरीरायासाभ्यांसंवर्द्धयतितदातद्विद्यार्जितधनेनस्य
सर्वस्यैवैकांशः।कुटुम्बंबिभृयाद्भ्रातुर्योविद्यामधिगच्छतः।भागंविद्या
धनात्तस्मात्सलभेताश्रुतोऽपिसन्नितिकात्यायनीयात्।अश्रुतोमूर्खः।तत्रवि
द्याधनमाहकात्यायनः।उपन्यस्तेतुयल्लब्धंविद्ययापणपूर्वकं।विद्याधनंतुतद्वि
द्याद्विभागेनयुज्यते।शिष्यादार्त्विज्यतःप्रश्नात्संदिग्धप्रश्ननिर्णयात्।स्वज्ञा
नशंसनाद्वादाल्लब्धंप्राध्ययनाच्चयत्।विद्याधनंतुतत्प्राहुर्विभागेनचयुज्यते।

Indira Gandhi National
Centre for the Arts

६३ शिल्पेष्वपि च धर्मोऽयं मूल्याद्यच्चाधिकं भवेत्। परं निरस्य यल्लब्धं विद्यापणपूर्व
कं। विद्याधनं तु तद्विद्यान्न विभाज्यं बृहस्पतिः॥ एतेषामर्थः यदि भवान् भद्र
कमुपन्यस्यति तदा भवते एतावद्धनं दातव्यमिति पणितं तदुपन्यासेन प
तपणितं लब्धं धनं तन्न विभाज्यं। तथा। शिष्याद्ध्यापितात् ऋत्विक्कर्मकरणे
न यजमानाद्दक्षिणादिरूपं धनं लब्धं यत् यत्किंचित् विद्यायाः प्रश्ने कृते त
त्र सम्यगुत्तरेण परितोषाद् अपणितमेव किंचिद्धनं ददाति। तथा सन्दिग्धप्रश्न
निर्णयात् संदिग्धार्थस्य निश्चयार्थं प्रश्ने कृते तन्निर्णयजननाद्योऽस्मिन्
प्रश्ने मम संशयमपनयति। तस्मै सुवर्णादिकं दास्यामीत्युक्ते तस्य संशयमप राम
नीय यल्लब्धं। अथवा वादिनोः कुत्रचिद्व्यवहारविषये संदेहे न्यायकरणार्थमागतयोः ६३
सम्यग्निरूपणेन यल्लब्धं तथा स्वज्ञानप्रशंसनात् शास्त्रादिषु स्वज्ञानं प्रकाश्य प्र

निग्रहादिना यल्लब्धं। तथा वादाद्वादविचारे परं निर्जित्य यल्लब्धं एकस्मिन्देयवस्तु
नि बहूनां ब्राह्मणानां समुत्थाने प्रकृष्टवेदमधीत्य यल्लब्धं तथा शिल्पविद्यया चित्रक
र सुवर्णकारादिभिर्यल्लब्धं सर्वेषां तत्तद्द्रव्यविक्रयानुमतौ तदानीं तन्नोचितमस्या
तत्स्वयोग्यं तथा यदधिकं लब्धं तथा द्यूतेनापि परं निर्जित्य यल्लब्धं तत्सर्वं विद्याध
नमविभाज्यमितरैः सहेति। अत्रापि विशेषमाह कात्यायनः॥ परभक्तोपयोगेन
विद्या प्राप्तान्यतस्तु या। तया लब्धं धनं यत्तु विद्यालब्धं तदुच्यते। अन्यतः पितृ
व्यतिरिक्ततः प्राप्तया कयाचिद्विद्यया साधारणधनोपघातमन्तरेण यदर्जि
तं तत्सम विद्याधिकविषय एव विभाज्यं न तु न्यूनविद्यादिभिरिति स्थितं। पितृद्रव्यो
पघातेन पुत्रार्जितधनस्य पितुर्द्वौ अंशौ। अर्जकस्य भागद्वयं इतरेषामेकैकांशः संस्या
दाणानुपघाते तु पितुरंशद्वयं अर्जकस्यापि तावदेव इतरेषामनंशित्वं। पितुर्गुणा

Indira Gandhi National
Centre for the Arts

६५ वत्सागुणावत्साभ्यां अर्द्धं हरेद्यंशिनोस्तु निरायभागः। द्व्यंशहरोऽर्द्धहरो वा पुत्रवित्तार्जना
त्पिता। इति कात्यायनीयात्। यच्च स्वप्रयोजनार्हं पुस्तकादि तेन तु द्रव्यांतरसहेतन्म
स्त्र्यादिभिः सह न विभजनीयं। गोप्रचारश्च रथ्या च वस्त्रं यच्चांगयोजितं। प्रायोज्यं
न विभज्येत शिल्पार्थं च बृहस्पतिः। इति कात्यायनवचनात्तन्मात्रद्रव्ये तु अंशानुसा
रेण न तद्द्रव्यस्य मूल्यं ग्राह्यं शौर्य्यधनं भार्य्याधनं प्रसादलब्धधनं साधारणधनो
पघातं विनार्जितमेव माहीनि अविभाज्यानि। शौर्य्यभार्य्याधने चोभे यच्च विद्याध
नं भवेत्। त्रीण्येतान्यविभाज्यानि प्रसादो यश्च पैतृकः इति नारदीयात्। न वास्त्रवि
भागो नार्हकपात्रालंकाराः उपयुक्तस्त्रीवाससामपं प्रचारार्थानां विभागस्त्विति शं राम·
खलिखितवचनात्। वस्त्रं पत्रमलंकारः कृतान्नमुदकं स्त्रियः। योगक्षेमप्रचारश्च ६५
न विभाज्यं प्रचक्षते इति मनुवचनात्॥ अनुपघ्नन् पितृद्रव्यं श्रमेण यदुपार्जितं।

स्वयमीहितलब्धं तन्नाकामो दातुमर्हतीति वचनाच्च शौर्य्यधनं युद्धे जयादिना लब्धं स्वामि
प्रसादलब्धं च भार्य्याधनं भार्य्याप्राप्तिकाले श्वशुरादितो लब्धं पित्रादिभिः प्रसन्नत
या दत्तं। प्रायोज्यं यच्च स्वप्रयोजनार्हं यथा पुस्तकादि न सर्वैर्विभजनीयं तत्पंडिता
नामेव किंतु यत्र तन्मात्रं धनमस्ति तत्र स्वांशयोग्यमल्पं पंडितान्न ग्राह्यं अन्य
थाद्वृत्तिलोपापत्तेः। वैजाता येष्वजाता वा वृत्तिविरोधेन दृष्टापत्तेर्योगात्। तथा
शिल्पोपयुक्तं शिल्पिनामेव नाशिल्पिनां पितापि जीवति यस्मिन् वासो येन गृहे
घानादिकं कृतं तत्तस्यैव पितुरप्रतिबंधेनानुमतत्वात्। एतच्च। पदेशावास्तंतरे
तथाकरणीयोध्यं। उपयुक्तं भोजनपात्रादि स्त्रियो दास्यो व्यतिरिक्ता भोग्या स्त्रियः
वस्त्रं अंगयोजितं पंक्तिपादिच्छादार्थं च पत्रं वाहनमश्वादि कृतान्नं पक्वादि इति रत्ना
करः तंडुलादि इति पारिजातः उदकं कूपवाप्यादिगतं पित्रादिसंबंधिजलं नान्यधन

Indira Gandhi National
Centre for the Arts

६५ वद्विभाज्यं किंतु स्वस्वव्यापारानुसारेणाग्रहीतव्यं यथा मनुः। उद्धृत्य कूप वाप्यम्भस्त्व
नुसारेणाग्रहाते। योगक्षेमप्रचाराः स्वस्वव्यापारोपयुक्तप्रायनासनभोजनपात्रा
दिः। तथा व्यासः। अविभाज्यं सगोत्राणामासहस्रकुलादपि। याज्यं क्षेत्रं च पत्रं च कृ
तान्नमुदकं स्त्रियः। याज्यं यागस्थानं देवप्रतिमा वा तथा पितामहमपिद्रव्यं भूमि
व्यतिरिक्तं यच्चिरविनष्टं अलमहानात्। अथवा प्रतीकारपरांमुखेन तयादूतरेण प्राप्त
कृतं पित्रा चासाधारणं धनप्राप्तिरासाम्यात्प्रतिकृतं ततः पितुरेव न साधारणा। पि
तृकं तु पिता द्रव्यमनवाप्तं यदाप्नुयात्। न तत्पुत्रैर्भजेत्सार्द्धमकामः स्वयमर्जितमिति राम·
मनुवचनात्। क्रमादभ्यागतं द्रव्यं हृतमप्युद्धरेत्तु यः। दायादेभ्यो न तद्दद्याद्विद्यया ६५
लब्धमेव चेति याज्ञवल्कीयात्। भूमौ विशेषयति प्रोक्तः। पूर्वेनष्टां च यो भूमिमेक ए
वोद्धरेत्श्रमात्। यथाभागं भजंत्यन्ये दत्वांशं तु तुरीयकं। पूर्वेनष्टायां भूमेर्हायाद्दानुम

तावपि तदुद्धर्ता स्वयं तुरीयांशं गृहीत्वा दायादैः सह यथाभागं गृह्णीयादित्यर्थः॥ अथ
पितृकृतविभागो निरूप्यते॥ पितुः स्वार्जितधने पितुरिच्छैव नियामिका। पिता
चेत्पुत्रान्विभजेत्तस्य स्वेच्छा स्वयमुपात्तेऽर्थे पैतामहे तु पितापुत्रयोस्तुल्यं स्वा
म्यमिति विष्णुवचनात्। अस्यार्थः पितुः स्वार्जिते यावदेव गृहीतुमिच्छति। अर्ह
भागद्वयं त्रयं वा ततः सर्वं तत्पश्चात्त्वनुमतेन तु पैतामहे॥ तथा च हारीतः॥ जी
वन्नेव वा प्रविभज्य वनमाश्रयेत्। वृद्धाश्रमं वा गच्छेत् स्वल्पेन वा संविभज्य भूयि
ष्ठमादाय वसेत्। यद्युपद्रस्येत्पुनस्तेभ्यो गृह्णीयात्। अनेन स्वल्पस्य विभागो
भूयिष्ठद्रव्यग्रहणं च पितुरभिहितं वृद्धाश्रमः। प्रव्रज्या यदि कल्पेचित्ते पितोभ
कृत्वा बहुपोष्यत्वान्महत्त्वगुणवत्तया अधिकं भागं ददाति तदा सोऽपि अंशेभ्य
स्त्वार्थः। पित्रैव तु विभक्ता ये समन्यूनाधिकैर्धनैः। तेषां स एव धर्म्यः स्यात्सर्वस्य हि

Indira Gandhi National
Centre for the Arts

६६ पिताप्रभुरितिनारदीयात्।जीवद्विभागेतुपितानैकपुत्रंविशेषयेत्।निर्भाजयेन्न
चैवैकमकस्मात्कारणंविना।इतिकात्यायनीयाच्च।प्रभुःस्वेच्छयायथेष्टविनियोग
हेत्वेनैवतद्वचनंस्वार्जितविषयंपितामहधनेतुनियतप्रभुत्वाऽसंभवात्।कार
णंविनेतिएकस्यापिपुत्रस्यकारणंविनाविशेषोनकार्य्यःकारणवशात्तुका
र्य्यएवएकस्यापीत्यपगतेऽर्थेऽद्वारापेक्षोयंविशेषःकिंतुपितुरिच्छाकृतएवेति
न्यायभागः।भक्तत्वाद्यस्ततमनिमित्तंविनानुव्याध्याकुलचित्ततयाकस्मैचित्पु
त्रायक्रोधेनस्नेहभगापुत्रत्वेनवान्यूनाधिकदानेपितुर्नप्रभुत्वं।व्याधितःकुपित
श्चैवविषयासक्तमानसः।अयथाशास्त्रकारीतुनविभागेपिताप्रभुरितिनार दाम·
दीयात्।विषयासक्तत्वंस्नेहभगापुत्रत्वादिनात्वज्ञकारणात्सत्वेपिएकदाभ्रातृत्वांवि ६६
भागीधर्मेन्यूनाधिकदानेपितुर्नप्रभुत्वं।भ्रातृणामविभक्तानांयद्युत्थानंभवेत्सह।

नतत्रभागंविषमंपितादद्यात्कथंचनइतिमनुवचनात्।यत्रपैतामहमन्यैर्हृतं
पित्रोद्धृतंतदकामस्तेनविभजनीयं।तथामनुविष्णू॥पैतृकंतुपिताद्रव्यमनवाप्तंय
दाप्नुयात्।नतत्पुत्रैर्भजेत्सार्द्धमकामःस्वयमर्जितं।तत्स्वयमर्जितमितिकृत्वाका
मोनविभजेदित्यन्वयः।एतत्तुस्थावरविषयंमण्यादौपितुरेवस्वाछन्द्यात्॥अ
थपितृकृतपैतामहधनविभागः॥तत्रमातर्य्यजोनिवृत्तिसहकृतातदिच्छानिया
मिकातूर्द्ध्वंपितुःपुत्राऋक्थंभजेरन्मातुर्निवृत्तेरजसिजीवतिचेच्छतिइतिगौ
तमीयात्।नचगौतमवचनंपितुःस्वोपात्तधनविषयमितिवाच्यं।पितुःस्वोपा
र्जितधनेमातृरजोनिवृत्त्यनंतरंविभागाभ्युपगमेतुद्वैविभागार्जितंतुपित्र्यमि
वहेद्दूनंदत्तस्यनिर्विषयत्वापत्तेः।रजोनिवृत्तौपुत्रोत्पत्त्यसंभवात्।नचवै
पदीसमितिवाच्यंतथात्वेपिपितामहधनेविभक्तजस्यनिरंशतयातस्यहृत्तिले

Indira Gandhi National
Centre for the Arts

६० पापत्तेः।वृत्तिलोपस्ययेजातायेथजातावाइत्यादिनानिषेधात्।नचपितृगृहीतपिता
महद्रव्यस्यैवपित्रानंतरंविभक्तजस्याधिकारान्नवृत्तिलोपइतिवाच्यंपित्रातद्
नस्यभुक्तत्वेवृत्तिलोपावश्यकत्वात्।एवंचमातृपरंविमातृपरंचाप्यपिपुत्रसं
भावनानुस्यात्।तत्रपितामहधनविभागेनुपितुरंशद्वयं।पुत्राणामेकैकांश
त्वा।जीवद्विभागेतुपितागृहीतांशद्वयंस्वयमितिवृहस्पतिवचनात्।पितृध
नगोचरत्वंवास्यैतन्नाशंक्यं।तत्रस्वेच्छामात्रस्यनियामकत्वात्।इच्छयान्यूना
धिकग्रहणस्यापिसंभवात्।भागद्वयमात्रविधानानुपपत्तेश्चपूर्वोक्तगुण
वत्तादिसत्वेपिपैतामहभूमिनिबंधद्विपदद्रव्याणांन्यूनाधिकदानेनपितु राम·
:प्रभुत्वं।भूम्यादित्रिकभिन्नेपैतामहमणिमुक्ताप्रवालादीनामुक्तकारणास ६०
त्वेपिस्वार्जितवन्न्यूनाधिकदानेपितुःप्रभुत्वं॥भूर्यापितामहोपात्तानिबंधोद्रव्य

---

[illegible]वा।तत्रस्यात्सदृशंस्वाम्यपितुःपुत्रस्यचोभयोः।इतिपितुःस्वाछंद्यनिवृत्ति
परयाज्ञवल्क्यवचनात्सतिपितामहधनस्वामित्वेपितरितत्पुत्राणांपिता
महधनस्वामित्वाप्रसक्तेर्यथाश्रुतार्थबाधात्।निबंधआकरात्रैनियतलभ्यंराजा
दिदत्तमितिकल्पतरुः॥इयंहिपरस्परंभसाहचर्यात्तथाच।स्थावरंद्विपदं
चैवयद्यपिस्वयमर्जितं।असंभूयसुतान्सर्वान्नदानंनचविक्रयः।मणिमुक्ता
प्रवालानांसर्वस्यैवपिताप्रभुः।स्थावरस्यसमस्तस्यनपितानपितामहइति
याज्ञवल्कीयाच्च।अत्रमणिमुक्ताप्रवालानामित्युपादायपुनःसर्वस्येत्युपादानं
सर्वेषांभूम्यादित्रितयभिन्नवस्त्रादिद्रव्याणांदानादिषुपितुःस्वाछंद्यार्थं
तत्रापिसर्वस्येत्युपादानात्सर्वस्यकुटुम्बवर्त्तनहेतोर्दानादिनिषेधः।कुटुम्ब
वर्त्तनाविरोधित्वंयत्किंचित्स्थावरादेर्दानादिनिषेधइतिदायभागः।एवंय

Indira Gandhi National Centre for the Arts

६८ रिपिता पुत्रान्विभज्य यथाशास्त्रं भागं गृहीत्वा पुत्रैः सहासंसृष्ट एव पुत्रांतरमुत्
पाद्य मृतस्तदा विभागानंतरजात एव तद्धनाधिकारी न तु पूर्वविभक्तोपीत्येवं पू
र्वभ्रातृविभागेपि विभक्तजस्यानंशित्वं बृहस्पतिः। पित्रा सह विभक्ता
ये सापत्न्या वा सहोदराः। जघन्यजाश्च ये तेषां पितृभागहरास्तु ते। अनीशः पूर्वजः
पित्र्ये भ्रातृभागे विभक्तजः। परस्परमनीशास्ते मुक्त्वा शौचोदकक्रियाः। जघन्यजा
विभागानंतरजाताः। यदि तु येन केनचित् पुत्रेण सह संसृष्टः सन् पिता मृतस्तद्ध
नं संसृष्टविभक्तजाभ्यां समं विभाज्यं। ऊर्ध्वं विभागाज्जातस्तु पित्र्यमेव हरेद्धनं
।संसृष्टास्तेन वा ये स्युर्विभजेत स तैः सहेति मनुवचनात्। तत्रापि विशेषः संसृ राम
ष्टेनापि पित्रा स्वासाधारणधनप्रतिग्रहाद्याभ्यां यदर्जितं तद्विभक्तजस्यैव न तु ६८
पुत्रांतरस्यापि तथा च बृहस्पतिः॥ पुत्रैः सह विभक्तेन पित्रा यत्स्वयमर्जितं। विभ

क्तजस्य न तु सर्वेषामनीशाः पूर्वजाः स्मृताः। अत्र स्वयमित्यनेनासाधारणधनेन प्रति
ग्रहादिनार्जितं दर्शयति। एवं विभक्तपित्रा यद्दानादिकं स्वार्थमेव कृतं तेन तद्विभ
क्तजेनैव समाधेयं। यथा धनेन तथर्णोपि पितानाधानकर्मेषु च द्रष्टव्यं न वचनश्रोषात्
यत्पुनः संसृष्टेन सह साधारणधनेन दानादिकं कृतं तेन तदुभाभ्यामेव संसृष्टविभक्त
जाभ्यां समाधेयं। विभक्तजः विभागानंतरगर्भाधानेनोत्पन्नः गर्भाधानादनंतरजनक
स्यापि तदभावात्। अतो यद्यविज्ञातगर्भायामेव स्त्रियां पुत्रा विभक्तास्तदा तद्गर्भजा
तो विभक्तेभ्यः एव भ्रातृभ्यः पूर्वविभक्तांशं कृत्वा पुनर्विभज्य स्वांशं गृह्णीयात् न तु
विभक्तजेन सह पितृद्रव्ये प्राप्तिः एतच्च विभक्तजस्य पितृधनाधिकारित्वं पितुः
स्वार्जितविषयं पितामहधनस्य मातुर्विमातुश्च रजोनिवृत्तिमंतरेणाविभागा
भावात्। अंशाकृतस्य च तस्याप्राप्तौ यत्नेनानुपादेयत्वात्तत्र विभक्तजा विभक्त

Indira Gandhi National
Centre for the Arts

६९ जानां सर्वेषामेवांशित्वात्। अत एव यदि द्वे वा त् पितामहमस्यादिकं विभज्य यथा
शास्त्रं स्वयमंशं गृहीत्वा पिता पृथक् स्थितस्तदा पितामहसंबंधिधनविभागं
भ्रातृभ्यो विभक्तो पित्रा गृहीयात्। एवं विभागस्य अशास्त्रीयत्वेन निवृत्तत्वा
त्। यथा अत्रैव विषये विष्णुः। पितृविभक्ता विभागानन्तरमुत्पन्नस्य भागं दद्यु
रिति। एवं पित्रा पितामहधनात् स्वार्जितधनाद्वा ज्येष्ठपुत्राय विंशोद्धारादिकं
दत्वा विभजनीयं। विभागं चेत् पिता कुर्यादिच्छया विभजेत्सुतान्। ज्येष्ठं वा श्रेष्ठभा
गेन सर्वे वा स्युः समांशिन इति याज्ञवल्क्यीवचनात्। अत्र प्रागुक्तं स्वार्जितधनविष
यं। परार्द्धं पितामहधनविषयमिति दायभागः। पित्राऽप्राप्तस्त्रीधनाये अपुत्र एन.
पत्न्यः पुत्रतुल्यांशो देयः। असुतास्तु पितुः पत्न्यः समानांशाः प्रकीर्तिताः इति व्या ६९
सवचनात्। यदि कुर्यात्समानांशान् पत्न्यः कार्याः समांशिकाः। न दत्तं स्त्रीधनं यासां भ

र्त्रा वा श्वशुरेण वा इति याज्ञवल्क्यीयाच्च। पितुरिति कर्त्तरि षष्ठी इति पुत्रकर्तृकविभा
गे तु विमातुर्नांशित्वमिति स्मार्ताः॥ स्त्रीधनाभावे तु पुत्रसमांशिका इत्यर्थः पुत्रेभ्यः
समानांशदाने इयं व्यवस्था पुत्रेभ्यो न्यूनदाने स्वयमधिकग्रहणे तुल्यांशाः तस्स
मानांशिकाः कार्याः। स्त्रीधनदाने त्वर्द्धं दत्ते त्वर्द्धं प्रकीर्तितमिति वचनात्। अथ द
तकस्य भागो वक्ष्यते। शूद्रस्य दासीपुत्रोपि पितुरिच्छया परिणीताजातपुत्रेण स
ह तुल्याधिकारी पितरि मृते तेन रहितोंशाधिकारी परिणीतापुत्राभावे तु असति दौहित्रे
सर्वाधिकारी सति दौहित्रे तेन सह तुल्याधिकारी। जातोपि दास्यां शूद्रस्य कामतोंश
हरो भवेत्। मृते पितरि कुर्युस्तं भ्रातरस्त्वर्द्धभागिनः। अभ्रातृको हरेत्सर्वं दुहि
तृणां सुताद्दृते। इति याज्ञवल्क्यवचनात्। एवं च सति दौहित्रे तेन सह समभागित
मस्य समं स्यात् स्त्रु न विशेषस्येति न्याय्यं। एवमेव दायभागः। इति पितृकृतवि

Indira Gandhi National
Centre for the Arts

७० भागः॥ ० ॥ इदानीं पितृस्वर्लोपरमे भ्रातॄणां विभागः कथ्यते। सोपि मातरि जीवंत्यां पु
त्राणां स्वस्वपितृधनस्वामित्वेन धर्म्यो भवति। ऊर्द्ध्वं पितुश्च मातुश्च समेत्य भ्रातरः समं
भजेरन् पैतृकं रिक्थमनीशास्ते हि जीवतोरिति वचनेन उभयोपरमे सोदराणां
पैतृकधनविभागस्योक्तत्वात्। जीवंत्यां मातरि पुत्राणां पैतृकधनविभागेन स्वा
तंत्र्यं किंतु मातुरनुमत्यैव परं विभागो धर्म्यः। यद्यविभक्ता एव स्थातुमिच्छंति तदा
ज्येष्ठ एव योगक्षेमसमर्थः सर्वं गृह्णीयात् शेषा भ्रातरः पितरमिव तमुपजीवेयुः। ज्ये
ष्ठ एव तु गृह्णीयात्पित्र्यं धनमशेषतः। शेषास्तमुपजीवेयुर्यथैव पितरं तथेति
मनुवचनात्। सर्वेच्छया शक्तश्चेत् कनिष्ठादिरपि। बिभृयाद्वेच्छतः सर्वान् ज्येष्ठो राम
भ्राता यथा पिता। भ्राता शक्तः कनिष्ठो वा शक्त्यपेक्षा कुले स्थितिरिति वचनात्। ७०
मध्यमोऽत्र दण्डापूपन्यायात्सिद्धः सहवासस्तु सर्वेच्छया विभागस्तु न तथा किंतु

एकेच्छयापि भवति यथा कात्यायनः॥ अप्राप्तव्यवहाराणां धनं व्ययविवर्जितं। न्यसेयु
र्बन्धुमित्रेषु प्रोषितानां तथैव च। अप्राप्तव्यवहाराः पंचदशवर्षान्यूनवयस्काः। प्रो
षितानामिति अत्र तदनुमतिं विनापि विभागः स्फुट इति भावः। अयं तु पुत्राणां वि
भागः पुत्रपौत्रप्रपौत्रपर्यंतः समानो नात्रोत्पत्तितः प्रत्यासत्तिक्रमेणाधिकारः
पुत्रादीनां त्रयाणामेव पार्वणेन तत्पिंडतद्भोग्यपिंडद्वयदातृत्वात् अत एव जीव
त्पितृकयोः पौत्रप्रपौत्रयोर्नाधिकारः पार्वणानधिकारितया पिंडाप्रदातृत्वा
त्। पित्रोरुपरमे च भ्रातॄणां विभागे पितृकृतविशेषः परं निवर्तते अन्यत्सर्वमेव पू
र्ववत्प्रत्येतव्यं। यत्र च एकस्यैको पुत्रो जातो तयोरेकोऽस्ति अपरस्य बहवः पुत्रानु
त्पादयतः किंतु पुत्राः संति तस्य पुत्रस्यैको भागः अपरस्य भागो बहूनां नप्तॄणां
स्वपित्रधीनजन्मत्वाद्द्वन्संबंधस्यावसेयधने तत्स्वामित्वात्स्वस्वांशावसे

Indira Gandhi National
Centre for the Arts

७१ वधनेनतत्पुत्रादीनामपि॥ इदानींसवर्णभ्रातॄणांविभागोविंशोद्धारादिपूर्वकोवास
मोवाइतिविधीयते। उद्धारमंतरेणापिसमविभागमाहपितरिसानुवृत्तोहारीतः
समानतोमतेनकथविभागः। तथायाज्ञवल्क्यः॥ विभजेरन्सुताःपित्रोरूर्ध्वंरि
क्थमृणंसमं। तथाबृहस्पतिः॥ द्विप्रकारोविभागस्तुदायादानांप्रकीर्तितः। वयो
ज्येष्ठक्रमेणैकःपरःसमांशकल्पना। इतियोज्येष्ठक्रमेणोक्तोविंशोद्धाराभिप्राय
णाम्। इदंतुविंशोद्धारोनास्तीतिदायभागः। अतःसोद्धारानुद्धारयोर्विकल्पः॥ नच
समभागस्यशास्त्रीयत्वात्तस्यैवनित्यवदनुष्ठानमिति। नवाच्यंभवत्यतिप्रायेणभ्रा, राम·
तृणामुद्धारानुमतेरप्यसंभवात्। विभागाविभागविकल्पवत्। अतएवाधुनातना ७१
नांभक्तिश्रद्धाभावात् उद्धारादेर्ज्येष्ठाभावाच्चसमभागएवलोकेदृश्यते। यस्तु
स्वयोग्यतयापितृपितामहादिधनेनिस्पृहः सोपितत्पुत्रादेःकालांतरेदुरंततावा

दत्वार्थंकिंचिद्दत्वाविभजनीयः। भ्रातॄणांयस्तुनेहेतधनंशक्तःस्वकर्मणा। सनिर्भा
ज्यःस्वकादंशात्किंचिद्दत्वोपजीवनं इतिमनुवचनात्। विभागस्तुपित्रादेर्ध
नेनऋणापरिशोध्यतदवशिष्टधनस्यकर्तव्यः। ऋणमर्णिच्छयावाविभज्यपरि
शोधनीयं। यथानारदः॥ यच्छिष्टंपितृदायेभ्योदत्वर्णंपैतृकंततः। भ्रातृभिस्तद्
विभक्तव्यमृणीनस्याद्यथापिता। अत्रऋणीनस्यात्यथापितेत्यनेनविभागा
ऋ(ए)५ नंतरमपिधनेनपरिशोधनेदर्शितं अन्यथाव्यर्थंस्यात्। एवंप्रतिश्रुतमपिदेय
मित्युक्तमसकृत्। एवमेकेनभ्रात्रादिनावह्नौपोष्यतयायत्राधिकंभुक्तंतत्रभुक्तां
शोनविभागमध्येप्रवेशनीयः। किंतुभुक्तावशिष्टस्यविद्यमानस्यैवविभागःका
र्यः। बंधूनामविभक्तानांभोगंनैवप्रदापयेत्। दृश्याद्युत्तद्विभागःस्यादायव्यय
विशोधितात्। इतिनारदवचनात्। दृश्यादित्यविशिष्टरूपवार्थंतेनाविभक्तताद्दशा

७२ यांयावद्धनंसंचितंयावच्चव्ययितंतत्सर्वंबुद्ध्यायदेकीकृतंतत्रदृश्यंविद्यमानेतस्मादे
वविभागःकार्यइत्यर्थः।असंस्कृतभ्रात्रादीनांचेत्कथनेनसंस्कार्यतामाहव्यासः
।येषांतुनकृताःपित्रासंस्कारविधयःक्रमात्।कर्तव्याभ्रातृभिस्तेषांपैतृकाद्धिव
द्धनात्।पितरिचोपरतेसोदरासोदरभ्रातृभिर्मातुरनुमत्याविभागेक्रियमाणे
मात्रेसमस्तुल्यभागोदातव्यः।समांशहारिणीमातापुत्राणांस्यान्मृतेपतौ।इतिव
चनात्।इदंचस्त्रीधनादानेस्त्रीधनदानेत्वर्द्धदानं अधिविन्नस्त्रियैप्राप्तस्त्रीध
नायैआधिवेदनिकस्यार्द्धदानंदर्शनेनसोदाहृतकन्यायात्यथायाज्ञवल्क्यः।।अ
धिविन्नस्त्रियैदद्यादाधिवेदनिकंसमं।नदत्तंस्त्रीधनंयस्यैदत्तेत्वर्द्धंप्रकीर्तितं।द्वि राम
तीयविवाहार्थिनाप्रथमस्त्रियैयत्पारितोषिकंधनंदीयतेतदाधिवेदनिकं।अधि ७२
कविवाहार्थत्वात्तस्यतत्रद्वितीयस्त्रियैयावद्दीयतेतत्समानदेयमित्यर्थः।अत्रमा

तृपदस्यजननीपरत्वात्नसपत्नीमातृपरत्वमपिसकृच्छ्रुतस्यमुख्यगौणत्वानु
पपत्तिरितिश्रीकृष्णतर्कालंकारभट्टाचार्यजीमूतवाहनादयःप्राहुः।मैथिला
स्तुमातृपदंसपत्नीमातृपरमितिबृहस्पतिवचनैकवाक्यत्वात् यथाबृहस्पतिः
।तदभावेतुजननीतनयांशसमांशिनी।समांशामातरस्तेषांतुरीयांशाश्चकन्य
काः।अस्यार्थःतदभावेपितुरभावेपुत्रैर्विभागेक्रियमाणेजननीपुत्रतुल्यांश
भागिनी।अपुत्राविमातरश्चपुत्रतुल्यांशभागिन्यइत्याहुः।एवंपितामहीसप
त्नीनामपिस्वभर्तृधनेपुत्राभावेपौत्रतुल्यांशभागित्वं।पितामह्यश्चसर्वास्तामा
तृतुल्याःप्रकीर्तिताः।इत्यत्रबहुवचनश्रवणात्सर्वपरोपादानाच्चइतिप्राहुर्मि
श्राणामप्यत्रैवस्वरसः।।अथसंसृष्टधनविभागः।।०।।तत्रसंसर्गिणोबृहस्पति
नादर्शिताः।यथा विभक्तोयःपुनःपित्राभ्रात्राचैकत्रसंस्थितः।पितृव्येनाथवापी

Indira Gandhi National
Centre for the Arts

७३ त्यासनुसंसृष्टउच्यते। तेन पित्रादिभिः सहविभक्तः सन्पुनरन्योन्येच्छया पूर्वकृतवि
भागमुपेक्ष्य यत्तव धनं तन्मम धनं यन्मम तत्तवापीति व्यवस्थया एवागृहिह्व
तयाऽवस्थानं संसर्ग इति प्रतिपादनं। तत्र च पितृभ्रातृपितृव्यव्यतिरिक्ते संस
र्गो न भवति। अन्यथा परिगणितानानर्थक्यापत्तेरिति स्मार्त्तजीमूतवाहनाद
यः प्राहुः। मैथिलास्तु पित्रादिपदमुपलक्षणं। येषामेव तूत्पत्तितोऽविभक्तत्वं
तेषामेव विभागानंतरमेकत्रावस्थानं संसर्गः। तेन पितृव्यपुत्रादिभिरपि सं
सर्गो भवतीत्याहुः। तच्चिंत्यं। मनुविरोधात्। विभक्ताः सहजीवंतो विभजेरन्पुनर्य
दि। समस्तत्र विभागः स्यात्ज्येष्ठं तत्र न विद्यते। अत्र समत्वेनेन विंशोद्धाराद्य
भाव एव सूचितः। न तु सवर्णां भ्रातॄणामपि भागसमता। अत एव बृहस्पतिः॥ वि
भक्ता भ्रातरो ये च संप्रीत्यैकत्र संस्थिताः। पुनर्विभागकरणे तेषां ज्येष्ठं न विद्यते॥

राम
७३

दं तु ज्येष्ठांशमेव निषेधयति न तु भागसाम्यमपि ज्ञापयति॥ बृहस्पतिः॥ संसृष्टानां
तु यः कश्चिद्विद्याशौर्यादिना धनं। प्राप्नोति तस्य दातव्यो द्व्यंशः शेषाः समांशि
नः। यदि तु येन केनचित्पुत्रेण सह संसृष्टः सन्पुत्रांतरमुत्पादयेत्तदा तद्
धनं संसृष्टविभक्तजाभ्यां पुत्राभ्यां सममं विभजनीयं। उर्द्धं विभागाज्जातस्तु पित्र्य
मेव हरेद्धनं। संसृष्टास्तेन वा ये स्युर्विभजेत स तैः सह इति प्रागुक्तमनुवचना
त्। तत्रायं विशेषः संसृष्टेन पित्रा स्वासाधारणधनप्राणव्ययाभ्यां यदर्जितं तन्न
द्विभक्तजस्यैव न तु पुत्रांतरस्यापि॥ तथा च बृहस्पतिः॥ पुत्रैः सहविभक्तेन पित्रा
यत्स्वयमर्जितं। विभक्तजस्य तत्सर्वमनीशाः पूर्वजाः स्मृताः। अत्र स्वयमित्यने
नासाधारणधनप्राणव्ययेनार्जितं दर्शयति। सर्वशब्देन च पित्रार्जितं बहुतरम
पि विभक्तजस्यैवेति सूचितं॥ एवं विभक्तपित्रा यद्दारादिकं स्वार्थमेव कृतं तद्विभ

Indira Gandhi National
Centre for the Arts

७४ क्तेनैव समाधेयं। यथा धनेन तथर्णोपि दानाधानक्रयेषु च तुल्यवचनात्। यदि पुनः
संसृष्टेन सह साधारण्येन यद् ऋणादिकं कृतं तद्दानादुभाभ्यां संसृष्टविभक्ताभ्यां स
माधेयं॥ ० ॥ अथ विभागानंतरमागतस्य विभागः॥ तत्र बृहस्पतिः॥ कृते कृते
विभागे वा ऋक्थी यत्र प्रवर्तते। सामान्यं च भवेद्यत्तु तत्र भागहरस्तु सः। नैलेख्यं ध॰
गृहं क्षेत्रं यस्य पैतामहं भवेत्। चिरकालप्रोषितोऽपि भागभागागतस्तु यः। गोत्र
साधारणं त्यक्त्वा योऽन्यदेशं समाश्रितः। तद्वंश्यस्यागतस्यांशः प्रदातव्यो न संश
यः। तृतीयः पंचमो वापि सप्तमो वापि यो भवेत्। जन्मनाम परिज्ञाने लभेदंशं क्रमा
गतं। यं परंपरया मौलाः सामंताः स्वामिनं विदुः। तदन्वयस्यागतस्य दातव्या गोत्रजै धर्मे
र्मही। मह्यांति साधारणधनोपलक्षणं तेनाविभक्ततादृशायां देशांतरगतेन स्थिरो ७४
षितवंश्येन समं तातप्रतिवासिभिर्मौलैरामज्ञापनमेवं कं क्रमागतधनादयथाशा

स्वभागग्रहणं कार्यमिति स्थितं। भोगकृतविशेषस्त्वग्रे वक्ष्यते अविभक्तविभक्तानां कु
ल्यानां वसतां सह। भूयो दायविभागः स्यादाचतुर्थादिति स्थितिरिति वचनं तु सहवास
विषये। एकमातृकयोर्विभिन्नपितृकयोर्विभागमाह विष्णुः॥ एकमातृद्वयोर्यत्रापि
तरौ द्वौ च कुत्रचित्। तयोर्यद्यस्य पैत्र्यं स्यात् स तद्गृह्णीत नेतरः। द्वौ सुतौ विवदेयातां द्वैः
भ्यां जातौ स्त्रिया धने। तयोर्यद्यस्य पैत्र्यं स्यात् स तत् गृह्णीत नेतरः। यस्य बीजाद्योजा
तस्तद्धनं स गृह्णीयात् नेतरो नान्यबीजजातो गृह्णीयादित्यर्थः। तेन मातृसमांशत्वव्यवस्था
तथाविधपुत्राभ्यां मातृधनविभागेऽपि यस्य पित्रा यद्दत्तं तस्यैव तत्तेन तद्ग्राह्यं नेतरे
णेत्यर्थः। मात्रा स्वयमर्जिते तु तुल्यांशित्वमेव। अथाविभक्तधनस्य देयादेयत्ववि
चारः॥ ० ॥ अविभक्तः स्थावरेषु सर्वेषां दायादानां अनुमतिं विना एकस्य दानाद्य
नधिकारः। स्थावरस्य समस्तस्य गोत्रसाधारणस्य च नैकः कुर्यात्क्रयं दानं परस्परमतं

Indira Gandhi National
Centre for the Arts

७५ विना। अविभक्ता विभक्ता वा सपिंडाः स्थावरे समाः। एको ह्यनीशः सर्वत्र दानाधमनविक्रये
। इति व्यासवचनात्। वस्तुतस्तु यथेष्टविनियोगार्हत्वलक्षणस्य स्वत्वस्य द्वयोरवर
त्राप्यविशेषाद्दानादिकं कृतं सिद्धमेव वचनं तु स्वामित्वेन दुर्वृत्तपुरुषगोचरविक्रया
दौ कुटुंबविरोधाद्धर्म्मविभागितान्तापत्त्यार्थं निषेधकं एवं न तु विक्रयाद्यनिष्पत्त्यर्थमिति
स्मार्त्तदायभागकारादयः प्राहुः। अतएव यद्येकजातावहवः पृथग्धर्म्माः पृथक्क्रियाः।
पृथक्कर्म्मगुणोपेता न च कार्येषु संमताः। स्वभागान् यदि ते दद्युर्विक्रीणीयुरथापि
वा। कुर्युर्यथेष्टं तत्सर्वमीशास्ते स्वधनस्य वै। इति नारदवचनेऽप्येकेन क्रियमाने कार्ये राम·
पुनरन्येषामसंमतत्वेऽपि स्वभागदानादावीशत्वमुक्तं विभक्तविषयमेतदिति नाशंक्य
मिति तत्रान्येषामस्वामित्वे संमतत्वासंमतत्वेऽवाच्यत्वात् दृष्टं च वक्ष्यमाणमनुवचनेन य ७५
तमानाम्यस्यादेयमन्येगणानेतन्निषेधपरमेव न तु दानाद्यनिष्पत्तिपरं एवमेवस्मृति

साराद्यः। तस्माद्विभक्तस्याविभक्तस्य वा स्वांशदानं सिद्धमेव दृतिसम्मतं। तत्र दानादिकं न
सिद्ध्यतीति मिश्रास्त्वचिंत्यं॥ ० ॥ अथ रत्नकोरस्यांविभागव्यवस्था॥ औरसेन रत्नका
नां विभागे औरसस्य घंशितस्सवर्णोरत्नकारेरेकेकांशितं हीनवर्णोरत्नकारेस्तु नांशितं
किंतु ग्रासाछादनादिमात्रभागित्वं तदाह देवलः। सवर्णा ह्यनौरसस्यैते पुत्रा दायहराः
स्मृताः। औरसे पुनरुत्पन्ने ते पुत्रे ज्येष्ठं न विद्यते। तेषां सवर्णा ये पुत्रास्ते तृतीयांशभा
गिनः। हीनास्तमुपजीवेयुर्ग्रासाछादनसंभृताः। दायहराः पितुः सर्वे दायहराः। तेषामि
ति तेषां मध्ये ये सवर्णाः पुत्राः इत्यर्थः औरसे सति तु तृतीयांशहराः हीनाये पितुरौरस
पुत्रान्नातु हीनवर्णास्ते ग्रासाछादनमात्राधिकारिणः। तदाह कात्यायनः॥ उत्पन्ने त्वौ
रसे पुत्रे तृतीयांशहराः स्मृताः। सवर्णा असवर्णास्तु ग्रासाछादनभागिनः। अत्रासव
र्णपरं हीनवर्णपरं देवलवचनेकवाक्यत्वात्॥ ० ॥ अथ नियुक्तस्य पश्चाद्रव गतस्यावि

Indira Gandhi National
Centre for the Arts

७६ भागः॥ तत्र मनुः॥ ऋणे धने च सर्वस्मिन्प्रविभक्ते यथाविधि। पश्चात् दृश्येत यत्किंचित्तत्स
र्वं समतां नयेत्। पूर्वं यस्य यथा भागकल्पना कृता तां तत्समानेनापहर्त्तुः सहापहृतस्य तथ
स्याकार्य्या न पुनरस्यापहर्त्तु तथा अस्य भागो दातव्यो न दातव्य एव वा। न पुनरपहृतद्रव्ये
सर्वेषां समभाग एवेति समतां नयेदित्यस्यार्थः॥ विंशोद्धारादि बाधे प्रमाणाभावात्। अस
वर्णापुत्रादीनां विभागस्यापत्तेश्च। अत्र पश्चाद्दृश्येतेत्यनेन विभक्तेषु सत्सु लौकिकप्रमाण
मात्रेणालब्धस्यैव विभागो न हि तत्र दिव्यादिकं अन्यथाशंकापि शाठ्याद्दिव्यं विनाकृचि
दृश्यनिश्चितद्रव्यत्वेन सम्यग्विभागो न स्यात्। कात्यायनः॥ दृश्यमानं विभज्येत गृहं क्षे
त्रं चतुष्पदं। गूढद्रव्याभिशंकायां प्रत्ययस्तत्र कीर्त्तितः। प्रत्ययो दिव्यं॥ एतदेव स्पष्टये राम
न्नारदोपस्करवाहनाभरणाकर्म्मिणः। दृश्यमानं विभज्येत कोशं गूढेऽब्रवी ७६
न्मनुः॥ कोशो दिव्यविशेषः॥ कात्यायनः॥ प्रच्छादितं तु यद्येन पुनरागत्य तत्समं भ

जेरन् भ्रातृभिः सार्द्धमभावे तु पितुः सुताः॥ भृगुः॥ अन्योन्यापहृतं द्रव्यं दुर्विभक्तं च य
दृश्येत। पश्चात् प्राप्तं विभज्येत समभागेन तद्भृगुः॥ पश्चात् प्राप्तमित्यनेनापहृतद्रव्या
स्यैव विभागो न तु पूर्वविभक्तस्यापि पुनर्व्विभाग इति दर्शितं॥ दुर्विभक्तमित्यनेन भ्रमा
दिना कृताशास्त्रीयविभागस्य पुनः शास्त्रीयविभागः कार्य्य इत्युक्तं। सकृदंशो निपतति
सकृत्कन्या प्रदीयते। सकृदाह ददानीति त्रीण्येतानि सकृत् सकृत्। इति तु शास्त्रीय
विभागानंतरं न पुनस्तद्विभाग इत्येतत्परं। देशादिभेदेनापि विभागमाह कल्पतरु
रत्नाकरयोः कात्यायनः॥ देशस्य जातेः संघस्य धर्म्मो ग्रामस्य यो भृगुः। उदितः स्यात्स ते
नैव दायभागं प्रकल्पयेत्। बंधुनापहृतं द्रव्यं बलान्नैव प्रदापयेत्। बंधूनामविभक्ता
नां भोगं नैव प्रदापयेत्। अत्रापहृतपदं भाक्तं एवमेव विश्वरूपहलायुधस्मार्त्तजीमूत
वाहनादयः। समादिनादाष्यानतुबलात्। अपहारे तु आत्तां समादिनादापयेत्तस्य घात

७७ नमपिकार्य्यं अविभक्तेन यदधिकं भुक्तं तदसौ न दाप्यः। एतच्च मुनिभिरपहर्त्तुरपि विभा
गप्रतिपादनाद्दर्शीयते॥ ० ॥ अथ वृत्तविभागसंदेहनिर्णयः॥ तत्र नारदः॥ विभाग
धर्म्मसंदेहे दायादानां विनिर्णयः। ज्ञातिभिर्भागलेख्येन पृथक्कार्य्यप्रवर्त्तनात्। ज्ञाती
नां कीर्त्तनं तेषु सत्सु नान्यसाक्षिग्रहणमिष्टं तदर्थं। अत एव याज्ञवल्क्यः॥ विभागनि
ह्नवे ज्ञातिबंधुसाक्ष्यभिलेखितैः। विभागभावना ज्ञेया गृहक्षेत्रैश्च यौतुकैः। प्रथमं ज्ञात
यः सपिंडाः साक्षिणः। तदभावे बंधुपरीपनीता संबंधिनः साक्षिणः अत एव शंखः। गो
त्रभागविभागार्थसंदेहे समुपस्थिते। गोत्रजैश्चापि ज्ञातेकुलं साक्षित्वमर्हति। कुलं
बंधुः तदभावे लिखितेनापि निर्णयः कार्य्यः। लिखितस्य साक्षिभ्यो गुरुत्वं तदभावे पृथ राम· ७७
क्कार्य्यप्रवर्त्तनादपि निर्णयः॥ यथा नारदः॥ दानग्रहणपश्वन्नगृहक्षेत्रपरिग्रहाः
विभक्तानां पृथक्ज्ञेयाः पाकधर्म्मागमव्ययाः। साक्षित्वं प्रातिभाव्यं च दानं ग्रहणमेव च।

विभक्ता भ्रातरः कुर्युर्नाविभक्ताः परस्परं। येषामेताः क्रिया लोके प्रवर्त्तन्ते स्वऋक्थतः। विभ
क्तानवगच्छेयुर्लेख्यमप्यंतरेण तान्। एकोदराति अपरश्चेग्रहणाति एके नऋणादिषु क्रि
यमाणेषु अपरस्यातासाक्षीक्रियते। प्रतिभूर्वा एवमादीनां एकैकेनापि निर्णयः कार्य्य इ
ति दिक्॥ ० ॥ अथ भुक्तिः॥ तत्र याज्ञवल्क्यः॥ पश्यतोब्रुवतो हानिर्भूमेर्विंशतिवा
र्षिकी। परेण भुज्यमानाया धनस्य दशवार्षिकी। विवादमकुर्वीनस्य स्वामिनः समसंपरे
णासपिंडादिना भुज्यमानाया भूमेर्विंशतिवर्षोत्तरं स्वत्वहानिः। अत्र वर्षगणनासा
वनेन लोकव्यवहारकर्म्मलात्तस्य। तथा विष्णुधर्म्मोत्तरं। सत्रान्नुपास्यान्यथसावने
मा लोकं च यतस्यात्व्यवहारकर्म्म। तथा व्यासः॥ वर्षाणि विंशति यस्य भूर्भुक्ता प
रैरिह। सति राज्ञि समर्थस्य तस्य सेह न सिद्ध्यति। समर्थस्य बालत्वादिदोषरहितस्य ध
नस्य दशवर्षनिरस्तास स्वत्वहानिः। तथा च मनुनारदौ॥ यत्किंचिद्दशवर्षाणि संनिधौ

Indira Gandhi National
Centre for the Arts

७८ प्रक्षते धनी। भुज्यमानं परैस्तूष्णीं न स तल्लब्धुमर्हति। यत्किंचिद्धनजातं स्वमेव प्रीत्या
दिव्यतिरेकेन परैर्दशवर्षाणि भुज्यमानं स्वयं तूष्णीं प्रेक्षते न भुज्यतामिति प्रतिषेधं न
कुरुते नासौ तल्लब्धुं योग्यो भवति तत्र तस्य स्वाम्यं नश्यतीत्यर्थः। तथा गौतमः॥ अजड
पौगंडधनं दशवर्षभुक्तं परैः सन्निधौ भोक्तुरिति जडो विकलेंद्रियः पौगंडः अनुत्पन्न
श्मश्रुरित्यर्थः। तथा च नारदः॥ बाल आषोडशाद्वर्षात्पौगंडश्चापि शब्द्यते। तस्माद्दश
वर्षविंशतिवर्षभोगादेव स्वत्वं जनयति यथा कालवशात्बीजमंकुरं जनयति तद्वद्दश
प्रक्षतमिति स्वामिनाऽपरिसंक्रांतोपि शास्त्रोक्तकालभोगात्स्वाम्यमन्यस्य भवति। य
थाजयेनापरः परापुधनेऽति एवमयस्मात् श्रीकरबालकयोगलोकभवदेवभट्ट राम
लपारिजातकुल्लूकहरिचंद्रेश्वरवर्द्धमानोपाध्यायप्रभृतयः॥ व्यवहारोपितादृगेव अत्रौ ७८
पेक्षयास्वत्वहानिर्भुक्ताच स्वत्वमाह नारदः॥ भुज्यमानान्परैरर्थान्यस्तान्मोहादुपे

क्षते। समक्षं तिष्ठतोऽप्यस्य तानभुक्तिः कुरुते वशी। व्यक्तमाह बृहस्पतिः॥ स्थावरं सिद्धिमाप्नो
ति भुक्त्या हानिमुपेक्षया। उपेक्षयात्समया अत्र स्वामिनः सश्रीलत्वं असमक्षं महेश्व
र्त्वं च हेतुः। ततश्च विंशतिवर्षात्पूर्वं सत्कृतिसाध्यकर्षणादिना यत्नशास्यमुत्पादितं तत्र
वस्वत्वं तदुत्तरं तु भूमौ एवं दशवर्षात्पूर्वं गवादौ स्वकृतिसाध्यदोहनपालनादि यत्र दुग्धादि
कमुत्पन्नं तत्र स्वत्वं दशवर्षोत्तरं तु गवादिधनेस्वत्वमिति पूर्वं तत्ताशकभोगेनु चौर्यदो
षो भवति अत्राध्यादीन्व्यावर्त्तयति। पश्यतो ब्रुवतो हानिरित्यभिधाय याज्ञवल्क्यः। आधि
सीमोपनिक्षेपजडबालधनैर्विना। तथोपनिधिराजस्त्रीश्रोत्रियाणां धनैरपि। आधिर्बं
धद्रव्यं उपनिक्षेपः। वासनस्थमनाख्याय समुद्रं यद्विधीयते इति नारदोक्तः। वासनं नि
क्षेपाधारभूतं संपुटकादि तत्स्थं समुद्रं ग्रंथ्यादियुक्तं। जडो बुद्धिविकलः। बाल अप्राप्त
षोडशवर्षवयस्कः उपनिधिः प्रीत्या भोगार्थमर्पितः। ततश्चाध्यादिभिर्जडादिधनैश्चावि

Indira Gandhi National
Centre for the Arts

७९ नाम्यानि धनानि तन्नद्रुपभोगकाले न स्वामिनो नश्यंति भोक्तुर्भवंति एतानि तु स्वामिनो न
श्यंति न वा भोक्तुर्भवंति स्मृतिः। द्वारमार्गक्रियायोगो जलवाहादिका क्रिया। भुक्तिर्व
र्त्तुर्वी स्यात् न दिव्यं न च साक्षिणः। क्रियायोगं गमनागमनादिरूपः॥ याज्ञवल्क्यः॥ आग
मोऽप्यधिको भोगात् विना पूर्वक्रमागतात्। आगमो बलवानेव भुक्तिः स्तोकापि यत्र न॥ आ
गमस्तु कृतो येन सोऽभियुक्तस्तमुद्धरेत्। न तत्सुतस्तत्सुतो वा भुक्तिस्तत्र गरीयसी।
योऽभियुक्तः परेतः स्यात् तस्य रिक्थी तमुद्धरेत्। न तत्र कारणं भुक्तिरागमेन विना कृता
। अस्यार्थः आगमः पूर्वपुरुषक्रमानागत भोगात् बलवान् अतः क्रमागतभोग आगमा
द्बलवान्॥ तथा च वृहस्पतिः॥ अनुमानाद्वरः साक्षी साक्षिभ्यो लिखितं गुरुः। अव्याहता नम
त्रिपुरुषी भुक्तिरेभ्यो गरीयसी॥ त्रिपुरुषभोगमाह व्यासः॥ प्रपितामहेन यद्भुक्तं तत् १८
पुत्रेण विना च तं। तौ विना यस्य पित्रा च तस्य भोगस्त्रिपौरुषः। पितापितामहो यस्य जीवे

त्प्रपितामहः। त्रयाणां जीवतां भोगो विज्ञेयस्त्वेकपूरुषः। आगमोऽपि बलवान्न भवति य
त्र भुक्तिः स्वल्पापि नास्ति तथा च नारदः॥ विद्यमानेऽपि लिखिते जीवत्स्वपि च साक्षिषु। विशे
षतः स्थावराणां यन्न भुक्तं न तत् स्थिरमिति दीपकलिका। यत्र वादिनोः स्वस्वागमबलप्र
वृत्तौ आगमयोस्तु पौर्वापर्येन निर्णीयते तत्र यस्य भुक्तिरस्ति तस्यागमो बलीयानित्यन्य
स्मृत्यर्थः। इति मिताक्षरा॥ तस्मात् यत्रागमपौर्वापर्यानिश्चयस्तत्र सर्वे पूर्वं विवादेषु व
लवत्तरा क्रिया। आधौ प्रतिग्रहे क्रीते पूर्वा च बलवत्तरा। इति याज्ञवल्क्यवचनात् निर्णयः
। आध्यादीनां व्यवस्थानुपरं वक्ष्यते। आधिविक्रयदानानामंतराल सोऽस्यैव पौर्वापर्य
स्यानिर्णीतु मध्यमाक्तौ व्यवस्थामाह वृहस्पतिः॥ कृतं चेदेकदिवसे विक्रयाधिप्रतिग्रहं त्रया
णामपि संदेहे कथं तत्र विचारणा। श्रीणोव हि प्रमाणानि विभजेदन्यथांशतः। त्रयो व्यर्था
नुरूपेण विभागेन प्रतिग्रहः। आधिधर्तेके तत् संप्रदानेनु हस्तसमांशेन विभज्य महा

Indira Gandhi National
Centre for the Arts

८० मित्यर्थः। इति मिश्रा प्राहुः॥ हलायुधस्तु आधिधर्मे त्र्यंशोलघीयान् हि नवस्तवस्त्रादिमा
ह आगमस्त्विति आगम्यते प्रार्थ्यते स्वीयो भवति येन क्रयादिना स आगम इति व्यवहा
रमातृका। आगमः साक्षिपत्रादिकमिति यास्तु वस्कदीपकलिकायां मैथिलास्तु आग
मो धनार्जनोपायः क्रयादिरित्याहुः। व्यासः॥ वर्षाणि विंशतिं भुक्ता स्वामिनाव्याहता स
ती। भुक्तिः सा पौरुषी भूमेर्द्विगुणा च द्विपौरुषी॥ त्रिपौरुषी च त्रिगुणा न तत्रान्वेष्य
आगम इति वचनम समस्तभोगविषयं समस्तभोगे तु विंशतिवर्षभोगास्त्वत्वमिति
विरुद्धं। स्मृत्युक्तकालविषय एव कात्यायनः। स्मार्त्ते काले क्रियाभूमेः सागमा भुक्तिर
ष्यते। अस्मार्त्ते त्वागमाभावात् क्रमात्त्रिपुरुषागता। अत एव नारदः॥ अन्याये राम
न च यद्भुक्तं पित्रा पूर्वतरैस्त्रिभिः। न तच्छक्यमपाकर्तुं क्रमात्त्रिपुरुषागतं। अन्या ८०
येनेति आगमादिकं विनापि त्रापूर्वतरैः पितरमारायपूर्वतरैरित्यर्थः। यत्तु अना

गमं तु यो भुंक्ते बहून्यब्दशतान्यपि। चौरदंडेन तं पापं दंडयेत् पृथिवीपतिः। इति दंडविधायकवच
नेतत् धर्मशास्त्रविरोधात् त्रिपुरुषभोगेतरपरं। वस्तुतस्तु अनागमं इति दंड
विधायकवचनं स्त्रीधनेतरद्रव्यविषयं। स्त्रीधनं तु नरेंद्राणां न कदाचन जीर्य्यति
। अनागमं भुज्यमानमपि वर्षशतैरपीति स्वत्वनिषेधकनारदवचनैकवाक्यत्वात्
॥०॥ अथ भुक्तिस्वत्वापवादः। तत्र बृहस्पतिः॥ भुक्तिस्त्रिपुरुषी सिद्धेदपरेषां न सं
शयः। अनिवृत्ते सपिंडत्वे सकुल्यानां न सिद्ध्यति। अस्वामिना तु यद्भुक्तं गृहक्षेत्राप
णादिकं। सुहृद्बंधुसकुल्यानां न तद्भोगेन हीयते। विवाह्यश्रोत्रियैर्भुक्तं राज्ञामात्यै
स्तथैव च। सुदीर्घेणापि कालेन तेषां सिद्ध्यति तन्नु न। आपणो विक्रयस्थानं वि
वाह्यो जामाता॥०॥ अथ व्यवहारदर्शनं॥ तत्र याज्ञवल्क्यः॥ स्मृत्याचारव्यपेतेन मार्गे
णाधर्षितः परैः। आवेदयति चेद्राज्ञे व्यवहारपदं हि तत्। स्मृत्याचारबहिर्भूतेन व

Indira Gandhi National
Centre for the Arts

कात्यायनः। व्यवहाराश्रितं प्रश्नं पृच्छति प्राडिति स्थितिः॥ विवेचयति यस्तस्मिन् प्राड्विवाकस्ततः स्मृतः॥ ४

८२ र्थिनापरैरर्थितः प्रार्थितो वार्थिद्वितीयाद्राजनि निवेदयेत् तद्व्यवहारस्थानं। आवेदयति
इत्यनेन राज्ञः स्वयं विवादेक्षणानं न कर्त्तव्यं। राज्ञीति व्यवहारदर्शकपरं। तथा च बृहस्पतिः॥
राजा कार्य्याणि संपश्येत् प्राड्विवाकोथवा द्विजः। प्राड्विवाकमाह स एव विवादे पृच्छति प्र
श्नं प्रतिपन्नं तथैव च। प्रियपूर्वं प्राग्वदति प्राड्विवाकस्ततः स्मृतः। अर्थिनं प्रतिभाषते
कीदृशी तव जिज्ञासा प्रत्यर्थिनं प्रति तव वा कीदृगुत्तरं। इति पृच्छतीति प्राड् पृच्छा च
युक्तायुक्तत्वेन जयपराजयौ विविनक्ति वा इति विवाकः। प्राट् चासौ विवाकश्चेति प्रा
ड्विवाकः। कात्यायनः॥ स प्राड्विवाकः सामात्यः सब्राह्मणपुरोहितः। स्वयं स राजा त
नुयात् तेषां जयपराजयौ। यदा कार्य्यवशाद्राजा न पश्येत् कार्य्यनिर्णयं। तदा नियुं राम
ज्यात् विद्वांसं ब्राह्मणं वेदपारगं॥ मनुः॥ जातिमात्रोपजीवी वा कामं स्याद्ब्राह्म ८२
णो ब्रुवः। धर्म्मप्रवक्ता नृपतेर्न तु शूद्रः कथंचन। ब्राह्मणजातिमात्रं यस्य विद्यते न

तु ब्राह्मणकर्म्मानुष्ठानं वशिष्ठादिवत् सोप्यविद्वान् वास्तु तत्पाय निहप्राजा
नि विवादस्य सवरं उक्तयोग्यब्राह्मणाभावे कश्चित् कार्य्यदर्शनेन नृपतेर्भवति
न तु धार्म्मिकोपि व्यवहारज्ञोपि शूद्रः। ब्राह्मणो धर्म्मप्रवक्ता इति विधानादेव शू
द्रनिषेधसिद्धेर्न तु शूद्र इति शूद्रनिषेधो योग्यब्राह्मणाभावे क्षत्रियवैश्ययोरनु
ज्ञानार्थः। अत एव कात्यायनः॥ यदि विप्रो न विद्वान् स्यात् क्षत्रियं तत्र योजयेत्
वैश्यं वा धर्म्मशास्त्रज्ञं शूद्रं यत्नेन वर्जयेत्। द्विजान् विहाय यः पश्येत् कार्य्याणि
वृषलैः सह। तस्य प्रक्षुभ्यते राष्ट्रं बलं कोषश्च नश्यति। यः शूद्रो वेदिकं क
र्म्मस्मार्त्तं वा भाषते यदि। तस्य दंडं द्विसहस्रं कृत्वैव भेदयेत्। अज्ञानतिमि
रोपेतान् संदेहपटलान्वितान्। निराश्रयान् यः कुरुते शास्त्रोज्जनशलाकया। इह
कीर्त्तिं राजपूजां लभते स इति च स्मृतः। तस्मात् संशयमग्नानां कर्त्तव्यश्च विनिर्णयः॥

Indira Gandhi National
Centre for the Arts

८२ अतएव नारदः॥ अनियुक्तो नियुक्तो वा शास्त्रज्ञो वक्तुमर्हति दैवीं वाचं स वदति यः
शास्त्रमुपजीवति। दैवीं देवतानुमतां। पुनः कात्यायनः॥ सभ्येनावश्यवक्तव्यं ध
र्म्मार्थसहितं वचः। शृणोति यदि नो राजा स्यात्तु सभ्यस्तदानघः। सभ्याः सभायां
साधुः। तथाविधमाह याज्ञवल्क्यः॥ श्रुताध्ययनसम्पन्नाः कुलीनाः सत्यवादिनः।
राज्ञा सभासदः कार्य्याः शत्रौ मित्रे च ये समाः। श्रुताध्ययनसम्पन्ना धर्म्मशास्त्रज्ञाः
कुलीनाः संकरदोषरहितमातापितृपरम्पराकाः। सभायां सीदंति उपविशंति ये
ते सभ्याः॥ सदः॥ मनुः॥ त्रैविद्यो हैतुकस्तर्की नैरुक्तो धर्म्मपाठकः। त्रयश्चाश्रमि
णः पूर्वे परिषत्स्याद्दशावराः। त्रैविद्यः त्रिवेदपारगः। हैतुकः सयुक्तिकव्यव राम:
हारी तर्क्यः॥ कात्यायनः॥ दिवसस्याष्टमं भागं मुक्त्वा भागत्रयं च यत्। स कालो ८२
व्यवहाराणां शास्त्रदृष्टः परः स्मृतः। अष्टममाद्यार्द्धप्रहरं मुक्त्वा भागत्रयं प्रह

रद्वयपर्य्यन्तं॥ मनुः॥ धर्म्मासनमधिष्ठाय संवीतांगः समाहितः। प्रणम्य लोकपालेभ्यः
कार्य्यदर्शनमारभेत्। मनुनारदहारीतबोधायनाः॥ पादो धर्मस्य कर्त्तारं पादः साक्षिण
मृच्छति। पादः सभासदः सर्वान् पादो राजानमृच्छति। राजा भवत्यनेनास्तु मुच्यंते च सभा
सदः। एनो गच्छति कर्त्तारं निन्दार्हो यत्र निन्द्यते। दुर्व्यवहारदर्शनाधर्म्मसंबंधी चतुर्थो
भागोऽर्थिनं प्रत्यर्थिनं वा गच्छति अपरश्चतुर्थभागः साक्षिणमसत्यवादिनं अन्यपा
दः सभासदः सर्वान् अधर्म्मप्रवर्त्तननिवारकान् व्याप्नोति पादश्च राजानं व्रजति य
स्यां पुनः सभायां असत्यवादित्वात् निन्दार्हो अर्थी प्रत्यर्थी वा सम्यङ्न्यायदर्शने
ननिन्द्यते तत्र राजा निष्पापो भवति सभासदः न पापेन संबध्यंते अन्यायवादि
नमेव कर्त्तारं पापमुपैति। कुल्लूकभट्टः। कर्त्तारं वादिनं प्रतिवादिनं वा राजपदं
विवेचकपदं। अनेनानिष्पापः॥ अर्थिसमाहतुर्व्यासनारदौ॥ यस्य वाप्यधिका

Indira Gandhi National
Centre for the Arts

८३ पीडाकार्यं चाप्यधिकं भवेत्। तस्यार्थिभावो दातव्यो न यः पूर्वं निवेदयेत्। अत्रैव पूर्वपक्षी
भवेत् तत्स्य दूतिकासाय नीयते तीयचरणे पाठः। न यः पूर्वं निवेदयेदिति तस्योत्तरः प
ह्यदूतिशेषः। स यः पूर्वं निवेदयेदिति पाठे यः प्रथमं निवेदयेत् स पूर्ववादी स्यर्थः।
सभापतेः कर्तव्यमाह याज्ञवल्क्यः॥ उभयोः प्रतिग्रहे यः समर्थः कार्यनिर्णये। प्रातभु
वस्त्वभावेन संज्ञासंज्ञपनं तयोः। संज्ञासंज्ञपने दंडं तुल्याधीकरणं। निर्णयस्य कथा
र्थधनादिदाने आदि तादन्यादि तात् कार्यप्रारूपस्य पूर्वनिपातः। अयं चेत् प्रातभ
र्तोलिवादयोरप्यन्यवादिनोः। स। तोदिनस्योत्तरघाडसायवेतनं। प्रतिभवातका राम:
र्थ तदुद्भवतीति प्रतिभूलेग्नकः। वादयोः विवादफलस्य साधितधनादिदानस्य ८३
वत्समः स्वयं विवादाशक्तौ प्रतिनिधिमाह नारदः॥ अर्थिना संनियुक्तो वा प्रत्यर्थिप्र
हितोऽपि वा। यो यस्यार्थे विवदते तयोर्जयपराजयौ। तयोर्वादिप्रतिवादिनोः। दूतस्यात

र्थं॥ अस्मिन्नारेनियुक्तस्य समोसं परिकीर्तितो। यत्तेष्वाम्याप्नुयात् पुण्यं हानिं वादेथवा जयं
मनुष्यमारणादिषु प्रतिनिधिर्नेरानयादि आह कात्यायनः॥ मनुष्यमारणे स्तेये परदा
राभिमर्शने। अभक्ष्यभक्षणे चैव कन्याहरणदूषणे। पारुष्ये कूटकरणे नृपद्रोहे तथैव च।
प्रतिवादी न दातव्यः कर्ता च विवदेत् स्वयं॥ कुलस्त्रीप्रभृतीनां प्रतिनिधिमाह व्यासः॥ कु
लस्त्रीबालकोन्मत्तजडार्त्तानां च वांधवाः। पूर्वपक्षोत्तरे ब्रूयुर्नियुक्तोभ्यतकस्तथा॥ भ्रा
त्रादन्यस्य पत्नाश्रितस्य दंडनीयतामाह नारदः॥ यो नभ्राता पिता वापि न पुत्रो न नियोजि
तः। परार्थवादी दंड्यः स्याद्व्यवहारेषु विब्रुवन्। विब्रुवन्सम्बन्धार्थः। कदा केनाज्ञानवा वि धा ४
रणीयादि स्याह नारदः॥ निर्वेष्टुकामो रोगार्त्तो यियक्षुर्व्यसने स्थितः। अभियुक्तस्तथान्ये
नराजकर्मोद्यतस्तथा। गवां प्रचारे गोपालाः शस्यवंधे कृषीवलाः। शिल्पिनश्चापि त
त्कालेआयुधीयाश्च विग्रहे। अप्राप्तव्यवहारश्च दूतो दानोन्मुखो व्रती। विषमस्थाश्च

Indira Gandhi National
Centre for the Arts

८४ नाधिष्ठानं चैतान्नाह्वयेन्नृपः। निर्वेष्टुकामो विवाहप्रवृत्तः। अन्येन वा यन्तरेण। अप्राप्तव्य
वहारः पंचदशवर्षो नधिकवयस्कः। तत्कालेविवाहादितत्तत्क्रियासमाप्तिपर्यं
तकालः। एतेविषमस्थाः उपप्लुतं दशास्था उत्तमर्णादिनानासिध्यानविधारणीयाः।
एतान् प्रागुक्तान् वादिनानिर्वदितानिति शेषः। याज्ञवल्क्यः॥ अभियोगमनिस्तीर्य्यैन
नं प्रत्यभियोजयेत्। अभियुक्तः सन्नुत्तरमदत्त्वाभापावादिनं स्वाभियोगानुपमर्द्दके
न विवादान्तरेणानयोजयेत् युगपदनेकव्यवहारासंभवात्। अत्रैव रंदमाहनारदः
॥पूर्ववादं परित्यज्य योन्यमालंबते पुनः। वादसंक्रमणात् ज्ञेयो हीनवादी स वै नरः। राम·
हीनवादीसु कार्य्यदंड्यतास्त्रचिता। न प्रकृतार्थः हीनतान्यथाछलापत्तेः। अत्रप्रतिप्र ८४
सवमाहनारदः। कुर्य्यात् प्रत्यभियोगं च कलहे साहसेषु च। कलहे वा कृपाहत्येसा
हसेशस्त्रादिप्रहारे अनयोः पूर्वमहमथवेनाकुष्टः प्राप्तिताहतदुत्तत्रापराधाभावा

यप्रत्यभियोगं कुर्य्यात्। तथा च बृहस्पतिः॥ आकृष्टस्तु यदाक्रोशंस्ताडितः प्रति ता ति१
य॰ डयन्। हत्वाततायिनं चैव नापराधी भवेन्नरः। आततायिनमाह प्रायश्चित्तविवेकैव
श्चिदः। अग्निदोगरदश्चैव शस्त्रपाणिर्धनापहः। क्षेत्रदारापहारी च षडेते आत
तायिनः। बृहस्पतिः॥ नाततायिवधे हंता किल्बिषं प्राप्नुयात् क्वचित्। विनाशार्थिन
मायांतं घातयन्नापराध्नुयात्। अत्र किल्बिषाभावः प्रायश्चित्तनिषेधार्थः। अ
पराधाभावो दंडनिषेधार्थः यतः सर्वत्रात्मानं गोपायीतेति श्रुतिमूलमिदं। अतः
पलायनादौ भावे दूरं बोध्यमिति प्रायश्चित्तविवेकः॥ कात्यायनः॥ आततायिनमायां
हिनास्मरक्ष ए॥ ४ तमपि वेदान्तपारगं। जिघांसंतं जिघांसीयान्न तेन ब्रह्महा भवेत्। उद्यम्य शस्त्रमा
यांतं भ्रूणमप्याततायिनं। निहत्य भ्रूणहा न स्यात् हत्वा भ्रूणहा भवेत्। भ्रूणो ब्रा
ह्मणो विशेषः। शेषदर्शनं नियमार्थं। मनुविष्णू॥ गुरुं वा बालवृद्धौ वा ब्राह्मणं वा

ब्राह्मणाविशेषं २३

Indira Gandhi National
Centre for the Arts

८५ वहुश्रुतं आततायिनमायांतं हन्यादेवाविचारयन्। एवकारो नियमार्थः। तथा आ
ततायिवधे दोषो हंतुर्भवति कश्चन। प्रकाशं वाऽप्रकाशं वा मन्युस्तं मन्युमृच्छ
ति। तस्माद्धंतुर्मन्युर्हन्यमानमन्युं नाशयति न पुनः पुरुषो हंति हन्यते वेति ह
ननविधेरपवादः। ननु आततायिनोऽपि गोब्राह्मणयोर्हनने दोषः। आततायि
वधेन दोषः अन्यत्र गोब्राह्मणादित्यादिसुमंतुवचनादिति प्रायश्चित्तविवेको
क्तं युक्तमिति चेन्न भवदेवभट्टचरणैरप्रमाणीकृतत्वात्। यथा यच्च आततायि
वधेन इत्येकं सूत्रं दोषोऽन्यत्र इत्यपरं गोब्राह्मणात्तस्मात् प्रायश्चित्तं कुर्यादि
ति तृतीयं तत्र ब्राह्मणवधप्रायश्चित्तमुक्त्वा यस्तैः संबंधं कुर्यात् तस्याप्येवमेव प्रा रामः
यश्चित्तमित्यभिधाय सुमंतुनोक्तमिदं तेन आततायिवधेन इत्येतत् सूत्रं पू ८५
र्वोक्तप्रायश्चित्तनिषेधकं। दोषोऽन्यत्र इति तु आततायिव्यतिरिक्तवधे दोष उक्तः।

गोब्राह्मणात्तस्मात् प्रायश्चित्तं कुर्यादिति प्रायश्चित्तांगस्नानप्रतिपादकं गोहेतुकं स्ना
नं व्यासेनोक्तं तथा च व्यासः॥ स्नायंते यानि तीर्थानि त्रिषु लोकेषु नित्यशः। अभिषे
कस्समस्तेषां गवां शृंगोदकस्य च। ब्राह्मणाश्वदेनात्र विधिवाक्यमित्यभिप्रेतं। तद्धे
तुकं च स्नानं यथाविहिताघमर्षणादिपूर्वकस्नानं। तेन गोहेतुकं स्नानं ब्राह्मण
हेतुकं वा स्नानं। प्रायश्चित्ताधिकारी भवति न त्वापप्लवनमात्रेणेति वाक्यार्थः। यत्तु
भविष्यपुराणं। हत्वानुप्रहरंतं वै ब्राह्मणं वेदपारगं। कामतोऽपि चरेद्धीरो द्वाद
शाब्दव्रतमुत्तमं। तत् नाततायिविषयं प्रहारशब्दस्य वधानभिधायकत्वात् ते
नायमर्थो भवति यश्चस्तु राघवयवानां प्रकर्षेण प्रहरणोद्यतः। तद्वधे कामतो
पि द्वादशवार्षिकमेव प्रायश्चित्तं। यदपि पापमेवाश्रयेदस्मान् हत्वैतानातता
यिनः। इति भगवद्गीतावचनं तदपि पलायनादिना आत्मरक्षणसामर्थ्यभी

Indira Gandhi National
Centre for the Arts

८६ ष्मादिवधपापभागितावोधकं। एवंच प्रागुक्तकात्यायनवचनं सहजत एव संग
च्छते। इति सुधीभिर्भाव्यं। पूर्वापेक्षया परस्याधिकवाक्पारुष्यादावल्पदंडमा
हनादरः। पूर्वमाह्वाययेद्यस्तु नियतं स्यात्स दोषभाक्। पश्चाद्यः सोऽप्यसत्
कारी पूर्वं तु विनयो गुरुः। विनयो दंडः। युगपत् संप्रवृत्ते नेसमं दंडमाह स एव
वाक्पारुष्ये साहसे वापि युगपत् संप्रवृत्तयोः। विशेषश्चेन्न लभ्येत विनयः स्या
त्समस्तयोः। एवंच दंडोऽयमनपराधमधिकृतपीडनात्। इति भाषायां प्रत्यभि
योगः कार्य एव प्रसवस्कन्नोत्तरं तेन युगपदनेकव्यवहारापत्तिदोषस्याभा
वात्॥ याज्ञवल्क्यः॥ साहसस्तेयपारुष्यगोभिशापात्यये स्त्रियां। विवादयेत्स एम:
द्य एव कालोऽन्यत्रेच्छया स्मृतः। साहसं मनुष्यमारणं। गोरत्र दोह्या अभिशा ८६
पो महापातकादिना असत्ये इत्यनात्मोक्तिः स्त्रियां कुलस्त्रियां चारित्रविवादे दा

स्यां वा स्वत्वविवादे एषु सद्य एव उत्तरं दापयेत्। इति दीपकलिका। विशेषमाह कात्या
यनः॥ यस्मात्कार्यसमारंभश्चिरकालेन विनिश्चितः। तस्मान्न लभते कालमभि
युक्तस्तु कालभाक्॥ अत्रापवादमाह बृहस्पतिः॥ अभियुक्तोऽप्रगल्भत्वात् वक्तुं
नोत्सहते यदि। तदा कालः प्रदातव्यः कार्यशक्त्यनुरूपतः॥ अत्रापि विशेष
माह व्यासः॥ राजदैवकृतो दोषस्तस्मिन्काले यदा भवेत्। अवधित्यागमात्रेण
न भवेत्स पराजितः। तस्मिन्कालेऽवधिकालाभ्यंतरे सकृत समयवंधोऽभियु
क्तः। अवध्यतिक्रमे हेतो राजदैविकदोषस्य प्रमितौ न तदतिक्रमे कोपराध्यति।
जिह्माश्चेतदभिक्रमे कौ दंड्यौ भंगी च भवतीत्याह स्मार्त्तेध्वतं। राजदैवकृतं दोषं सा
क्षिभिः प्रतिपादयेत्। जिह्मो व्यावर्त्तमानस्तु दंड्यो दाप्यश्च तद्धनं। जिह्मः छद्म
कौटिल्यादियुक्तः। तथा च हारीतः॥ छद्मना यो व्याजयुक्तान्निकृतिः काठिन्यमाध्य

Indira Gandhi National
Centre for the Arts

२७ वैषम्याद्यसम्भावयुक्तं जैत्रंयुक्तयोगः ॥ ० ॥ अथ भाषापादः ॥ तत्र कात्यायन
बृहस्पती ॥ प्रतिज्ञादोषनिर्मुक्तं साध्यं सत्कारणान्वितं । निश्चितं लोकसिद्धं च
पक्षं पक्षविदो विदुः ॥ स्वल्पाक्षरः प्रभूतार्थो निःसन्दिग्धो निराकुलः । विरोधिका
रणैर्युक्तो विरोधिप्रतिषेधकः । यदा त्वेवंविधः पक्षः कल्पितः पूर्ववादिना । द
द्यात्तत्पक्षसंवंधं प्रतिवादी तदोत्तरं ॥ अस्यार्थः ॥ प्रतिज्ञा साध्याभिधायिका
वाक् तस्या दोषैः परस्परविरुद्धार्थपदादिभिरयुक्तं साध्यं साधनार्हाभिमता
र्थं पक्षं विदुः अन्यथा प्रतिज्ञादोषेणासाध्यदोषः स्यात् । अत एव नारदेनोक्तं ॥
सारस्तु व्यवहाराणां प्रतिज्ञा समुदाहृता । तद्धानौ हीयते वादी भवंस्तामुत्तरो भवेत् एम·
। तां प्रतिज्ञां उत्तरो विजयी । यद्यप्यत्र साध्यं ज्ञाप्यं तद्विशिष्टधर्मी पक्ष इति भेदः । २०
तथाप्यत्र वाक्प्रसाध्यत्वात्तादिधर्मीविशेषविशिष्टतया धर्मिणोऽधर्मणोर्द्वे

वसाध्यत्वात् साध्यपक्षयोरभेदाभिधानं अत एव उपसंहारे च एवंविधः पक्ष इति भा
षार्थमुक्त्वा भाषास्वरूपप्रपंचमाह स्वल्पाक्षर इति निराकुलः पौर्वापर्यविपर्यासा
दिशून्यः । दूते च व्यवहारे च प्रवृत्ते यत्नकर्मणि । यानि पश्यंत्युदासीनाः कर्त्ता तानि न प
श्यति । ग्राह्यसंग्रहवचनात् उदासीनेभ्यो ज्ञात्वा शोधयेत् । तच्छोधनकालमाह बृह
स्पतिः ॥ न्यूनाधिकं पूर्वपक्षं तावद्वादी विशोधयेत् । न दद्यादुत्तरं यावत् प्रत्यर्थी स
भ्यसन्निधौ । व्यासोऽपि शोधयेत् पूर्वपक्षं तु यावन्नोत्तरदर्शनं । उत्तरेणावरुद्धस्य नि
वृत्तं शोधनं भवेत् । अन्यदुक्तं लिखित्वा योऽन्यदर्थी प्रत्यर्थिनां वचः । चौरवत् शासयेत्तं तु
धार्मिकः पृथिवीपतिः । नारदः ॥ सर्वेष्वर्थविवादेषु वाक्छलेनावसीदति । पशु
स्त्रीभूम्यृणादाने शास्योऽप्यर्थान्न हीयते । सर्वेष्वर्थविवादेषु प्रमादाभिधानेनावसीद
ति । अत्रोदाहरणं पशुस्त्र्यादि अर्थविवादग्रहणात् मन्वुक्तविवादेषु प्रमादा

८८ भिधानेप्रकृतार्थस्यार्थाद्दीयते ऽस्यवगम्यते। यथाहमनेनशिरसि पादेन ताडित इत्यभिधा
यहस्तेन ताडित इति वदन केवलं दंडः पराजीयते च तत्संप्रहं श्राते महोंधारयसिमत
त्प्रमाणेनगहीनतावद्धनकल्वारित्यादिभाषाप्रारीरं। नचसंस्कृतदेशभाषाप्रत्वेनय
थावोधं लेख्यं वक्तव्यं वा मूर्खाणामपिवादिप्रतिवादिनां॥ ० ॥ अर्थान्तरवादः॥त
त्र बृहस्पतिः॥ यद्वा त्वेवंविधः पक्षः कल्पितः पूर्ववादिना। दद्यात्तत्पक्षसंबंधं प्रतिवा
दी तदुत्तरं। संबंधमुपयुक्तं अन्यथा अन्यवादित्वेन भंगप्रसंगात्। अन्यवादी क्रिया
द्वेषी नोपस्थायी निरुत्तरः। आहूतप्रपलायी च हीनः पंचविधः स्मृतः। प्रपलायी वि
पक्षेणामौनकृतसप्रभिदिनैः। क्रियाद्वेषी तु मासेन सार्द्धेन भिन्नस्तत्तत्प्रमाणादितिनार राम·
दोक्तेः। अत्रोत्तरस्वरूपं तद्दोषांश्चाह नारदः। पक्षस्य व्यापकं सारमसंदिग्धमनाकुलं। ८८
अव्याख्यागम्यमित्येवमुत्तरं तद्विदो विदुः। पक्षस्य भाषार्थस्य व्यापकं अभियोगप्रति

कूलमितियावत्। अतएव पूर्वपक्षार्थसंबंधं प्रतिपक्षं निवेशयेदित्युक्तं। सारं प्रकृतोपयो
गि। अनाकुलं पूर्वापरविरोधशून्यं अव्याख्यागम्यं अध्याहारादिकं विनैव प्रतीतं॥ ०॥
उत्तराभासमाह कात्यायनः॥ प्रकृतेनत्वसंबंधमसत्यमतिभूरि च। पक्षैकदेशव्याप्यं च त
च्चैवोत्तरं भवेत्। अस्तव्यस्तपदव्यापि निगूढार्थं तदाकुलं। व्याख्यागम्यमसारं च नो
त्तरं मन्यते बुधैः। अस्तव्यस्तपदव्यापि अनन्वितार्थपदव्याप्तमिति व्यवहारतिलके भव
देवभट्टचरणैर्व्याख्यातं। उत्तरं विभजते नारदः॥ मिथ्यासंप्रतिपत्तिश्च प्रत्यवस्कन्दनं
तथा। प्राङ्न्यायश्चोत्तराः प्रोक्ताश्चत्वारः शास्त्रवेदिभिः। अभियुक्तोभियोगस्य यदि कु
र्यादपह्नवं। मिथ्यातत्तु विजानीयादुत्तरं व्यवहारतः। अभियुज्यते इत्यभियोगः। सहेतु
कं साध्यं तस्यापह्नव इत्यर्थः। मिथ्योत्तरभेदमाह तु व्यासनारदौ॥ मिथ्यैतन्नाभिजा
नामि मम तत्र न सन्निधिः। अजातश्चास्मि तत्काले इति मिथ्याचतुर्विधा। मिथ्यैतदिति

Indira Gandhi National
Centre for the Arts

९८ शाठ्यतः नाभिजानामीत्यादिकमर्थितोऽपह्नवः। तथा चाह कात्यायनः॥ श्रुत्वाभाषार्थमन्य
स्तु यदि तं प्रतिषेधति। अर्थतः शब्दतो वापि मिथ्या तज्ज्ञेयमुत्तरं। त्वं मह्यं शतं धारय
सीति प्रतिज्ञायां मया न गृहीतं इति शब्दतः। कालविशेषगर्भायां तस्यां तस्मिन्नाहं जा
त इत्यर्थः। देशकालगर्भायां तस्यां तदा तत्र नाहमासमित्यर्थः। देशादिमत्सां तच्छू
न्यां यां वा तस्यां न जानामीत्यर्थतः। एवं योग्यास्मरणोनार्थतस्तद्ग्रहणप्रतिपादना
त च रमत्रयं ग्रहणास्कंदनमुखेन ग्रहणाभावप्रतिपादकं सापदेशमिथ्योत्तरं
आद्यं मिथ्योत्तरमात्रं संप्रतिपत्तिमाह बृहस्पतिः॥ श्रुत्वाभियोगं प्रत्यर्थी यदि तं
प्रतिपद्यते। सा तु संप्रतिपत्तिः स्यात् शास्त्रविद्भिरुदाहृता॥ अभियुज्यतेऽनेनेत्यभियोगः राम:
प्रतिपद्यते अंगीकरोतीति तं साध्यार्थं प्रत्यवस्कन्दनमाह स एव॥ अर्थिनाभिहितो योऽर्थः ९८
प्रत्यर्थी यदि तं तथा। प्रपद्य कारणं ब्रूयात् प्रत्यवस्कन्दनं हि तत्। तथा प्रपद्य सत्यत्वेनां

गीकृत्य कारणां तत्प्रतिकूलरूपकारणं ब्रूयात् तदा तदुत्तरं प्रत्यवस्कन्दनं वाद्युक्तस्यैव प्र
तिकूलत्वेन वचनमित्यर्थः। प्रतिपन्नावस्कन्दनात् प्रत्यवस्कन्दनमिति व्यवहारमा
तृका। तच्च कारणोत्तरं त्रिविधं बलवत्तुल्यबलं दुर्बलं चेति आद्योत्तरं यथा मया सत्
शतं गृहीतमिति सत्यं किंतु परिशोधितमिति। अत्रोत्तरवादिन एव क्रिया निर्दे
शः। यथाह नारदः॥ आधर्ष्यं पूर्वपक्षस्य यस्मिन्नर्थवशाद्भवेत्। विवादे साक्षिणस्त
त्र प्रष्टव्याः प्रतिवादिनः। आधर्ष्यं दुर्बलत्वं पूर्वपक्षस्य। मध्यमोत्तरं यथा मदीयेयं
भूमिः क्रमागतत्वादिति वादुक्तं। मदीयेयं भूमिः क्रमागतत्वादिति प्रतिवादिनापि तथो
त्तरमिति अत्र पूर्ववादिनः साक्ष्युपन्यासः। तदसत्वे प्रतिवादिनः। साक्षिद्वैधे यतः
सत्सु साक्षिणः पूर्ववादिनः। पूर्वपक्षेऽधरीभूते तत्तरं तु उत्तरवादिनः। इति याज्ञवल्की
यात्॥ उभयतः वादिप्रतिवादिनोः साक्षिणः प्रष्टव्या इति शेषः। अधरीभूते वादिनं

Indira Gandhi National
Centre for the Arts

९० साक्ष्युपन्यासासामर्थ्यात्। अंशोत्तरं यथा ममेयं भूः क्रमागतत्वादिति वा पुत्रक्रमेणमेयं भूरीश्वरा
वीपभुज्यमानत्वात् इत्युत्तरं अत्र जयपराजयौ प्रागुक्तभोगानुसारेणाव्यवस्थाप्यौ
तत्र क्रमागतत्वे पूर्ववादिनः प्रमाणोपन्यासः। तथा चोक्तं। गुणव्यभिहिते हेतौ प्रतिवा
दिक्रिया भवेत्। दुर्बले वादिनः प्रोक्ता क्रियानुस्येपि वादिनः। प्राङ्न्यायमाह बृहस्प
तिः॥ आचारेणावसन्नोपि पुनर्लेखयते यदि। सोभिधेयो जितः पूर्वं प्राङ्न्यायस्तु स
उच्यते। आचारेणाव्यवहारेण अवसन्नोभंगी लेखयते भाषामिति शेषः। स वादी
अस्मिन्नर्थे मया पूर्वं पराजितो वाच्यः। प्राङ्न्यायलक्षणा या मानत्वसामान्याभावज्ञाप
कः॥ मिथ्योत्तरादीनां संकरे का व्यवस्थेत्याकांक्षायामाहतुर्व्यासहारीतौ॥ मिथ्यो एम.
त्तरं कारणं चस्यातामेकत्र चेदुभे। सत्यं चापि सहानेन तत्र ग्राह्यं किमुत्तरं। मिथ्याका ९०
रणयोर्वापि ग्राह्यं कारणमुत्तरं। यत्प्रभूतार्थविषयं यत्र वास्यात्क्रियाफलं। उत्तरं

तत्तु विज्ञेयमसंकीर्णमतोन्यथा। एकाभियोगे ऽनेकग्रहणं मिथ्या किंतु पंचाशदेव परि
गृहीताः। तास्त्वपरिशुद्धा इति मिथ्याकारणयोः प्राप्तौ सहएकैककारणोत्तरं ग्राह्यं। आ
द्दो विचारणं। यं परिशोधनस्यार्वाचीनत्वेन स्मरणाहेतुत्वात् पश्चान्मिथ्योत्तरं तत्र
ऋणस्य चिरातीतस्य कष्टप्रतिपाद्यत्वादिति एवं नवसभियोगे मिथ्योत्तरषष्टिः पु
राणा एव गृहीतास्तत्रापि त्रिंशत्परिशुद्धास्त्रिंशदशुद्धा इत्यामीति मिथ्याकारणास
सेः संकीर्णोत्तरेपि पूर्ववत्कारणोत्तरं एवं ग्राह्यं मिथ्याकारणयोर्वापीति वापि
शाखान्तरत्वाद्दर्शितत्वात्। सत्योत्तरस्य स्वयंस्वीकारेणानिर्णेयानहेत्वादिति भावः
। प्राङ्न्यायेन सह नकस्यापि संकर्षमिति तन्नोक्तं यदि तु शतं मिथ्या परं तु विंशति
पुराणा गृहीतास्तु च परिशुद्धास्तदा मिथ्यां प्राप्य प्रचुरार्थविषयकस्य विचारउप
क्रमणीयोभयोऽनुरोधस्याभ्यर्हितत्वात्। पश्चात्स्वल्पार्थस्य विचारः। तुल्यार्थविषय

Indira Gandhi National
Centre for the Arts

२१ देतुयत्रक्रियायाःसाम्येऽपिफलंनिर्णयःशीघ्रंभवतितदंशस्यैवप्रमाणंग्राह्यंयथाय
दिष्टातग्रहणपत्रमस्तिस्थाताप्रूवेचपंचाशतपरिशोधनेसाक्षिणस्तदाभिश्योत
एवादीनतत्रखंडनायग्रहणपत्रंग्राह्यंलिखितस्यसाक्षिभ्योबलवत्वेनसम्यक्
निर्णयकारित्वात्पश्चात्पंचाशतपरिशोधनेसाक्षिणःप्रष्टव्याः॥ ० ॥अथक्रि
यापादः॥तत्राभिधानान्तरंयाज्ञवल्क्यः॥अतोऽर्थीलेखयेत्सद्यःप्रतिज्ञातार्थ
साधकं।अत्रार्थीवादीप्रतिवादीचसपक्षार्थित्वात्॥व्यासः।प्राङ्न्यायेकारणोक्तौच
प्रत्यर्थीसाधयेत्क्रियां।मिथ्योत्तरेपूर्ववादीप्रतिपत्तौनसाभवेत्।मिथ्योत्तरेसौ
गृहीतंमयेसाक्षिहस्तेपूर्ववादीभाषावादीक्रियांसाधयेत्सान्नादिकंनिर्दिशेत्।अ राम
त्रोत्तरवादिनोनक्रियासाधकत्वं।अत्रमानुष्याःक्रियायाअसंभवादितिन्यायमतं २१
अत्रापिसाध्यासंभवेउत्तरवादिनएववदिव्यं।नकश्चिदभियोक्तारंदिव्येषुविनियो

जयेत्।अभियुक्तायदातव्यंदिव्यंदिव्यविशारदैरितिकात्यायनोक्तेः।अत्रपूर्वोद्दे
नार्थिनोदिव्यनिषेधेऽर्थात्प्रत्यर्थिनस्तत्प्राप्तौपराह्वाभिधानंसिद्धंससारं
भोनियमायइतिन्यायात्रियमार्थः।लिखनाद्यसंभवेदिव्यान्याहयाज्ञवल्क्यः
॥प्रमाणंलिखितंभुक्तिःसाक्षिणश्चेतिकीर्तितं।एषामन्यतमाभावेदिव्यान्य
तममुच्यते॥याज्ञवल्क्यः।निह्नुतेलिखितानेकमेकदेशोविभावितः।दाप्यःस
र्वान्नृपेणार्थान्नग्राह्यस्त्वनिवेदितः।योलिखितानेकसुवर्णादिकमपनयति
सएकद्रव्येसाक्ष्यादिभिर्विभावितःसर्वान्दद्यात्॥यद्येकदेशविभावनेनवा
दिनोऽवसादमवगम्यद्रव्यमपरंमयालेखयितुंविस्मृतमितिब्रूते।सभाषा
कालेऽनुपन्यस्तंनम्नद्यात्।एतच्चनकेवलंवाचनिकंकिंत्वेकदेशविभावना
त्तविजानतएवतस्यतदपलापेनचौरत्वावधारणात्पराजयोपितथात्वमेव

Indira Gandhi National
Centre for the Arts

६२ संभाव्यते। तस्य विभावकस्यापि प्रकृतविषये यथावस्थावधारणात्। अविभावि
तांशेऽपि तस्य वादिना संभावनमित्येवं रूपतर्कोपरनामसंभावनाप्रत्ययानुगृहीता
त्स्मादेव योगीश्वरवचनात् सर्वं दापनीयमिति निर्णयः। एवं च तर्कवाक्यानुसारे
णानिर्णीये क्रियमाणे वस्तुनो व्यथालेविप्रवहारदर्शिनां न दोषः। इति स्मार्त्तभ
ट्टाचार्याः प्राहुः॥ यागलौकमनुसारिमेथिलाख्यस्य येषां मध्ये एकमपि मयागृ
हीतं विभावयति तदा सर्वमेव दातव्यमिति प्रतिज्ञावादिविषयत्वमेकदेशावि
भावितवचनस्येत्याहुः। तच्चिन्त्यमेवं च॥ साध्यार्थांशे निगदिते साक्षिभिः सकलं भ
वेत्। स्त्रीसंगसाहसस्तेयेष्वयतत्साध्यं परिकल्पितमिति कात्यायनवचनं तद्विष दम:
यपरदर्शकमात्रं। तेन न्यूनत्वानिः ते पाद्यपह्नवेपि याज्यं यत्तु अनेकार्थाभियोगे ६२
पियावत्संसाधयेद्धनं। साक्षिभिस्तावदेवासौ लभते साधितं धनं। इति कात्याय

नवचनं तद्दत्तानभिज्ञपुत्रादिकविषयकं। तथा च नानाविधपित्रर्णाद्यभियुक्तस्याज्ञा
नतो नाहं जानामीत्युत्तरे वादी साक्ष्यादिभिर्यावद्धनं प्रतिपादयति तावदेव पुत्रेण
दातव्यमिति स्मार्त्तविश्वजीमूतवाहनादयः प्राहुः। अनुमानादूरसाक्षीत्यादिना
पूर्वं साक्ष्यादिभ्योऽनुमानं न ह्युक्तं साम्प्रतमनुमानप्रकारमाह मनुः॥ बाह्यैर्विभा
वयेल्लिङ्गैर्भावमन्तर्गतं नृणां। स्वरवर्णेङ्गिताकारैश्चक्षुषा चेष्टितेन च। स्वरो
गद्गदादिः वर्णोऽस्वाभाविकः। इङ्गितं स्वेदवेपथुरोमाञ्चादि आकारो विकृतः। चक्षु
षा कातरेणा चेष्टितेन स्थानत्यागादिना एषां चानन्यथासिद्धेरिति दुर्निरूप्यत्वात्।
एभ्यः साक्षी बलवानिति प्रागुक्तं याज्ञवल्क्यः। देशाद्देशान्तरं याति सृक्किणी परिलेढि च।
ललाटं स्विद्यते चास्य मुखं वैवर्ण्यमेति च। परिशुष्यत्स्खलद्वाक्यो विरुद्धं बहु भाष
ते। वाक् चक्षुः पूजयति नो तथोष्ठौ निर्भुजत्यपि। स्वभावाद्विकृतिं गच्छेन्मनोवाक्काय

Indira Gandhi National
Centre for the Arts

६३ कर्म्मभिः।अभियोगेचसाक्षीचदुष्टःस्यात्परिकीर्त्तितः।नपरोक्तांवाचंप्रतिवचनेनपूज
यतिचक्षुश्चपरकीयवीक्षणेननिर्भुजतिकुटिलीकरोति।यदामनोवाक्कायक
र्म्मभिःस्वभावात्पूर्वोक्तांयथायोग्यांविकृतिंगच्छेत्तदासदुष्टइत्यर्थः॥बृहस्प
तिः॥ ॥लेख्यंवासाक्षिणोवापिविवादेयस्यदूषिताः।तस्यकार्यंनसिद्ध्येत्यावत्त
न्नविशोधयेत्।तल्लेख्यसाक्षिरूपंप्रमाणंलेख्यशोधनप्रकारमाहकात्यायनः
॥स्वहस्तलेख्यसन्देहेजीवतोवामृतस्यवा।तत्स्वहस्तकृतैरन्यैःपत्रैस्तल्लेख्यनि
र्णयः॥ ० ॥अथलिखितं॥तच्चद्विविधंतदाहनारदः॥लेख्यंतुद्विविधंप्रोक्तं
स्वहस्तान्यकृतंतथा।असाक्षिकंसाक्षिमच्चसिद्धिर्देशस्थितेस्तयोः।मृताःसा राम:
क्षिणोयत्रधनिकर्णिकलेखकाः।तदप्यर्थकरणंमतेनाधिःस्थिराश्रयात्तार ६३
श्रितप्रतिकालंचपाठितंस्मारितंचयत्।लेख्यंसिद्ध्यतिसर्वत्रमृतेष्वपिचसाक्षि

षुलेख्येदेशान्तरस्थेचदग्धेदुर्लिखितेहृते।सतस्तत्कालहरणमसतोदृष्टदर्शनं॥
छिन्नभिन्नहृतोन्मृष्टनष्टदुर्लिखितेषुच।कर्त्तव्यमन्यल्लिखितंह्येषलेख्यविधिःस्मृ
तः।लेख्यंयच्चान्यनामाङ्कंहेत्वन्तरकृतंभवेत्।विप्रतिपत्तौपरिसंततत्संबंधागमहे
तुभिः।स्वलेख्यमसाक्षिकमपिप्रमाणं।अन्यहस्तात्लेख्यंसाक्षिमदितियथासंख्य
मन्वयः।देशस्थितेर्यस्मिन्देशेयादृशीलेख्यस्थितिः।प्रवर्त्ततेतत्रतादृश्यपाःतयोः
स्वहस्तान्यहस्तकृतयोः।मृताइतिसाक्ष्यादौमृतेषुत्र्यादिस्थंलेख्यंस्वतंत्रंनसिद्ध्यति
।यद्याधिभोगोऽस्तितदातदपिप्रमाणमित्यर्थः।व्यक्तमाहकात्यायनः॥यत्रपंच
त्वमापन्नोलेखकःसहसाक्षिभिः।ऋणिकोधनिकश्चैवतेनैवपत्रंप्रमानयेत्।राज्ञि
तमितितथाविधमपिपत्रंयदिपूर्वमृणिकादिसन्निधौराश्रितंपाठितं।स्मारितं
बाधनिकेनान्येनवातदातदपिसिद्ध्यतीत्यर्थः।सतोदेशान्तरस्थस्यपत्रस्यतत्का

२४ लहरणां पत्रानयनकालप्रतीक्षणं असतोरर्थादेः नरव लोककोपन्यासः। लेख्यमिति
यत्पत्रं केनापि हेतुना अस्मनामचिह्नितं। तत्र विप्रतिपत्तौ यन्नाम्ना पत्रं तेन सहा
स्य विस्वासहेतुभूतं संबंधागमरूपकारणं निर्णेतव्यं। लेख्यस्याप्रामाण्यसंका
यां लेख्यगृहीत्रा प्रागुक्तशोधनप्रकारेण तन्निरसनीयं तत्पुत्रेणानुलेख्याधीन
भोग एव उपन्यासो न तु लेख्यमुद्धरणीयमिति आह कात्यायनः॥ आहर्त्ता भुक्तियु
क्तोपि लेख्यदोषान्विशोधयेत्। तत्सुतो भुक्तिदोषांस्तु लेख्यदोषांस्तु नाप्नुया
त्॥ बृहस्पतिः॥ उद्धरेल्लेख्यमाहर्त्ता तत्पुत्रो भुक्तिमेव तु। अभियुक्तप्रमीतस्य
तत्सुतोपि तदुद्धरेत्। अभियुक्त इति लेख्यसाधुत्वज्ञानार्थं अभियुक्ते लेख्य एम
गृहीतरि तरविज्ञायैव मृते तत्पुत्रेणात्तत्साधुत्वं साध्यमित्यर्थः। तत्साधनं च ल २४
स्तलिखनादिनेति प्रागुक्तं नारदः॥ अभीक्ष्णं चोद्यमानोऽपि प्रतिहन्यान्न तद्वचः

त्रिश्चतुः पंचकृत्वो वा परतोर्थं समाहरेत्। यदाधनिकेनाधमर्णिकस्त्रिश्चतुः पंच
कृत्वो वा त्वमिदं देहि धारयसि इति पुनः पुनर्दृश्यमानोऽपि तद्वाक्यप्रतिघातं न कृत
वान् तदोत्तरकालमनेनाभ्युपगतोऽयमर्थमिति निर्णीय तदर्थमर्णिकाद्दाप
येदित्यर्थः॥ मनुः॥ अर्थेऽपव्ययमानं तु कारणेन विभावितं। दापयेद्धनिकस्या
र्थं दंडलेशं च शक्तितः। अपव्ययमानं अपलपंतं कारणेन साक्ष्यादिप्रमाणेन॥
॥०॥ अथ निर्णयपादः॥ तत्र नारदः॥ यस्याहुः साक्षिणः सत्यां प्रतिज्ञां स जयी
भवेत्। अन्यथा वादिनो यस्य ध्रुवस्तस्य पराजयः। स्वयमभ्युपपन्नोऽपि स्वचर्या
वसितोऽपि सन्। क्रियावसन्नोऽप्यर्हेनु परं सभ्यावधारणं। सभ्यैरवधृतः पश्चा
त्पणान्दाप्यः स्वधर्मात्स्वतः। यस्य वादिनोः प्रतिवादिनो वा साक्षिणः सत्युपलक्ष
णं साक्षिलिखितभुक्तियुक्तिदिव्यसंपथानां मध्येऽन्यतमं प्रमाणं यस्यैव प्रति

Indira Gandhi National
Centre for the Arts

९५ त्वासत्त्वप्रतिपादकं स एव जयी। अन्यथा पराजय इति प्रश्नेन त्वं। स्वयमभ्युपप
न्न आत्मनैवांगीकृतपराजयः। स्वचर्य्यावस्थितकम्पस्विन्नवैवर्ण्यादिना परा
जितत्वेनावधारितः। क्रियावसन्नः साक्ष्यादिना पराजयं परमनेनतरं सम्भाव
धारणमर्हेत सभासदो मिलितानां पराजितोयमिति निर्णयमर्हेत॥ ० ॥अ
थ साक्ष्यविधिः॥ तत्र साक्षिणमाह मनुः॥ समक्षदर्शनात्साक्ष्यं श्रवणाच्चैव
सिध्यति। एतत्तु प्रमाणमात्रोपलक्षणं। अनुभावी च यः कश्चिन्नु कुर्यात्साक्ष्यं
विवादिनां इति मनुवचनान्तरात्। अकृतमपि साक्षिणमाह स एव॥ यत्रानि ता·
बद्धोवीक्षेत शृणुयाद्वापि किंचन। पृष्टस्तत्रापि तद्ब्रूयात् यथादृष्टं यथाश्रुतं। ९५
अनिबद्धस्त्वमत्र साक्षी भवद्वत्यनियुक्तः। परंपरयापि श्रवणमाह नारदः
॥साक्षिणमपि यः साक्ष्यं समक्षं परिभाषते। श्रवणात्श्रावणाद्वापि स सा

क्ष्युत्तरसंज्ञकः। साक्ष्यं परिभाषतां वचो यः स्वयं शृणोति अर्थिना वा श्राव्यते स श्रव
णात् श्रावणाच्च उत्तरसंज्ञकः साक्षी स्मृतः॥ एवं योऽर्थिना गूढतया प्रत्यर्थि
वचनं श्रावितः स गूढसाक्षी यथा स एव। अर्थिना स्वार्थसिद्ध्यर्थं प्रत्यर्थिवच
नं स्फुटं। यः श्राव्यते श्रुतो गूढो गूढसाक्षी स उच्यते। तेनान्यतरवाद्यभिहितार्थ
विश्रायकमदृष्टकरणजं ज्ञानं साक्ष्यमिति स्थितं। तत्र नारदः॥ तेषामपि न बालः
स्यान्नैको न स्त्री न दुष्टकृत्। न बांधवो न चारातिर्ब्रूयुस्ते कार्यमन्यथा। कार्यं स समपि
अन्यथा मिथ्यात्वेन ब्रूयुः। एवं च यदि परमधार्मिकत्वेन बांधवारीनामपि सत्यवा
दित्वं निश्चीयते। तदा तेपि साक्षिणो भवंति। तेषां साक्ष्याभिधायकं वक्ष्यमाणमनु
वचनमपि एतद्विषयकं॥ याज्ञवल्क्यः॥ अवराः साक्षिणो ज्ञेयाः श्रौतस्मार्त्तक्रि
यापराः। यथाजाति यथावर्णं सर्वे सर्वेषु वा स्मृताः। यथाजाति यो यज्जातीयः तस्य

Indira Gandhi National
Centre for the Arts

२६ तत्रातीयः साक्षी। यथा स्त्रीणां स्त्रियोऽन्त्यजानामन्त्यजाः। यथा वर्णा ब्राह्मणानां ब्राह्मणाः
क्षत्रियाणां क्षत्रियाः॥ अभावे तु तत्तद्वर्णं विना सर्व एव॥ याज्ञवल्क्यः॥ उभयानुमतः
साक्षी भवत्येकोऽपि धर्मवित्। उभयानुमतत्वं धर्मवित्त्वं च मिलितं तन्त्रं। यथा विष्णुः
॥ अभिमतगुणसंपन्नस्तूभयानुमत एकोऽपि। अत एव श्रोत्रियमप्येकं निषेध-
यति। न च समाथवा पंचत्वात्त्रय एव वा। उभौ तु श्रोत्रियौ ग्राह्यौ नैकं पृच्छेत्क-
दाचन। एकोऽभिमतगुणसंपन्नः उभयानुमतः प्रधानकल्पः तदभावे उभयानु-
मतमात्रोऽपि ग्राह्यः। तथा च नारदः॥ उभयानुमतो यः स्यात् द्वयोर्विवदमानयोः।
भवेदेकोऽप्यसौ पृष्टः प्रष्टव्यः स्यात् स संसदि। उभयानुमत एकोऽलुब्धोऽस्तेनत्वा- एम
दिना सर्वजनसिद्धश्चेत् तदा साक्षित्वेन सभायां प्रष्टव्यः। तथा लेखितहदेवादिस्म- २६
त्येकार्थं लिङ्गिया समाभिधानसंभवादिप्रायः विचारस्य तत्तन्निर्णयार्थत्वात्।

तथाह मनुः॥ एकोऽप्यलुब्धः साक्षी स्यात् बह्व्यः शुच्योऽपि न स्त्रियः। स्त्रीबुद्धेरस्थिरत्वाच्च दोषैश्चा-
न्येऽपि ये स्थिताः। एको लुब्धस्त्वसाक्षी स्यात् इति व्यवहारमातृकायां पाठो न युक्तः। लुब्धा-
श्चान्ये बहवोऽपि साक्षिणो न भवन्ति इत्येकपदस्य वैयर्थ्यापत्तेः। भवतु वा तत्र पाठः तथा-
प्येकानुरोधात् तन्निषेधमुखेनालुब्धस्योभयानुमतिसत्त्वे धर्मवित्त्वमन्तरेणासाक्षित्वं
बोध्यते इत्यर्थतो न विरोधः। अत एव विष्णुरूपप्रभृतीनामुभयानुमत एक एव साक्षी-
ति व्याख्याने धर्मविदिति नोक्तं। शेषः स्तेयादिभिः तथा च नारदः। स्तेनाः साहसिका-
धूर्त्ताः कितवाः क्रोधकाश्च ये। असाक्षिणस्ते दुष्टत्वात्तेषु सत्यं न विद्यते। कितवो धू-
तकारः अत्रापवादमाह उशनाः। दासान्धवधिरकुष्ठिस्त्रीबालस्थविरादयः। एते-
ष्वनभिसंबन्धाः साहसे साक्षिणो मताः। स्थविरोऽग्लानेन्द्रियग्रामः। आदिशब्दात्कित-
वादयः। उभयानुमतत्वाभावेऽपि शुचिक्रियत्वादिगुणयुक्त एको ग्राह्यः। तथा च व्यासः॥

Indira Gandhi National
Centre for the Arts

९७ शुचिक्रियश्च धर्मज्ञः साक्षी यत्रानुभूतवाक्। प्रमाणमेकोपि भवेत् साहसेषु विशेषतः
॥ अनुभूतवाक् स्थानान्तरे ससवादित्वेन ख्यातः। साहसमाह नारदः। मनुष्यमारणं
स्तेयं परदाराभिमर्षणं। पारुष्यमुभयं चेव साहसं पंचधा स्मृतं। उभयं वाग्दंडभेदात्
। कात्यायनः॥ अभ्यंतरेणनिक्षेपे साक्ष्यमेकोपि दापयेत्॥ अर्थिना प्रहितः साक्षी भवे
देकोपि याचितेः। संस्कृतं येन यत्पण्यं तत्तेनैव विभावयेत्। एक एव प्रमाणं स्यात्
सविवादे प्रकीर्त्तितः। संस्कृतं निर्म्मितं पण्यं कुंडलादि। विष्णुः॥ स्तेयसाहसवाग्द
ण्डपारुष्यग्रहणेषु च साक्षिणो न परीक्षेत। स्तेयपरदारादिकर्म्मणां निहूवे नैव क्रि एमः
यमाणत्वादेवादिवपरं साक्षिणो भवंतीति कृत्वा न साक्षिणां परीक्षेति उक्तं। तेषां ९०
वाक्यं तु मित्रारिभावादिनिरूपणेन तु पक्षानुपपत्तिभ्यां आलोचनीयं। न नु क
थमात्रादिति व्यवहारमातृका। अत एव कात्यायनः॥ ऋणादिषु परीक्षेत साक्षिणः

स्थिरकर्मसु। साहसेषु यथा कैनैव परीक्षा कुत्रचित् स्मृता॥ श्रोत्रियादीनामसाक्ष्यमाह
नारदः। श्रोत्रियास्तापसा वृद्धा ये तु प्रव्रजिता नराः। वचनानैव साक्षित्वं नात्र हेतुरु
दाहृतः॥ श्रोत्रियमाह देवलः॥ एकां शाखां सकल्पां वा षड्भिरंगैरधीत्य वा। षट्क
र्म्मनिरतो विप्रः श्रोत्रियो नाम धर्मवित्। वचनादिति श्रोत्रियादिरूपाभिधानात्।
न तत्रान्यो हेतुः। तथा च तेषां स्वीयवैदिककर्म्मकरणव्यग्रतया परकीयकार्य्यस्य
विस्मरणसम्भवात् साक्षित्वरूपलघुकार्य्यं तच्छापभयेन व्यवहारदृष्टोपि न
तानएचंतीति तत् साक्षिकरणानर्थक्याच्च। न ते साक्षिणः कर्त्तव्याः। किंतु यदिस्व
यमकृता अपि साक्ष्यं वदंति तदा साक्षिणो भवंत्येव। उभौ तौ श्रोत्रियौ स्यातामिति
वचनात् वृद्धस्यासाक्षित्वं ग्लानेंद्रियत्वात्॥ मनुः॥ स्त्रीणां साक्ष्यं स्त्रियः कुर्युर्द्वि
जानां सदृशा द्विजाः। शूद्राः संतश्च शूद्राणामंत्यानामंत्ययोनयः। अंतर्वेश्मन्यर

Indira Gandhi National
Centre for the Arts

९८ गपिवाप्राणिरस्यापिचात्मयेस्त्रियाथसंभवेकार्य्यनालेनस्थापिरेनवा।शिष्येणावंधु
नावापिदासेनभृतकेनवा।देवब्राह्मणसान्निध्येसाक्ष्यंपृच्छेतऋतंद्विजान्।उ
दङ्मुखान्प्राङ्मुखान्वापूर्वाह्णेवैशुचिःशुचीन्।ब्रूहीतिब्राह्मणंपृच्छेत
सत्यंब्रूहीतिपार्थिवं।गोबीजकांचनैर्वैश्यंशूद्रंसर्वैस्तुपातकैः।गोबीजकांचना
पहारेयत्पापंतत्तवानृतभाषणेस्यादितिवैश्यंपृतत्साक्षान्ताभिधानेभ
वानसर्वपातकैःसम्बध्यतेइत्युक्त्वाशूद्रंपृच्छेत।ब्रह्मघ्नोयेस्मृतालोकायेचस्त्री
बालघातिनः।मित्रद्रुहःकृतघ्नस्यतेतेस्युर्वदतोमृषा।इतिमनूक्तंदूषणंश्राव
येत।कृतघ्नमाह॥भक्तपिंडापहर्त्ताचमित्रपिंडापहारकः।कृतस्यहोषवदति गम·
सकामात्मकृतोतियः।तस्मात्दृहीनाविघांचरहितंणनप्रयच्छति।नस्मरेच्च ९८
कृतंयश्चआश्रमान्यश्चदूषयेत।पुत्रांस्त्रियश्चयोद्वेष्टियश्चतान्घातये

न्नरः।सर्वांस्तानृषिभिःसार्द्धंकृतघ्नानब्रवीन्मनुः॥बौधायनः॥पंचपश्वनृतेहंतिदश
हंतिगवानृते।शतमश्वानृतेहंतिसहस्रंपुरुषानृते।हंतिजातानजातांश्चहिर
ण्यार्थेनृतंवदन्।सर्वंभूम्यनृतेहंतिसासंसार्ग्गीमृषावदन्।अश्वमेधसहस्रंच
सत्यंचतुलयाधृतं।अश्वमेधसहस्राद्धिसत्यमेवातिरिच्यते।इतिमनुनारदोक्तं
फलंश्रावयेत॥याज्ञवल्क्यः॥नददातिहियःसाक्ष्यंजानन्नपिनराधमः।सकूटसा
क्षिणांपापैस्तुल्योदंडेनचैवहि॥कात्यायनः॥अवीचिनरकेकल्पंवसेयुःकूटसा
क्षिणः।तत्रापवादमाह॥वर्णानांहिवधोयत्रतत्रसाक्ष्यनृतंवदेत।तत्पावना
यनिर्वाप्यःचरुःसारस्वतोद्विजैः।गोतमः॥नानृतवचनेदोषोजीवनंचेत्तदधीनंन
तुपापीयसोजीवनमिति।महाभारते॥नमर्मयुक्तंवचनंहिनस्तिनस्त्रीषुराजन्न
विवाहकाले।प्राणात्ययेसर्वधनापहारेपंचानृतान्याहुरपातकानि॥कात्यायनः॥

Indira Gandhi National
Centre for the Arts

९९ समवेतैश्च यद्दृष्टं वक्तव्यं तत्तथैव हि। विभिन्नेनैव कार्य्यं तु तद्वक्तव्यं पृथक् पृथक्।
भिन्नकाले यत्कार्य्यं विज्ञातं तत्र साक्षिभिः। एकैकं वादयेत्तत्र भिन्नकाले तु तद्गु
गुः। नारदेऽपि विविक्तैर्वा समस्तैर्न स संप्रयत्नतः। वक्तव्यं साक्षिभिः साक्ष्यं विवादस्था
नमागतैः। अनुद्दिष्टेन चित्तेन दृष्टं सम्यग्विदन्तु यत्। प्रसक्तं तत्तत्स्मृतं कार्य्यसा
क्ष्यं साक्षी तु तद्वदेत्। तथा यः साक्ष्यं श्रावितोऽन्येभ्यो निह्नुते तमसाधुनः। सदा
प्योऽष्टगुणं दण्ड्यं ब्राह्मणं तु विवासयेत्। स मन्येभ्यः साक्ष्यं श्रावयेति वादिनप्रयु
क्तो यः श्रावितः एवं भूतोपि सभायां निगदकाले साक्ष्यं निह्नुते यस्तस्माष्टगुणं
दंडं दद्यादित्यर्थः ॥ याज्ञवल्क्यः ॥ द्वैधे बहूनां वचनं समेषु गुणिनां तथा। गुणिद्वैधे एम·
तु वचनं ग्राह्यं ये गुणवत्तराः। तेषां वचो ग्राह्यमित्यर्थः। यत्तु कात्यायनवचनं सा ९९
क्षिणां लिखितानां च निर्दिष्टानां तु वादिना। तेषामेकोऽन्यथावादी भेदात्सर्वेऽथ

साक्षिणः। इति तत्त्रयाणां साक्षिणां मध्ये एकस्यान्यथावादेऽपरस्य तत्तुल्यस्य
त्प्रतिपन्नतया तृतीयस्य किंचिद्वादित्वे तत्र भेदात्। परस्परविरुद्धार्थाभिधानभे
दात्। साक्षिभ्यो न निर्णयः इत्येतत्परं। बृहस्पतिः लक्षयद्वक्रमेति स्थानां ग्रहणमाह
। गुणिद्वैधे क्रियावत्त्वमिस्तेन न तुल्यरूपाणां द्वैधे तु न साक्षिभ्यो निर्णयः किं तु दिव्यं
। एषामन्यतमाभावे दिव्यान्यतममुच्यते। इति वचनात् यथा साक्षिणोऽर्थिसंमु
द्दिष्टा न सन्त तद्दोषं पुद्दूषयेत्। अदुष्टं दुषयन्वादी न तत्समं दंडमर्हति। तत्समं
विवादविषयसमं। सभासदादिविदितदूषणमेव ग्राह्यं न तु स्ववादिसाक्षि
भिः प्रतिपाद्यं। अन्यथानवस्थानप्रसंगदूसाहनादरः॥ सभासदां प्रसिद्धं वत्
लोकसिद्धमथापि वा। साक्षिणां दूषणं ग्राह्यमसाध्यं तेषवर्जनात्। अनेकसा
क्षिभिः साध्ये दूषणीपर्वसाक्षिणां। अनवस्था भवेद्दोषस्तेषामन्यस्यसंभवात्।

१०० असाध्यं साधनान्नहि सिद्धत्वाद्दोषवर्जनात्। अनवस्थादोषविरहात् तस्मात्प्रसि
द्धदूषणमेवग्राह्यं प्रसिद्धदूषणमाह कात्यायनः॥ बालोन्मत्तार्तस्त्रीपाप
भ्यासाद्यकूटकृत्। विरुद्धवाद्यौधवदः होहारदोर्निर्जीननादरिः। यः साक्षी नैव निर्दि
ष्टो नाहूतो नैव देशितः। ब्रूयान्मिथ्येति तथ्यं वा दंड्यः सोऽपि नराधमः॥ कात्याय
नः॥ क्रिया न दैविकी प्रोक्ता विद्यमानेषु साक्षिषु। लेख्ये सति विवादेषु न स्याद्दिव्यं
न साक्षिणः। ससत्वं साक्षिणां यत्र दिव्यैस्तत्र विशोधयेत्। एतन्नु संज्ञायानुच्छेदे
वोध्यं। बृहस्पतिः॥ प्रतिज्ञाभावनाद्वादी प्राड्विवाकादिपूजनात्। जयपत्रस्यावाहाना
तजयी लोके निगद्यते। जयपत्रलेखनप्रकारमाह स एव। यद्वृत्तं व्यवहारानुपूर्वं राम
पक्षोत्तरादिकं। क्रियावधारणोपेतं जयपत्रेऽखिलं लिखेत्। पूर्वोत्तरक्रियायुक्तं १००
निर्णयांतं यदा नृपः। प्रदद्याज्जयिने लेख्यं जयपत्रं तदुच्यते। तथा कात्यायनः॥ अर्थि

प्रत्यर्थिवाक्यानि प्रतिसाक्षिवाक्यं तथा। निर्णयश्च तथा तस्य यथा चावधृतं स्वयं॥
तद्यथा तं लेख्यं यथापूर्वं निवेशयेत्। सभासदश्च ये तत्र धर्मशास्त्रविदस्तथा।
ततश्च भाषोत्तरक्रियावपत्रसाक्ष्यादिनिर्णयश्च जयपराजयावधारणं निर्णय
कालावस्थितामध्यस्थाश्च साक्षिकं सर्वं लेखनीयं निरूपणास्य सम्यक् प्रदर्शना
र्थं। तथा भाषोत्तरलिखनं हेलनं देया पुनर्न्यायप्रसवस्यानिराकार्थं नहि न गृही
तं मयेति मिथ्योत्तरेण जितस्य पुनः परिशोधितं मयेति प्रसवस्यानं भवति प्रमाण
लिखनं तु पुनः प्रमाणांतरोपन्यासनिराकार्थं तदाह कात्यायनः॥ क्रियां बलवतीं
त्यक्त्वा दुर्बलां योऽवलम्बयेत्। स जयेऽवधृते सभ्यैः पुनस्तां नाप्नुयात् क्रियां। निर्णी
तेव्यवहारे तु प्रमाणमफलं भवेत्। लिखितं साक्षिणो वापि पूर्वमावेदितं न चेत्।
यथा पक्वेषु धान्येषु निष्फलाः प्रावृषो गुणाः। निर्णीतव्यवहाराणां प्रमाणमफलं तथा॥

Indira Gandhi National
Centre for the Arts

१०१ मनुः॥ जीवितं चानुशिष्टं च यत्र क्वचन यद्भवेत्। कृतं तद्धर्मतो विद्वान्न तद्भूयो निव
र्तते। अनुशिष्टं शास्त्रादिभिर्निर्णीतं। अत एव जीवितं प्राड्विवाकादिभिः समावि
तं यत्तद्विवादपदं पुनर्न निवर्त्तयेदित्यर्थः। यत्र जीवितानुशिष्टयोरध्यधर्मकृत
त्वमसत्यपराजयी पुद्विगुणं दंडमंगीकृत्य प्रत्यवतिष्ठते। तत्र पुनर्न्यायदर्शनमाह
नारदः॥ जीवितं चानुशिष्टं च यो मन्येत विधर्मतः। द्विगुणं दंडमादाय तत्कार्य्यं
पुनरुद्धरेत्। असद्विचारे विचारांतरमाह स एव॥ असाक्षिकं तु यद्दृष्टं विमार्ग
णैव जीवितं। असंमतमतैर्दृष्टं पुनर्दर्शनमर्हति। असाक्षिकमिति अप्रमाणा एनं
मात्रोपलक्षणं॥ याज्ञवल्क्यः॥ दुर्दृष्टं तु पुनर्दृष्ट्वा व्यवहारान्नृपेण तु। सभ्याः सज १०१
यिनो दंड्या विवादाद्द्विगुणं दमं। अत एव हि नारदः॥ साक्षिसभ्यावसन्नानां दूषणे
दर्शनं पुनः। स्ववचोव्याहतानां तु नास्ति पौनर्भवो विधिः। साक्षिकथनेन सभ्यावधर

णेन च। प्रमाणवसादाद्रोपदर्शने पुनर्न्यायदर्शनं स्वव्यापारेणाविरुद्धभाषणादिप्रामा
ण्यवसादेन नास्ति पुनर्न्यायः। नारदः॥ कामक्रोधाभिभूतार्त्तभयव्यसनपीडिताः। राग
द्वेषपरीताश्च ज्ञेयास्त्वप्रकृतिं गताः॥ ० ॥ अथ क्रियाबलाबलं॥ तत्र याज्ञवल्क्यः॥ स
र्वेष्वेव विवादेषु बलवत्युत्तरा क्रिया। आधौ प्रतिग्रहे क्रीते पूर्वा तु बलवत्तरा। अत्र क्रि
यासमानजातीयावोद्धव्या। अत एव बृहस्पतिरप्याह। द्विकेनार्थसमादाय प्रपन्नः पंचकं
तु यः। लाभं तत्र प्रमाणं स्यात्पश्चिमं यद्विनिश्चितं। अत्र मिश्रपुरस्कृतोयं वचनार्थः।
द्विकशतवृद्ध्या प्रागर्थमादाय धनिकः कदाचित्स्वकार्यार्थं तया शते पंचपलं लाभदानं चेदं
गीकरोति तदा पश्चिमं प्रमाणं। उत्तराक्रिया प्रमाणमिति अनयोऽप्रक्रिययोः वृद्धिव
वस्थायेन साजात्यमुत्तराक्रियाबलवत्वमौत्सर्गिकं। तस्यापवाद आध्यादौ तेन
पुनराहितं पुनर्दत्तं पुनर्विक्रीतं च निर्दिष्टं उपलक्षणं चैतत्तेन दत्ताविक्रीतं विक्रीय

Indira Gandhi National
Centre for the Arts

१०२ वाहत्तं निर्वर्त्त्यं अस्वामिकृतत्वाविशेषात्। अतएवोक्तं। अस्वामिना कृतो यस्तु दायो विक्र
यएव वा। अकृतः स तु विज्ञेयो व्यवहारे यथास्थितिः। बृहस्पतिः॥ उत्तरोत्तरबंधेन
प्राग्बंधः शिथिलो भवेत्। यः पश्चिमक्रियाकारः स पूर्वात्तु बलवत्तरः। न्यासं कृत्वा[illegible]
त्राधिं कृत्वा वाधिं करोति यः। विक्रयं वा क्रिया तत्र पश्चिमा बलवत्तरा। बंधोऽत्र व्यवस्था
तेन पूर्वव्यवस्था दुर्बला। उत्तरा च क्रिया बलवतीत्यर्थः॥ द्वयमेवोदाहरति न्यासमित्या
दि। प्रथमं न्यासमुत्तरं आधिः। प्रथमं आधिमुत्तरो विक्रयो वा दानं वा हृद्दानमभवीत्यर्थः॥
न्यासः परत्रधारणमात्रं। आधिस्तु परवशीकरणमित्यनयोराधिर्बलवान्। आ
ध्येयेत्तया सत्वध्वंसफलिका क्रिया दानविक्रयादिरूपा बलवती न तु बंधकस्तदज रम
नको बलवानिति। विक्रयादेः पूर्वसत्त्वध्वंसफलकस्य पुनः करणात् प्रथम एव बलवा १०२
न्। आध्यादेश्च पूर्वसत्त्वध्वंसाजनकस्य च पुनः करणाच्चैवं। पूर्वसत्त्वध्वंसाजनकत

ज्जनकयोस्तु चरमो बलवानिति फलितार्थः॥ महामहोपाध्यायवाचस्पतिमिश्रचंद्रेश्वरा
दिभिरप्येवं व्याख्याय व्यवहारोचितत्वेनोपवर्णितं॥ अथ निःक्षेपः॥०॥ तत्र बृहस्प
तिः॥ ऋणादानप्रयोगादि दापनांतं प्रकीर्तितं। निःक्षेपस्याधुना सम्यग्विधानं श्रूय
तामिति। तत्रादौ तत्स्वरूपमाह नारदः॥ स्वंद्रव्यं यत्र विश्वासान्निःक्षिपत्यविशंकि
तः। निःक्षेपो नाम तत्प्रोक्तं व्यवहारपदं बुधैः। विश्वासोऽवश्यं प्राप्तव्यमेवेत्यादिनि
श्चयः। अविशंकितः अप्राप्तिशंकाशून्यः। बृहस्पतिः। राजचौरादिकभयाद्दायादा
नां च वंचनात्। स्थाप्यतेऽन्यस्य यद्द्रव्यं न्यासः स परिकीर्तितः। परं संबोध्य परस्थाने
द्रव्यधारणमेव न्यास इति तात्पर्यार्थः। अन्वाहितस्य रूपमाह कात्यायनः॥ अथ मा
र्गे सकार्येषु अन्यस्मिन् वचनान्ममार्पयास्त्वमिति यो दत्तः स इहान्वाहितं स्मृतं। एक
स्मिन्नर्पितं वस्तु तेन पुरुषांतरे अमुष्मिन् स्वामिनि दास्यसीति निःक्षिप्तं न दत्वा

Indira Gandhi National
Centre for the Arts

१०३ धिहृत्यतेइत्यर्थः। अत्र हलायुधस्तु अत्र मार्गेणेति पठित्वा अत्र कार्य्येषु मार्गेणाप
चकेन अमुष्मिन् पुरुषे त्वं देया इति परिभाष्य यत् समर्पितं तद् द्रव्यमधिहृत्यते।
व्याख्यातवान् मनुः॥ कुलजे वृत्तसंपन्ने धर्मज्ञे सत्यवादिनि। महापक्षे धनिन्यार्ये
निःक्षेपं निःक्षिपेद्बुधः। महापक्षो बहुबंधुः निःक्षेपं निःक्षिपेत्। बृहस्पतिः॥ स्थानं ग
हं गृहे स्थं च तद् दृष्ट्वा विभवं गुणान्। सशंशोचं वंधुजनं परीक्ष्य स्थापयेन्निधिं निधिं
निःक्षेपं॥ याज्ञवल्क्यः॥ वासनस्थमनाख्याय हस्तेऽन्यस्य यदर्प्यते। द्रव्यं तदौप
निधिकं प्रतिदेयं तथैव तत्॥ वासनं निक्षेपाधारभूतं संपुटकादि॥ नारदः॥
सपुनर्द्विविधः प्रोक्तः साक्षिमानितरस्तथा। प्रतिदानं तथैवास्य प्रत्ययः स्याद्विप एम
र्य्यये। विपर्य्यये प्रत्ययं दद्यात्॥ बृहस्पतिः॥ भर्तृद्रोहे यथा नार्य्याः पुंसः पुत्रसुहृ १०३
द्वधे। दोषो भवेत्तथा न्यासे भक्षितोपेक्षिते नृणां। न्यासद्रव्यं न गृह्णीयात्तत्राशास्त्रयप्र

/

स्करः। गृहीतं पालयेद्यत्नात् सरूपाचितमर्पयेत्॥ बृहस्पतिः॥ स्थापितं येन विधि
नायेन यत्र यथाविधिः। तथैव तस्य दातव्यं न देयं प्रसनंतरे। प्रसनंतरे पुत्रादि॥
मनुः॥ स्वयमेव तु यो दद्यान्मृतस्य प्रसनंतरे। न स राजा नियोक्तव्यो न निक्षेप्तुश्च बं
धुभिः। मृते निःक्षेप्तरि प्रसनंतरे पिदानेन राजपर्य्यनुयोगायेत्यर्थः। स्वयमेव स
नेन जीवति निःक्षेप्तरि प्रसनंतरेणायाच्यमानमपि न देयं मृते तयाच्यमानेना
पि देयमिति सूचितं। नारदः। ग्रहीतुः सह योऽर्थेन नष्टो नष्टः स दायिनः। दैवराज
कृते तद्वच्चेन्न तज्जिह्मकारितं। ग्रहीतुरर्थेन सह यो निःक्षेपो नष्टः स दायिनो निःक्षेप्तु
रेव नष्ट इत्यर्थः॥ राजकृतेऽपि ग्रहीतृकौटिल्यात् कृते देयमेव गृहीत्रा तेन गृहीत्र
ऽपराधीदानेन दण्डनपराधस्तदाने हेतुरिति मंतव्यं। एवमेवमभिप्रायः॥ बृहस्पतिर
पि॥ दैवराजोपघातेन यदि तन्नाशमाप्नुयात्। गृहीतद्रव्यसहितं तत्र दोषो न विद्य

Indira Gandhi National Centre for the Arts

१०४ ते। अत्र पूर्वत्र गृहीतद्रव्यसहितनिःक्षिप्यनाशोपन्यासगृहीतुस्तदीयांशो सदोषनि
शार्थः एवंच यदि तदीयापराधं विना निःक्षिप्तमात्रमपि नष्टं भवति तदा न तद्दे
यमिति तात्पर्यार्थः। श्लोकदारद्वयोर्थं। मनोरप्येतत् परता॥ चौरैर्हृतं जलेनोढ
मग्निना दग्धमेव वा। न दद्याद्यदि तस्मात् स न संहरति किंचन। तस्मान्निःक्षिप्त
धनात् चौरैर्हृतं उदकेन देशांतरं प्रापितं अग्निना वा दग्धं निःक्षेपं निःक्षेपधारि
न दद्यात् यदि स्वयं किंचित्तस्मान्नापहरतीति कुल्लूकभट्टः। पत्रं तु निःक्षेपधारि
णात्र द्रव्यनाशो हेतावुद्भाविते पित्रपेक्षान्यतद्दोषाद्देव निःक्षिप्तं विनष्टमिति ज्ञाय
ते तदा निःक्षेपधारक एव दद्यादिति साहकाशायनः॥ ग्राहकस्य तु यद्दोषान्नष्टं तु ग्रा राम
हकस्य तत्तादेवमिति शेषः। तथा यस्य हो वे ताय तत् किंचित् विनष्टं तद्धृयेत्वा १०४
। तद्द्रव्यं सोदयं दाप्यो देवराजकृतादृते॥ राजकेपि तद्दोषात्कृते दद्यादेव सक्रम

सकृत् यत्कार्यमुद्दिश्य पत्राचितं कृतं तस्मिन् कार्ये कृते काले वा पूर्णे याचितोपि स्वा
मिना गृहीतान् ददाति तद्देवराजादिनष्टमपि गृहीतामन्यादिदाने दद्यादेव
द्रसाहमाचितक्रमुपक्रम्य कात्यायनः। प्राप्ते काले कृते कार्ये न दद्याद्याचितोपि सन्।
तस्मिन्नष्टे हृते वापि गृहीतामुल्यमाहरेत् न दद्यादिति स्वार्थः॥ बृहस्पतिः॥ भिदेनोपेक्ष
यान्यासं गृहीता यदि नाशयेत्। याच्यमानो न दद्याद्वा दाप्यं तत्सोदयं भवेत्। भिदे
न स्वद्रव्यवद्विनाशिवेन उपेक्षया। नारदः॥ याच्यमानोपि निःक्षेपं यो दातुं न प्रयच्छ
ति। दंड्यः स राज्ञो भवति नष्टे दाप्यं तु तत्समं। यत्रार्थं साधयेत्तेन निःक्षेप्तुरननु
ज्ञया। तत्रापि दंड्यः स भवेत्तं च सोदयमाहरेत्। अननुज्ञया विमत्या। बृहस्पतिरपि
। न्यासद्रव्येण यः कश्चित् साधयेदर्थमात्मनः। दंड्यः स राज्ञो भवति दाप्यस्तच्चा
पि सोदयं। अत्रापि अननुज्ञयेति विवक्षितं। व्यासः। भक्षितं सोदयं दाप्यः समं दाप्यव

Indira Gandhi National
Centre for the Arts

१०५ पेक्षितं। किंचिन्न्यूनं प्रहार्यः स्याद्द्रव्यमज्ञाननाशितं। उपधाभिश्च यः कश्चित् परद्रव्यं
हरेन्नरः। ससहायः सहंतव्यः प्रकाशं विविधैर्वधैः। उपधा छलं। सहायो हरणे
सहकारी वधस्ताडनबंधनादिः। अन्यत्राप्येवं जातीयेष्वेवमेव विधिः॥ तथा
बृहस्पतिः॥ अन्वाहिते याचितके शिल्पिन्यासे तथैव च। एष एवोदितो धर्म
स्तथैव शरणागते। शिल्पिन्यासेऽलंकारादिघटनार्थं शिल्पिषु समर्पिते सुव
र्णादौ। उपधाभिरेषां हरतो वक्ष्यमाणैव शास्तिः। पुनराह स एव येन संक्रियते न्या
सो दिव्यैः परिनिश्चितैः। तदर्द्धं स्थापयन् शिल्पी राज्ञो दैवहतोपि सन्।
घटनावधिदिनातिक्रमेतु शिल्पिदेयतानंतरभ्यंतरदृत्यर्थः। मनुः॥ यो ना राम
र्पयति निःक्षेपं यश्चानिःक्षिप्य याचते। तावुभौ चौरवच्छास्यौ दाप्यौ वा तत्स १०५
मं दमं। यः प्रार्थनेन निःक्षेपं न ददाति विनैव च निःक्षेपं निःक्षिप्य याचते तावु

भौ चौरवच्छास्यौ तत्समं धनं वा दातारं स्योदरं निर्हृनमाचारविषयं। मत्स्यपुरा
णे तु द्विगुणां दममिति चतुर्थचरणे पाठः सचरमः सधननिरूपणाचारविष
यः इति मिश्राः॥ कात्यायनः॥ न्यासादिकं परद्रव्यं प्रभक्षितमुपेक्षितं। अज्ञान
नाशितं चैव येन हार्यः स एव तत्। स एवेत्यनेन पुत्रदारादिव्यवच्छेदः॥ ०॥ अथा
स्वामिविक्रयः॥ तत्र बृहस्पतिः॥ निःक्षेपानंतरं प्रोक्ताभगुणाऽस्वामिविक्रयः।
श्रूयतां तत्प्रयत्नेन सविशेषं ब्रवीम्यहं। तत्रादौ अस्वामिक्रयस्वरूपमाह ना
रदः॥ निःक्षिप्तं वा परद्रव्यं नष्टं लब्ध्वापहृत्य वा। विक्रीयतेऽसमक्षं यत्तज्ज्ञेयोऽस्वा
मिविक्रयः॥ तथा व्यासः॥ याचितान्वाहितन्यासं हृत्वा वान्यस्य यद्धनं। विक्रीयते
स्वाम्यभावे सत्ये योऽस्वामिविक्रयः। स्वाम्यभावे स्वाम्यसमक्षेत्यर्थः॥ ० ॥
तथा अस्वामिना कृतो यस्तु दानं विक्रय एव वा। अकृतं स तु विज्ञेयो व्यवहारे य

Indira Gandhi National
Centre for the Arts

१०६ याश्थितिः॥कात्यायनः॥अस्वामिविक्रयंदानमाधिंचविनिवर्त्तयेत्॥मनुः॥विक्रीणी
तेपरस्यस्वंयोऽस्वामीस्वाम्यसंमतः।नतंनयेतसाक्ष्यंतुस्तेनमस्तेनमानिनं।अवहा
र्य्योभवेच्चैवसान्वयःषट्शतंदमं।निरन्वयोऽनपसरःप्राप्तःस्यात्चौरकिल्बिषं।वि
क्रयाद्योधनंकिंचिद्गृह्णीयात्कुलसन्निधौ।क्रमेणसविशुद्धस्तन्यायतोलभतेधनं।
अस्वामीयःस्वामिनाचाननुमतःपरकीयंद्रव्यंविक्रीणीतेतंवस्तुतश्चौरमचौरमात्मा
नंमन्यमानंसाक्ष्यंतंनकारयेत्।नतंक्कापिप्रमाणीकुर्य्यादवहार्य्योभवेत्दंड्योभवे
त्सान्वयःप्रकृतधनस्वामिसंबंधीपुत्रादिःषट्शतंपणानामितिशेषः।निरन्वयःस्वा
म्यसंबंधीअपसरणमपसरःस्वामिगृहाद्वनस्पतेनपरस्वविक्रेतापरसंबंधीष एन·
ट्पणशतंदंड्यः यदित्वसौविक्रेतानस्वामिनःसंबंधीस्वामिगृहाच्चनतस्यद्रव्यस्या १०६
पसारेणस्वामिसंबंधिनोऽन्येनकृतःकिंतुस्वयमेवतत्द्रव्यापसारितस्तदाचौरव

द्दंड्यः।अन्यकृतेतुद्रव्यापसरणेस्वामिसंबंधिनिविक्रेतरिषट्पणशताधिकमपिदंड्यः
इतिविवादरत्नाकरः।भागुरिमेधातिथिकल्पतरुविवादचिंतामणिप्रभृतिभिस्तु।
अपसरइत्यनेनस्वामिनःसकाशात्प्रतिग्रहादिधनोपायःअपसरःसनविद्यते
यस्यसतथाइत्यर्थःइतिव्याख्यातं।एवपरस्वविक्रयीयदिस्वामिनोभ्रात्रादिरूपेण
नसान्वयःसंबंधीभवतीतितदाषट्पणशतानिअवहार्य्योदंडनीयः यदिपुनः
स्वामिनःसंबंधीनभवतिअनपसरश्चस्यात् अपसरत्सस्मात्सकाशाद्धनमि
त्यपसरःप्रतिग्रहक्रयादिकःसयस्यस्वामिसंबंधिपुत्रादेर्नास्तितदाचौरसंबंधि
पापंप्राप्नोतितद्वत्दंडनीयइत्यर्थइतिकुल्लुकभट्टः॥विक्रयात्आपणात्कुल
सन्निधौग्रामाणांलोकव्यवहर्तृमेलकसन्निधौ।न्यायतःक्रयेनसान्वयः।विशुद्धोनिर्दो
षःलभतेधनंविक्रेतुःसकाशादितिशेषः॥तथामनुः॥अथमूलमनाहार्य्यंप्रका

Indira Gandhi National
Centre for the Arts

१०७ शक्रयशोधितं। अदण्ड्यो मुच्यते राज्ञा नाष्टिको लभते धनं। अत्र क्रयः प्रकाशकृतः ना
ष्टिकस्य न तत्र स्वत्वं साधयति मूल्यं चरिशौनं रगमनेनाशङ्क्याहरणीं तत्र क्रेता रा
ज्ञा न दण्ड्यः नाष्टिकाय तु धनं देयं तथा च कात्यायनः। नाष्टिकस्तत्र कुर्वीत तद्धने
ज्ञातिभिः स्वकं। अदत्तं सक्तविक्रीतं क्रेता स्वं लभते धनं। ज्ञातिभिः साक्षिभिस्स्व
क्रयं दानक्रयात्स्वस्वापवारक्रियापरं। प्रकाशक्रेता अविज्ञातवासस्थान
त्वादाने तु समाप्नोति॥ बृहस्पतिः॥ प्रमाणहीनवादे तु पुरुषाचेष्टया नृपः। स
मन्त्र्य नाधिकहेन स्वयं कुर्याद्विनिर्णयं॥ याज्ञवल्क्यः॥ वणिग्वीथीपरिगतं वि
ज्ञातं राजपूरुषैः। अविज्ञाताश्रयात्क्रीतं विक्रेता यत्र वा मृतः। स्वामी दत्वार्द्ध राम:
मूल्यं तु प्रगृह्णीत स्वकं धनं। अर्द्धं द्वयोरपहृतं तत्र स्याद्व्यवहारतः। अविज्ञात १०९
क्रयो दोषस्तथा चापरिपालनं। एतत्त्रयं समाख्यातं द्रव्यहानिकरं बुधैः। अ

विज्ञाताश्रयादविज्ञातवासस्थानात् तेनायमर्थः वणिग्वीथीपरिगतत्वादिनाप्यवस्तु
नः क्रयं यः करोति विक्रेतुरविज्ञाताश्रयत्वात्तदानयनाशक्यत्वात् तदा विभावि
तस्वामिभावात् नाष्टिकादर्द्धं मूल्यं गृहीत्वा तद्द्रव्यं नाष्टिकायार्पयेत्। नाष्टिकेन तद
त्तिनमिसस्पदोषः क्रेतात्वविज्ञाताश्रयात् द्धं क्रीतमिति तस्यदोषः। तदेतद्दोष
द्वयमुभयोरर्थद्रव्यहानिकरमिति समुदायार्थः। षट्शान्तरमनुपक्रम्याह मनुः॥
अनेन विधिना शास्यः कुर्वन् स्वामिविक्रयं। अज्ञानात् ज्ञानपूर्वं तु चोरवद्दण्डमर्ह
ति। अज्ञानपरस्वविक्रयी षट्शानरमेन ज्ञानः नद्विकयी चोरदण्डेन हस्तछेदनादि
नाशास्यः। यत्र तु नाष्टिको न स्वत्वं साधयति तत्र प्रकाशक्रेतुरेव तद्द्रव्यं नाष्टिक
स्यैव दण्ड्यस्तथा च कात्यायनः॥ यदि स्वं नैव कुरुते नाष्टिको ज्ञातिभिर्द्धनं। प्रसंगवि
निरस्तार्थं चोरवद्दण्डमर्हति। ज्ञातिभिरिति प्राथमिकतया उक्तं प्रमाणायमात्रेणानर्थ्यं।

Indira Gandhi National
Centre for the Arts

१०८ जातिमिहितिक्वचित्पाठस्तत्रापितथैवव्याख्येयं। नारदः॥ प्रकाशक्रयतः शुद्धिः के
तुः स्तेयं रहः कृतात्। स्वामितः क्रयो विक्रयिहि रहो भवति यदाह बृहस्पतिः। येनक्री
तं तु मूल्येन प्रागध्यक्षे निवेदितं। न तत्र विद्यते दोषः स्तेनः स्यादुपधिक्रयात्। उपधिक्र
यमाह स एव॥ अंतर्गृहे बहिर्ग्रामात् निश्युपांश्वसतो जनात्। हीनमूल्यं तु यत्क्री
तं ज्ञेयोऽसावुपविक्रयः। असतो जनात् साधुत्वेनज्ञातात् अत्रापि अस्वामिवि
क्रयवद्व्यवहारस्तथा च नारदविष्णू॥ अस्वाम्यनुमताद्दासादसतश्च जनाद्रहः
। हीनमूल्यमवेलायां क्रीणंस्तद्दोषभाग्भवेत्। यद्यप्रकाशं हीनमूल्यं तु पांशुक्रीणी
यात्तदा केता चोरवद्दण्ड्यः। तद्दोषभाक् स्वामिविक्रेतृसमदोषभाक्॥ याज्ञवल्क्यः राम
॥ स्वं लभेतान्यविक्रीतं केतुर्दोषोऽप्रकाशिते। हीनाद्रहो हीनमूल्ये वेलाहीने च १०८
तस्करः। आत्मीयद्रव्यं संमतिव्यतिरेकेणान्यविक्रीतं सर्वं प्राप्नुयात्। केतुरप्रकाशे

क्रये दोषो भवेत्। हीनात् नीचात् असंभावितद्रव्यस्वामिभावात्। वेलाहीने क्रया है वेला
हीनेन हीनाद्रहो हीनमूल्येन वेलामनाश्रित्य क्रयं कुर्वन्तस्करो भवतीति वाक्
यार्थः॥ कात्यायनः॥ अनुपस्थापयन्मूल्यं क्रेयं वापरिशोधयन्। यथाभियो
गं धनिने धनं दाप्यो दमं च सः॥ नारदः॥ नगरे हाटगमं केताशुद्धिरस्य तदागमा
त्। विपर्यये तु तुल्यदोषः सर्वं तद् दण्डमर्हति। विपर्यये आगमगूहने तुल्यदोषो वि
क्रेता तुल्यदोषः। तद्दण्डं विक्रेतृतुल्यदण्डमर्हति। यदा यस्य हस्ते द्रव्यं नमपद्येव वह
तिमदीयं देहीति साधुस्तस्मात्तदा तेन किं कार्यमित्यत्राह बृहस्पतिः॥ एवं स्वामि
तु तद्द्रव्यं यदागमविभावयेत्। तत्र मूल्यं दर्शनीयं केतुः शुद्धस्ततो भवेत्। मू
लमत्र विक्रेता॥ कात्यायनः॥ प्रकाशं वा क्रयं कुर्यात् मूलं वापि समर्पयेत्। मूला
नयनकालस्तु देयो योजनसंख्यया। यदा मूलमुपन्यस्य पुनर्यो हीयवदेत्क्रयं।

Indira Gandhi National
Centre for the Arts

१०९ आहोन्मूलमेवासौनक्रयेणाप्रयोजनं।क्रयशुद्धिरपिततएवभविष्यतीतितेनमू
लाभावएवक्रयशुद्धिरन्वेषणीयेतितात्पर्यं।प्रकाशंक्रयंप्रकाशयेत्।नक्रये
णनक्रयस्थापनेनप्रयोजनं अपराधव्यावर्तनमित्यर्थः। मूलेआनीतेव्यासः
।मूलेसमाहितेक्रेतानाभियोज्यःकथंचन।मूलेनसहवादस्तुनाष्टिकस्यतदा
भवेत्नाष्टिकोनष्टधनस्वामी॥बृहस्पतिः॥विक्रेतादर्शितोयत्रहीयतेव्यवहार
तः।क्रेताराज्ञोमूलदमौप्रदद्यात्स्वामिनेधनं॥याज्ञवल्क्यः॥हृतंप्रनष्टंयोद्रव्यं
परहस्तादवाप्नुयात्।अनिवेद्यनृपेदंड्यःसतुषण्णवतिंपणान्॥हृतंप्रनष्टंवा
चौरादिहस्तात्मदीयमितिनृपस्यानिवेद्यैवयोगृह्णातिसराजग्राह्यकरदंडे रामः
नदंड्यः॥०॥अथसंभूयसमुत्थानं॥तत्रादौतत्स्वरूपमाहनारदः॥वणि १०९
क्प्रभृतयोयत्रकर्मसंभूयकुर्वते।तत्संभूयसमुत्थानंव्यवहारपदंस्मृतं।सं

भूयधनमेलकंकृत्वा।तत्राधिकरणमाहबृहस्पतिः॥कुलीनैर्दक्षैरनलसैःप्राज्ञैर्नाणि
कवेदिभिः।आयव्ययज्ञैःशुचिभिःशूरैःकार्यासहक्रिया।बृहस्पतिः॥समोऽति
रिक्तोहीनोवायत्रांशोयस्ययादृशः।क्षयव्ययौतथावृद्धिस्तस्यतत्रतथाविधा॥या
ज्ञवल्क्यः॥समवायेनवणिजांलाभार्थंकर्मकुर्वतां।लाभालाभौयथाद्रव्यंयथावा
संविदाकृतौ।समवायेनमेलकेनकर्मवाणिज्यादिलाभापचयौयथाद्रव्यंद्रव्या
नुसारेणयथावासंविदासमयेनअव्यवस्थायांमूलधनानुसारेणवृद्धिस्तयो
र्व्यवस्थायांतुव्यवस्थानुसारेणैवतावित्यर्थः॥परस्परमवंचद्भिःप्रवर्तितव्य
मित्याहव्यासः॥समस्तमसमस्तंवावंचयंतःपरस्परं।नानापण्यानुसारेणप्रकुर्युः
क्रयविक्रयौ॥बृहस्पतिः॥यःकश्चिद्दूतकस्तेषांविज्ञातःक्रयविक्रये।प्रापण्यैः
सविश्वास्यःस्यात्सर्ववारेष्वयंविधिः।त्रयोहानिर्यदातत्रदेवराजकृताद्भवेत्।

Indira Gandhi National
Centre for the Arts

११० सर्वेषामेव सा प्रोक्ता कल्पनीया यथांशतः । शपथेरिति प्रमाणमात्रोपलक्षणं मानं
तरस्यापि हिंसं भवति । तयोर्मूल्यस्य हानिर्लाभस्य अस्यापवादमाह स एव ॥ अनि
र्दिष्टो वार्यमाणः प्रमादाद्यस्तु नाशयेत् । तेनैव तद्भवेद्देयं सर्वेषां समवायिनां ।
अनिर्दिष्टोऽननुज्ञातः ॥ याज्ञवल्क्यः ॥ प्रतिषिद्धमनादिष्टं प्रमादाद्यच्च नाशितं ।
स तद्दद्याद्विप्लवाच्च रक्षितादशमांशभाक् ॥ विप्लवात्तत्स्करादुपद्रवात् । बृह-
स्पतिः ॥ दैवराजभयाद्यस्तु स्वशक्त्या परिपालयेत् । तस्यांशं दशमं दत्वा गृह्णीयु
स्तेंऽशतोऽपरं ॥ नारदः ॥ दैवतस्करराजाग्निव्यसने समुपस्थिते । यस्तु स्वशक्त्या
रक्षयेद्यस्तु तस्यांशो दशमः स्मृतः ॥ कात्यायनः ॥ चौरतः सलिलादग्नेर्द्रव्यं यस्तु राम:
समाहरेत् । तस्यांशो दशमो देयः सर्वद्रव्येष्वयं विधिः । समाहरेत् रक्षेत् । एक- ११
स्वामिकेष्वपीयं व्यवस्थेति केचित् । तत्र संभूय समुत्थानप्रकरणाम्नात नारदे

न संहे कार्थतां मन्यमानाभ्यां कामधेनुहलायुधाभ्यां मलिम्लवनाच्च । एवमेव चण्डेश्वरवाच
स्पतिमिश्रादयः । याज्ञवल्क्यः ॥ जिह्मं त्यजेयुर्निर्लाभमशक्तोऽन्येन कारयेत् । जिह्मं
वञ्चकं निर्लाभं मूल्यमात्रं दत्वा निःसारयेयुः अजिह्म एव योऽद्य्यर्त्तरोऽतरव्यापारेऽश-
शक्तः सहतरं पुरुषं शक्तं नियुञ्जीत द्रव्यार्थः । रत्नशाकस्यैकस्य मरणोत्साहनादरः
। एकस्य चेत्स्याद्व्यसनं दायादोऽस्य तदाप्नुयात् । अन्यो वाऽसति दायादे शक्तश्चेत्स
र्वमेव वा । अक्तस्य मरणे न दायादो भाण्डमवेक्षत तद्भ्रामांशो न दभावे अन्यस्तद्वृत्ति
तान दभावे सर्वे वणिजो भाण्डं रक्षयित्वा संभूय दशमं भागं गृह्णीयुरित्यर्थः । कृतत्रि
भाण्डस्वामिमरणोत्साहनादरः । कश्चिच्च संसरन्देशान्तरे यादभ्यागतो वणिक्कुट
जास्य भाण्डं तद्दूरे धावतदायादरक्षीनं ॥ बृहस्पतिः ॥ यदा तत्र वणिक्कश्चित्प्रमीये
त प्रमादतः । तस्य भाण्डं दर्शनीयं नियुक्तै राजपुरुषैः । राज्ञेति शेषः । तथा यदा कश्चि

Indira Gandhi National
Centre for the Arts

११२ तत्समागच्छेत्तत्र अस्वत्वहरो नरः। स्वाम्यं विभावयेदन्यैः सततं लब्धुमर्हति॥ नारदः
॥ दायादेऽसति बंधुभ्यो ज्ञातिभ्यो वा यथा नरः पैयेत्। तदभावे सुगुप्तं तत् स्थापयेद्दशवत्स
रान्। अत्र हलायुधः॥ वाक्यान्तरपरमप्राप्तस्वाम्यभावे तु मातुलादीनामधिका
र इत्याह। बंधुज्ञाती च सन्निहितसंबंधिनौ दायादानितिरिक्ताविति हलायुधः॥ बृहस्प
तिः॥ राजा हरीत षड्भागं नवमं द्वादशं तथा। शूद्रविट्क्षत्रजातीनां विप्रात् गृह्णी
त विंशकं। अपहारेद्दं तु नागच्छेद्यत्र स्वामी कथंचन तदा गृह्णीत तद्राजा ब्रह्मस्वं ब्रा
ह्मणांश्च येत्। ब्राह्मणांश्च येदन्यद्ब्राह्मणेभ्योऽर्पयेदिति सार्थः॥ बौधायनः। अब्राह्म राम
णस्य प्रणष्टस्वामिकमस्वं संवत्सरं परिपाल्य राजा हरेत्। कालविकल्पस्तु
दूरदूरतरदूरतमदेशागमनाद्यपेक्षया बोध्यः॥ नारदः॥ अस्वामिकमदाया ११२
दं दशवर्षस्थितं ततः। राजा तदात्मसात्कुर्यादेवं धर्मो न हीयते। अलिजां

व्यसनेनैव मन्यत्तत्कर्म्मनिस्तरेत्। लभेत दक्षिणाभागं स तस्मात्संप्रकल्पितं
। अस्वामिकं प्रमीतस्वामिकं अदायादं दायादादिरिक्थहरशून्यं। अत्र दश
वर्षप्रतीक्षणं असंततच्छिरन्तमेनागमनसंभावनायां बोद्धव्यं। व्यसनेऽसामर्थ्ये
सामान्येनाह बृहस्पतिः। एवं क्रियाप्रवृत्तानां यदि कश्चिद्विपद्यते। तदंशं धुनाक्रिया
कार्या सर्वैर्वा सहकारिभिः। क्रिया आर्त्विज्यादिका। याज्ञवल्क्यः॥ जिह्मं त्यजेयु
र्निर्लोभमशक्तोऽन्येन कारयेत्। अनेन विधिराख्यात ऋत्विक्कर्षककर्म्मिणां॥
अनेन संभूयसमुत्थानमार्गेणादूरसार्थः॥ बृहस्पतिः॥ प्रयोगं कुर्वते ये तु हेमधा
न्यरसादिना। समन्यूनाधिके चांशैर्लाभस्तेषां तथाविधः। बहूनां संमतो यस्तु दद्या
देकोधनं नरः। करणं कारयेद्वापि सर्वैरेव कृतं भवेत्। प्रयोगं लाभार्थं करणं
लेख्यादि। पुनः सहवणिग्ज्ञातिसंबंधिसुहृदामृणं देयं सबंधकं। अन्येषां लग्नकं

Indira Gandhi National
Centre for the Arts

११२ पेतं लेख्यसाक्षियुतं तथा। स्वेच्छादेयं हिरण्यपर्णार सधान्यं तु सावधि। देशस्थित्या प्र
दातव्यं गृहीतव्यं तथैव तत्। हिरण्यव्यवहारेऽवधौ स्वेच्छादसादो अवधेरावश्य
कत्वं। समवेतैस्तु यद्दत्तं प्रार्थनीयं तथैव तत्। न याचते च यः कश्चिल्लाभात्स
परिहीयते। प्रयोगः सर्वमाख्यातः समासेनोदितोऽधुना। श्रूयतां कर्षकादीनां
विधानमिदमुच्यते। वाह्यकर्षकवीजाद्यैः क्षेत्रोपकरणेन च। ये समानास्तु ते
:साद्धं कृषिः कार्या विजानता। वाह्यवीजात्ययाद्यस्य क्षेत्रहानिः प्रजायते। ते
नैव सा प्रदातव्या सर्वेषां कृषिजीविनां। एष धर्मः समाख्यातः कीनाशानां पुरा
तनः। क्षेत्रहानिर्यस्य विसामग्र्या यत्क्षेत्रं पतितं तत्क्षतिस्तेनैव सोढव्या।। एम·
कीनाशानां कृषीवलानां। तथाहि रण्यकूप्यवस्त्राणां काष्ठपाषाणचर्मणां। ११२
संस्कर्त्ता तु कलाभिज्ञः शिल्पीचोक्तो मनीषिभिः। हेमकारादयो यत्र शिल्पं सं

भूयकुर्वते। कर्मानुरूपं निर्वेशं लभेरंस्ते यथांशतः। निर्वेशं वेतनं॥ अत्रैव विशे
षमाह कात्यायनः॥ शिक्षकाभिज्ञकुशला आचार्यश्चेति शिल्पिनः। एकद्वित्रिच
तुर्भागान् हरेयुस्ते यथोत्तरं। अत्र शिक्षकाभिज्ञकुशलाचार्याश्चत्वारोऽघटना
स्तानोत्कर्षेणाभिधत्ते। वृहस्पतिः॥ धर्म्यं देवगृहं वापि धार्मिकोपस्करणि च। सं
भूय कुर्वतां चैषां प्रमुखो द्व्यंशमर्हति। नर्तकानामेष धर्मोऽधर्मैर्विद्भिरुदाहृतः
। तालज्ञो लभतेऽध्यर्द्धं गायनास्तु समांशिनः। प्रमुख्यो प्रधानभूतः। अर्द्धमधिकं
यत्र तदध्यर्द्धं तेन सार्द्धमंशं तालज्ञो लभते इत्यर्थः॥ वृहस्पतिः॥ स्वाम्याज्ञयानुय
श्चौरैः परदेशात्समाहृतं। राज्ञे दत्त्वा तु षड्भागं लभेरंस्ते यथांशतः॥ चतुरोंशान्
प्यामुख्यः शूरस्त्र्यंशमवाप्नुयात्। समर्थस्तु हरेद्व्यंशं शेषास्तु समांशिनः। मुख्यो
बुद्धिशरीरव्यापारवान्। शूरः साहसिकः समर्थोऽतिवलः इति मिश्राः प्राहुः॥ अन्या

Indira Gandhi National
Centre for the Arts

११३ पेक्षयाव्यापारवानितिरत्नाकरः।कात्यायनः॥परराष्ट्राद्धृतंयत्स्यात्चौरैःस्वाम्या
ज्ञयाहृतं।राज्ञोदशांशमुद्धृत्यविभजेरन्यथाविधि।चौराणांमुख्यभूतस्तुच
तुरोंशांस्ततोहरेत्।शूरोंशांस्त्रीन्समर्थोद्वौशेषास्त्वेकैकमेवच।तेषांचेत्प्रसृ
तानांयोग्रहणंसमवाप्नुयात्।तन्मोक्षणार्थंयद्दत्तंतस्यकार्यासमाक्रिया।षड्
भागदशमांशौराज्ञोरक्षणादिव्यापारतदभावाभ्यांव्यवस्थाथौ।प्रसृतानांचौ
रैरनुमितस्ततोगतानांमध्येयोग्रहणंअवरोधनंप्राप्तःसतद्धनंदत्वाआत्मा
नंमोचयतिसर्वैरेवचौरैर्विभज्यशोधनीयमित्यर्थः॥कात्यायनः॥वणिजांकृ
षिकानांचचौराणांशिल्पिनांतथा।अनियम्यांशकर्तॄणांसर्वेषामेवनिर्णयः। एम·
अनियम्यांशकर्तॄणांअंशमनियम्यकृतिमतां॥०॥अथदत्ताप्रदानिकं॥तत्र ११३
बृहस्पतिः॥एषाखिलेनाभिहितासम्भूयोत्थाननिष्कृतिः।अदेयदेयदत्तानामद

त्तस्यचकथ्यते।ततस्वरूपमाहनारदः॥दत्त्वाद्रव्यमसम्यक्यःपुनरादातुमिच्छ
ति।दत्ताप्रदानिकंनामतद्विवादपदंस्मृतं।अदेयमथदेयंचदत्तंचादत्तमेवच।
व्यवहारेषुविज्ञेयोदानमार्गश्चतुर्विधः।तत्राष्टावदेयानिदेयमेकविधंस्मृतं।
दत्तंसप्तविधंविद्यादत्तंषोडशात्मकं।असम्यक्त्वमनुदानस्यादेयद्रव्यदाना
त्।वाअयथादानाद्वासंप्रदानभ्रंशादिनावापित्राद्यसम्मतावादातुरेवाति
वृद्धाद्यवस्थाभेदाद्वा।तत्रादेयान्याहबृहस्पतिः॥सामान्यपुत्रदाराधिसर्वस्व
न्यासयाचितं।प्रतिश्रुतंतथान्यस्यनदेयंत्वष्टधास्मृतं।सामान्यमनेकस्वामि
कंयाचितंव्यापारार्थंयाचित्वाआनीतं।अत्रसामान्येन्यायात्पुत्रदारयोर्वि
मतयोर्वचनबलात्सर्वस्वेसान्वयस्यप्रतिश्रुतेःसर्वस्येववचनबलादेव।
अधिन्यासयाचितेषुस्वत्वाभावात्पुत्रदारसर्वस्वप्रतिश्रुतेषुचतुर्ष्वपिस्वा

Indira Gandhi National
Centre for the Arts

२२५ तंत्रोसत्यपिवचनबलादेवदानबाधइतिमिश्राः॥साधारणोपिस्वांशयोगपद्य
नंसिद्धत्वेव।किंतुदानुप्रसवायोनिषिद्धाचरणादितिस्मार्त्तभट्टाचार्यजीमू
तवाहनादयःप्राहुः॥अन्वयेसत्यपिसर्वस्वदानंसिद्धत्वेवस्वतंत्रस्वामिकृ
तत्वात्किंतुदातुःप्रसवायोनिषिद्धाचरणादितिस्मृतिसारादयःप्राहुः॥नारदः
॥अन्वाहितंयाचितकमाधिःसाधारणंचयत्।निःक्षेपःपुत्रदारंचसर्वस्वंचा
न्वयेसति।आपत्स्वपिहिकष्टासुवर्त्तमानेनदेहिना।अदेयान्याहुराचार्या
यच्चान्यस्मैप्रतिश्रुतं।आपत्कालेपिपुत्रदाराद्यन्वयानांविमतौपुत्रदार
सर्वस्वानामदेयतेत्यर्थः।एवमेवविवादचिंतामणिविवादरत्नाकरादयः। एम·
तत्संमतौतुदेयतामाहकात्यायनः॥विक्रयंचैवदानंचनदेयाःस्युरनिच्छ २१४
वः।दाराःपुत्रश्चसर्वस्वमात्मन्येवतुयोजयेत्।आपत्कालेतुकर्त्तव्यंदानंवि

क्रयएववा।अन्यथानप्रवर्त्तेतइतिशास्त्रविनिश्चयः।पुत्रदाराद्यन्वयानांविमतौपुत्रा
दित्रयंस्वयमेवोपभोक्तव्यं।तेषामनुमतौतुतेषांदानंइत्यर्थः।अन्वयेसत्य
पिसर्वस्वदानंसिद्धत्वेवस्वतंत्रस्वामिकृतत्वात्।किंतुदातुःप्रसवायोनिषि
द्धाचरणादितिस्मृतिसारादयःप्राहुः।केचित्तुसर्वस्वमन्वयानुमतावपिनदे
यंप्रागुक्तनारदवचनेनान्वयेसतिसर्वस्वंयच्चान्यस्मैप्रतिश्रुतमितियाज्ञ
वल्क्यवचनेनआहितंचैवनिक्षेपःसर्वस्वंचान्वयेसतीतिदक्षवचनेनच
तत्सत्वमात्रएवदाननिषेधादित्याहुः।वशिष्ठवचनमप्यनुमतिपरं यथा
शुक्रशोणितसम्भवःपुरुषोमातापितृनिमित्तकस्तस्यदानविक्रयपरित्या
गेषुमातापितरौप्रभवतः।अत्राप्येकस्मिन्पुत्रेविशेषयतिसएवनत्वेकंपु
त्रंदद्यात्प्रतिगृह्णीयाद्वासहिसन्तानायपूर्वेषांनस्त्रीपुत्रंदद्यात्प्रतिगृह्णीया॰

Indira Gandhi National
Centre for the Arts

११५ दा अमत्रानुज्ञानाद्भर्तुः एकः पुत्रः स्वदानेऽनुमतो पितरेयः सहीत्यादिहेतुमन्वि
गरस्वदास्तारस्यान्तरङ्गसनेनाजहत्स्वार्थलक्षणया विक्रयादिकमपि विवक्षि
तं भवत्यनुज्ञायास्तत्रापि प्रयोजकत्वादिति रत्नाकरः। अधिकं पुनरनुपदं वक्ष्या
मः। इयमाह बृहस्पतिः॥ कुटुंबभक्तवसनाद्देयं यदतिरिच्यते। मध्वास्वादो वि
षं पश्चाद्दातुर्धर्म्मोऽन्यथा भवेत्॥ कात्यायनः॥ सर्वस्वं गृहवर्जं तु कुटुंबभर
णाधिकं। यद्द्रव्यं तत्स्वकं देयमदेयं स्यात्ततोऽन्यथा। यदतिरिच्यते स्वकीय
मपि तद्देयं। अनतिरिक्तदाने पापातिरिक्तेपि पुन्यं। अत्र दातुर्धर्म्मोऽन्यथा
भवेदिति विहिताकरणाद्धर्म्मसिद्धिरेव न भवतीति न किंतु प्रतिसिद्धाच एम·
रणादधर्म्मोऽपि दानसिद्धिस्तु स्वीये भवत्येव। इष्टस्य स्वत्वसंक्रमकारणा ११५
सत्वात्तेन न तच्छेत्तुं शक्यत इति अस्वीय एव दानानिष्पत्तिः एवं स्थावरे

पीति स्मृतिसारवाचस्पतिमिश्रादयः। समस्तापेक्षयानुमध्यग एव नामध्य
गतथा च बृहस्पतिः॥ सप्तागमाद्गृहस्तेत्राद्यद्यत्तत्तेनं प्रदीयते। पित्र्यं वाथ स्वयंप्राप्तं
दातव्यं विवक्षितं। स्वेच्छादेयं स्वयंप्राप्तं बन्धाचारेणावंधकं। वैवाहिके क्रमायाते सर्व
दानं न विद्यते। सप्तागमः सप्तविध आगमः। स च सप्तवित्तागमा धर्म्मा दायो लाभः
क्रयो जयः। प्रयोगः कर्म्मयोगश्च सत्प्रतिग्रह एव चेति मनूक्तं अत्र दायोऽन्वयाग
तो लाभो निध्यादिः जयः संग्रामे प्रयोगः कुसीदं कर्म्मयोगः कृषिवाणिज्यादिः। उप
लक्षणं चैतत्कथमपि स्वीकृतमसाधारणं स्वमात्रेच्छया अन्यसाधारणं तु तदनु
मतं सदेयमिति। वैवाहिकं दत्तं वैवाहिकपदेन शौर्यार्जितमपि विवक्षितं। स
र्वदानं अमत्या। अननुमत्या च यद्दानं तत्सर्वं न विद्यते। क्रमायातं स्थावरमप्य
विभक्तं तदुक्तं। सोदायिकं क्रमायातं शौर्यप्राप्तं च यद्भवेत्। स्त्रीज्ञातिस्वाम्यनुमतं द

११६ त्तं सिद्धिमवाप्नुयात्। सोदायिकं कन्याभोग्यतयाविवाहे यत्स्वत्वं तत्रैव पत्यागीयमाने
पत्यनुमत्यपेक्षान्यायसहत्वात् ननु स्वभोग्यतयापि प्राप्तपरिधानीयेस्त्वेतदृ
ष्टार्थत्वापत्तेः। क्रमागतेष्वविभक्तस्थावरजंगमेवास्वाम्यं तदपेक्षयैव दानं। एवं
शौर्यप्राप्ते रणाजिते शौल्के वोढ्ना दत्ते स्वत्वास्यनुमत्यपेक्षा नस्यैव स्वामिगामित्वा
भिधानात्। ननु वह्म्यादावपि तस्यार्जितत्पुरुषगामित्वाभिधानात् भंगिनादत्तास्व
पुरुषेषु समर्पितेष्वादौ न जांतरसेवनयाजितेजेत्राचरीयमाने भंगिदजसम्म
त्यपेक्षेत्यर्थ इत्यन्ये। बंधाचारेणेति बंधकं यथा स्वसंबंधितया परस्यापि कार्यं
तेनायमर्थः। दूरं वलम् मयि बंधकमस्तिमयातद्वियीयते तयापि बंधकोगं राम·
गृहीतास्त तत्स्वामिनिरेयमित्यर्थः। एवं विभक्ता अविभक्ता वा दायादाः स्था ११६
वरे समाः। एको ह्यनीशः सर्वत्र दानधमनविक्रये इति विभक्तानामपि यत्रांशाप

रिच्छेदो न जातस्तन्मध्यगमेव तिष्ठति तेन तत्र साधारणत्वमेव तत्र कोनीशः पृथगस्
तेषु सर्वेष्वेव द्रव्येषु स्वतंत्रकृतस्यासिद्धिरेवेति मिश्राः। विशेषस्तु दायप्रकरणे
अत्र दायमारत्नद्व निदायादः पुत्रादिरिति कल्पतरुप्रकाशाकारादयः। अन्येतु दा
याद परं पुत्र एव मुख्यमिति पितुरूपस्थितो विभक्तस्यापि पुत्रस्य विषमानेपि
तरि स्थावरेऽनीशत्वं तेन प्रतिग्रहादिसम्पाग मलत्वमेव दायमित्यर्थः। स्वतंत्रस्ता
मिरत्वं तु नाछेद्यं॥ अत्रैव हारीतः॥ प्रतिश्रुतार्थादानेन दत्तस्याछ्छादनेन वाविवि
धान्नरकान् यातितिर्यग्योनौ च जायते। वाचा यच्च प्रतिज्ञातं कर्मणानोपपादितं। राम
ऋणं तद्धर्मसंयुक्तमिहलोके परत्र च। क्वचित्प्रतिश्रुत्यापि न दद्यमित्याह गौतमः
प्रतिश्रुत्याप्यधर्मयुक्ताय न दद्यात्। अत्राधर्मी दानानर्हत्वप्रयोजकोऽभिमतः।
कात्यायनः॥ स्वेच्छया यत् प्रतिश्रुत्य ब्राह्मणाय प्रतिग्रहं। न दद्यात् ऋणवद्दाप्यः प्राप्नु

Indira Gandhi National
Centre for the Arts

११७ यातपूर्वसाहसं॥ तथा मत्स्यपुराणं॥ प्रतिश्रुतां दानातां स्ववर्णोदंडयेन्नृपः॥०॥ अथ द
त्तं॥ तत्र बृहस्पतिः॥ मतिलक्ष्यापणम् स्त्रीशुल्कमुपकारिणो। श्रद्धानुग्रह
सम्प्रीत्या दत्तमष्टविधं स्मृतं। मतिर्वेतनं तुष्ट्यावंदिचारणादिभ्यो दत्तं पणम्
द्यूतविजेतरि दत्तं स्त्रीशुल्कं कन्यापरिणयनार्थं तत्संबंधिनि दत्तं उपकारि
णो उपकारवते प्रत्युपकारतया दत्तं श्रद्धया सत्पात्रेभ्यो दत्तं अनुग्रहेणापुत्रादि
भ्यो दत्तं संप्रीत्या मित्रादिभ्यो दत्तं यत्तु पणम् स्यं मतिलक्ष्यत्वेनोक्तं प्रत्युपकारतः
।स्त्रीशुल्कानुग्रहार्थं च दत्तं दानविदो विदुरिति नारदेन दत्तस्य सप्तविधत्वमुक्तं
।तत्प्रीतिदत्तस्यानुग्रहदत्तेऽन्तर्भावाद्विरुद्धं एवमेव वाचस्पतिमिश्राः॥ रत्नः॥ राम
मातापित्रोर्गुरोर्मित्रविनीते चोपकारिणे। दीनानाथविशिष्टेभ्यो दत्तं तु सफलं ११७
भवेत्॥०॥ अथादत्तं॥ तत्र नारदः॥ अदत्तं तु भयक्रोधकामशोकरुगन्वितैः।त

थोत्कोचापरिहासव्यत्यासछलयोगतः। बालमूढास्वतंत्रार्तमत्तोन्मत्तापवर्जितैः।
कर्त्ता ममायं कर्मेति प्रतिलाभेच्छया च यत्। अत्र भयादिरुगन्वितांताः पंचप्रकृति
स्थताविरोधिनो द्रष्टव्याः। उत्कोचाकार्यायतेनदत्ते। परिहास उपहासो दानाभिसं
धिमंतरेणादानबोधकवचनमिति यावत्। व्यत्यासोऽन्यस्मै दातव्यस्यान्यस्मै दानं अ
न्यस्मिन् दातव्येऽन्यस्य वा यद्दानं छलं प्रमाद इति वाचस्पतिमिश्रप्रकाशकारौ यः
।बहुपरिभाष्य स्वल्पदानं तदिति रत्नाकरः। तच्चिंत्यं बालोऽत्र कार्याकार्यनिर्णयास
मवयो योगी एवमेव चंडेश्वरः कल्पतरुकाराविवेचकः स इति मिश्राः। मूढो जडः स्वभा
वादेव कार्याकार्याविवेचनासमर्थ इति रत्नाकरः। अस्वतंत्रः पुत्रदासादिः आर्तो रो
गाभिभूत इति रुगन्वितस्यासाध्यरोगवानिति विवरणं मिताक्षरायां। मत्तो मदिरादि
ना। उन्मत्तो वातेन। अपवर्जितः बंधुबहिष्कृतः। मिताक्षराकारहलायुधौ तु अपवर्जि

Indira Gandhi National
Centre for the Arts

११८ तंद्रतिपठित्वा अपवर्जितं दत्तमित्याहतुः। प्रतिलाभेच्छया सोपाधेर्दत्तमुपाध्यसि
द्वौ॥ कात्यायनः॥ कामक्रोधाभ्यां तं त्वार्त्तक्लीबोन्मत्तप्रमोहितैः। व्यासासपरिहा
साम्यां यद्दत्तं तत्पुनर्हरेत्। यादृक्कार्य्यप्रसिद्ध्यर्थमुत्कोचा स्यात्प्रतिश्रुता
।तस्मिन्नर्थेऽप्रतिसिद्धे तु न देया स्यात्कथंचन। अथ प्रागेव दत्ता स्यात्प्रति
दाप्यः स तां बलात्। दंडं चैकादशगुणमाहुर्गार्गीयगालवाः। अत्रार्थे नरत्तं ध
र्म्मकाममंतरेण दत्तमिवोद्धव्यं। तथा च कात्यायनः॥ स्त्येनार्त्तेन वा दत्तं श्रा
वितं धर्म्मकारणात्। अदत्तात्तु मृते दाप्यस्तत्सुतो नात्र संशयः। अधुना यदु राम
त्कोचमाश्रित्य दत्तमदत्तमित्युक्तं तमाह कात्यायनः॥ स्तेयसाहसिकोद्धतपा ११८
रदारिकशंसनात्। दर्शनाद्वृत्तनष्टस्य तथा सत्यप्रवर्त्तनात्। प्राप्तमेतैस्तु यत्
किंचित्तदुत्कोचाख्यमुच्यते। न दाता तत्र दंड्यः स्यात् मध्यस्थस्तत्र दोषभाक्। स्तेयं

चसाहसं चलयेत्साहसेन यस्य स स्तेयसाहसिकः। वृत्तनष्टो वृत्तच्युतः। तेन
स्तेनानुसंधात्रा स्तेनादिदर्शनार्थं यद्दत्तं दर्शयित्रे दत्तं। यच्च सत्याहीनऽसत्या
भिधाने प्रवर्त्तयित्रे दत्तं तदुत्कोचाख्यं कर्म्मसिद्धावपि निवर्त्त्यं मध्यस्थो य उ
त्कोचं गृह्णाति स दंड्यः॥ बृहस्पतिः॥ क्रुद्धहृष्टप्रवर्त्तीर्णैर्वालोन्मत्तभयातुरैः।
मत्तातिवृद्धनिर्धूतैः प्रमत्तैः शोकिरोगिभिः। नर्म्मदत्तं न देयं तैर्यद्दत्तं तत्प्रकीर्त्ति
तं। तेन धर्म्मार्थार्थं यद्दत्तं तत्प्रमाणमेवेत्यर्थः। अतिवृद्धो गलितेन्द्रियः निर्द्धू
तोपवर्जितः। नर्म्मदत्तं क्रीडादत्तं। तथा बृहस्पतिः॥ प्रतिलाभेच्छया दत्तमपात्रे
पात्रशंकया। कार्य्ये चाधर्म्मसंयुक्ते स्वामी तत्पुनराप्नुयात्। एवमन्यत्रापि।
मिश्रास्तु यद्धेयमदानं तदृपण्यात्सोत्भवति नदाछिद्य गृह्णीयादित्याह मनुः
॥धर्म्मार्थं येन यद्दत्तं कस्मैचिद्याचते धनं। पश्चाच्च न तथा तत्स्यात् न देयं तेन

११९ तद्भवेत्। यदि संसाधयेत्तत्तु दर्पाल्लोभेन वा पुनः। राज्ञो दाप्यः सुवर्णं स्यात्तस्यापि
च स्यान्निष्कृतिः। यदि संसाधयेदिति स्वयमेव यद्दत्तं तन्मया हृतमिति यदि यमिथ्याव
नस्वीकृतं न देहीति वा यदि वदति साहुः। रत्नाकरे लेख धर्म्मार्थमित्यादेः। धर्म्मा
र्थं यात्रिकालाग्रहीते यदि तेन धर्म्मं न करोति न ददाति तस्य तदाहरणीयं यदि तु
स दर्पाल्लोभाद्वा तमर्थं साधयेत्तदा राज्ञा सुवर्णं दंडनीय इत्यभिसाह
॥नारदः॥ गृहीत्वा स्वरत्नं यो मोहाद्यश्चादेयं प्रतीच्छति। दंडनीयावुभावेतौ ध
र्म्मज्ञेन महीभृता॥ ० ॥ अथ भृतकविधिः॥ तत्र बृहस्पतिः॥ अदेयादिक
माख्यातं भृतानामुच्यते विधिः। शुश्रूषामभ्युपेत्यैतत् परमादौ निगद्यते राम·
। शुश्रूषामभ्युपेतस्य शुश्रूषोरेतत्परं विचारपरमित्यर्थः। तथा स एव वेतन ११९
नस्यानपाकर्म्मेतदर्थं स्वामिपालयोः। कर्म्मशः कस्य न वारोभृतं मे दत्तं यो

दं। भृतोभृत्येन तत्कर्म्मकरः। कः शुश्रूषकः कतिविधा वा ते इत्याकांक्षायामाह
॥नारदः॥ शुश्रूषकः पंचविधः शास्त्रे दृष्टो मनीषिभिः॥ चतुर्विधः कर्म्मकरः शे
षा दासास्त्रिपंचकाः। चतुर्विधाः कर्म्मकरा दासेन सह पंच शुश्रूषका भवंति।
त्रिपंचकाः पंचदशात्मनः। भृत्यास्तु स्वनुवृत्तौ बृहस्पतिः॥ अनेधातेऽभिहिता
जातिकर्म्मार्थरूपतः॥ विद्याविज्ञानकामार्थैः निमित्तेन चतुर्विधाः। नारदः
॥शिष्यांतेवासिभृतकाश्चतुर्थस्त्वधिकर्म्मकृत्। एते कर्म्मकरा ज्ञेया दासास्तु
गृहजादयः। सामान्यमस्वतंत्रत्वमेषामाहुर्मनीषिणः॥ बृहस्पतिः॥ विद्यात्र
यी समाख्याता ऋग्यजुःसामलक्षणा। तदर्थं गुरुशुश्रूषां प्रकुर्याच्छास्त्र
देशितां॥ नारदः॥ आविद्याग्रहणाच्छिष्यः शुश्रूषेत्प्रयतो गुरुं। तद्वृत्ति
र्गुरुदारेषु गुरुपुत्रे तथैव च। तथा समावर्तनस्य गुरवे प्रदाय गुरुदक्षिणां। प्र

Indira Gandhi National
Centre for the Arts

१२० तीयात्स्वगृहान्नेषां शिष्यवृत्तिरुदाहृता। अनेन शिष्यभृतकः। द्वितीयविधा
यां बृहस्पतिः॥ विज्ञानमुच्यते शिल्पं हेमकुप्यादिसंस्कृतिः॥ नृत्यादिकं च तत्
शिक्षन् कुर्यात्कर्म गुरोर्गृहे। विज्ञानार्थिन एवं नारदेनान्तेवासित्वमुक्तं
॥यथा नारदः॥ स्वशिल्पमिच्छन्नाहर्त्तुं बांधवानामनुज्ञया। आचार्यस्य व
सेन्नित्यं कालं कृत्वा सुनिश्चितं। आचार्यः शिक्षयेदेनं स्वगृहे दत्तभोजनं।
न चान्यत्कारयेत्कर्म पुत्रवच्चैनमाचरेत्। स्वमात्मज्ञात्सुचितं आहर्त्तुं आ
दातुं अन्ते पार्श्वकालमवधिभृतं सुनिश्चितं सास्तिमत् अन्यत् शिल्पशिक्षि
तः। आम्पामंतेवासी भृतकः। तथा नारदः॥ शिक्षयंतं दुष्टं च यस्त्वाचा म
र्यं परित्यजेत्। बलाद्वासयितव्यः स्याद्वधबंधौ च सोर्हति। शिक्षितोपि कृ रामः
तं कालमंतेवासी समापयेत्। तत्र कर्म च यत्कुर्यादाचार्यस्यैव तत्फलं। १२०

वधोत्र ताडनमात्रं बंधो बंधनं यंत्रणामिति कश्चित्। कृतं कालं एतावत्कालं यावन्मया
भवद्गृहे मेतत्कर्त्तव्यमिति नियमितं एवंविधमध्ययनेपालयेदंतेवासी स यैः तत्फलं
भसादिकं। तथा गृहीतशिल्पैः समयेनाचार्यप्रदक्षिणां। शक्तिनश्चानुमान्येनमं
तेवासी निवर्त्तते। कामनिमित्तेनोक्तं भृतकं तृतीयं बृहस्पतिः परिभाषते॥ यो भुङ्क्ते
परदासीं नु सक्ते यो वडवा भृतः। कर्म तत्स्वामिनः कुर्याद्यथार्थभृतको नरः। स एषा
र्थभृतमाहुः धार्थभृतः प्रोक्तस्तथा भोगभृतोपरः। कर्म कुर्यात्प्रतिसानं लभतेप
रिभाषतं। द्विप्रकारो भोगभृतः कृषिगोजीविनां स्मृतः। जातशस्यात्तथा क्षीरात्सल
भेतन संशयः। भोगभृतस्याप्यर्थभृतविशेषत्वाच्चतुर्धं। भोगभृतद्वयत्र भागभृ
तमिति रत्नाकरकृता स्त्र पठितं भागभृतोत्र कर्मफलानां। सभृत इति व्याख्यातं
चा नारदेनैषां भृतकपदेन तृतीयप्रकारत्वमुक्तं। तेषां प्रकारानंतरमथाह स एव॥

Indira Gandhi National
Centre for the Arts

१२१ भृतकस्त्रिविधोज्ञेयउत्तमोमध्यमोधमः।शक्तिभक्त्यनुरूपास्यादेषांकस्याश्रयाभृतिः
।उत्तमस्त्वायुधीयोत्रमध्यमस्तुकृषीवलः॥अधमोभारवाहःस्यादित्येवंत्रिविधो
भृतः।अधिकर्म्मकृतमाहनारदः॥अर्थेष्वधिकृतोयःस्यात्कुटुंबस्यतथोप
रि।सोऽधिकर्म्मकरोज्ञेयःसचकौटुंबिकःस्मृतः।भक्तिरूपचारःकर्म्माश्रयाका
र्यनिर्वंधना अर्थेषुकार्येषु अनयोर्द्वयोरप्यधिकर्म्मकरकौटुम्बकसंज्ञेव्यवहा
रायबृहस्पतिनाप्यस्यार्थेभृतएवांतर्भावःकृतः।नारदेनतुसामान्यविशेषभा
वेनभेदेनगणानां।एषांमध्येकिंकस्यकर्म्मतत्राहबृहस्पतिः॥शुभकर्म्मक राम
रास्तेतचत्वारःसमुदाहृताः।जघन्यकर्म्मभाजस्तुशेषादासास्त्रिपंचकाः॥ १२१
कर्म्मापिद्विगुणंप्रोक्तमशुभंशुभमेववा।अशुभंदासकर्म्मोक्तंशुभंकर्म्मकृ
तःस्मृतं।गृहद्वाराशुचिस्थानरथ्यावस्करशोधनं।गुह्यांगस्पर्शनोच्छिष्टविन्मु

त्रग्रहणोज्झनं।गच्छतःस्वामिनस्त्वांगैरुपस्थानमथांततः।अशुभंकर्म्मविज्ञेयं
शुभमन्यदतःपरं।चत्वारःशिष्यांतेवासिभृतकाधिकर्म्मकृतःकर्म्मकृतशिष्या
दिचतुष्टयस्य।शोधनमितिप्रत्येकमभिसंबध्यते।ग्रहणंचउज्झनंचग्रहणो
ज्झनेउज्झनशब्दार्गेरुत्सर्गाद्वातोरनतिरूपं।गच्छतःस्वामिनःइच्छानुसारेणांगैर्ह
स्तादिभिःउपस्थानंसम्वाहनंतच्चांगनामेवअंततःसमीपतः॥कात्यायनः॥
विनष्टंचोत्सर्जनंचैवनग्नत्वपरिमर्द्दनं।प्रायोदासीसुताःकुर्युर्गवादिग्रहणं
चयत्।नग्नत्वपरिमर्द्दनंपरिधापनंनग्नत्वेसतिपरिमर्द्दनंसम्वाहनमितिपारि
जातः।पंचदशविधदासमाहनारदः॥गृहजातस्तथाक्रीतोलब्धोदायादुपागत
ः।अन्नाकालभृतस्तद्वदाहितःस्वामिनाचयः।मोक्षितोमहतश्चर्णात्युद्धप्राप्तःप
णेजितः।तवाहमित्युपगतःप्रव्रज्यावसितःकृतः।भक्तदासश्चविज्ञेयस्तथैववड

Indira Gandhi National
Centre for the Arts

१२२ वामतः। विक्रेता चात्मनः शास्त्रे दासाः पंचदश स्मृताः। गृहेजातः स्वदास्यां जातः।
क्रीतो मूल्येन स्वीकृतो दास्यः। लब्धः प्रतिग्रहादिना। दायादुपागतः पित्रादिक्रमादु
पागतः अनाकालभृतो दुर्भिक्षेऽन्नं दत्वा रक्षितः प्राणाः आहितआधीकृतः मोक्षि
तो महतश्च ऋणात् ऋणान्मोचनेनाभ्युपगतदास्यः युद्धप्राप्तो रणे विजित्य गृ
हीतः पणोजितो यद्यस्मिन् विवादे पराजितो भवामी सादि परिभाषणेन दासी
कृतः। एवमेव चंद्रेश्वरः प्रकाशकारः पारिजातोनुष्युतजिरित्यर्थ इत्याह तु।
तवाहमित्युपगतः तवाहं दास इति कृताभ्युपगतः। प्रव्रज्यावसितः प्रव्रज्या
भ्रष्टः। कृतः कृतकालः एतावंतं कालं तवाहं दास इत्यंगीकृतदास्य इति यावत्। एम:
भक्तदासो भक्तार्थमेव दुर्भिक्षेपि अंगीकृतदास्यः। वडवाभृतः वडवादासीत १२२
याभृतः तल्लोभादंगीकृतदास्यः। विक्रेता आत्मनः स्वविक्रयेन दासीभूतः। नारदः॥

राजन्यवनुदासः स्यात् प्रव्रज्यावसितो नरः। न तस्य हि विमोक्षोस्ति न विशुद्धिः कथं
चन। नरपरं ब्राह्मणो न परं तस्य निर्वासमात्रविधानात् यथा कात्यायनः॥ प्र
व्रज्यावसितो यत्र त्रयो वर्णा द्विजातयः। निर्वासं कारयेद्विप्रं दासत्वं क्षत्रविन्नपः
।क्षत्रविडिति समाहारद्वन्द्वः क्षत्रियवैश्यावित्यर्थः दासत्वं क्षत्रवि। शौनपद्गतिप्रा
यश्चिन्न विवेक पाठः। निर्वासविशेषमाह दक्षः॥ पारिव्राज्यं गृहीत्वा यः स्वधर्मे
नानुतिष्ठति। श्वपदेनांकयित्वा तं राजा शीघ्रं प्रवासयेत्। स्वधर्मः पारिव्राज्य
वतो धर्मः॥ ० ॥ अथ दासस्य मोक्षः कस्य दासस्य कथं मोक्षोऽमोक्षो वा तत्राह नार
दः॥ तत्र पूर्वश्चतुर्वर्गो दासत्वान्न विमुच्यते। प्रसादात् स्वामिनोन्यत्र दास्यमेषां
क्रमागतं। तत्रेति गृहेजातक्रीतलब्धपारम्पर्यागत इत्यर्थः तत्रेव च दासपरं मुख्यं
।अन्यत्र पारतंत्र्यगुणाद्गौणं। तेन दासेनोढेस्तत्र पूर्वं चतुर्वर्गग्रहणं। तथा विक्री

Indira Gandhi National Centre for the Arts

१२३ नीतेस्वतंत्रःसन्नयआत्मानंनराधमः।सजघन्यतमस्तेषांसोपिदास्यान्नमुच्यते।
स्वतंत्रोऽस्वामिकः।अत्रापिनास्वामिप्रसादादितिसंबध्यते।यत्तुनस्वामिना
विसृष्टोऽपिशूद्रोदास्यात्प्रमुच्यते।निसर्गजंहितत्तस्यकस्तस्मात्तदपोहती
तिमार्कंडेयपुराणेहरिश्चंद्रवाक्यंतद्दासनिंदापरं।अन्यथाशूद्रेषुदास्यहेतु
क्रयणादिकंनप्रसज्येतेति।अन्नाकालभृतोदास्यान्मुच्यतेगोयुगंददत्।भ
क्षितंचापियद्भक्तंतन्नमुच्यतिकर्मणा।दुर्भिक्षेयद्भक्षितंतद्गोयुगसहितंद
त्वामुच्यते।एवमेवविवादचिंतामणिः।चंडेश्वरस्तु अन्नाकालभृतोदुर्भिक्षेऽ
न्नंदत्वामरणाद्रक्षितोगोयुगप्रदानेनमुच्यतेननुयत्भक्षितंतेननतत्कर्मणा राम·
मुच्यतिअत्रतत्त्वंछंदोर्थमवश्यंगोयुगंदानव्यमित्याह।नारदः॥आहितोपिध १२३
नेदत्वास्वामीयद्येनमुद्धरेत्।अथोपगमयेदेनंसोपिक्रीतादनंतरः।यस्मिन्ना

हितोबंधकीकृतोदासस्तमेवयदिग्राहयेत्तदाक्रीतादनंतरःक्रीतादविशिष्टोभवती
त्यर्थः।सएवाहऋणंतुसोदयंदत्वाऋणीदास्याद्विमुच्यते।कृतकालव्यपगमात्
कृतकोपिविमुच्यते।ऋणार्थंकर्मकारयेदितिवचनेनऋणार्थंकर्मकरःकथितोन
तुवस्तुदासःअतएवमोच्यःतथायःकश्चित्कस्माच्चिद्धेतोःऋणस्थितिकालंयाव
द्दासीकृतःसकृतकःकर्मणाऋणात्ययेणावधौपूर्णेमुच्यतेइत्यर्थः।तथानतवा
हमित्युपगतोरणेप्राणाःपणोजितः।प्रतिशीर्षप्रदानेनमुच्यतेतुल्यकर्मणा।प्रति
शीर्षप्रदानेनस्वतुल्यदासप्रदानेनइत्यर्थःनारदःतवाहमित्युपगतोयोऽस्वतंत्रः
प्रयच्छति।नसतंप्राप्नुयात्कामंपूर्वस्वामीलभेतनं।उत्तरस्यदासएवासौनभवती
त्यर्थः।कात्यायनः॥प्रव्रज्यावसितोयत्रत्रयोवर्णाद्विजातयः।निर्वासंकारयेद्विप्रं
दासत्वंक्षत्रविन्नृपः।तत्रविडितिव्याख्यातार्थेनिर्वासेविशेषमाहस्मृतः।पारिव्रा

Indira Gandhi National
Centre for the Arts

१२५ ज्यं गृहीत्वा तु स्वधर्म्मे नानुतिष्ठति स्वपरेनां कथितां तां राजा शीघ्रं प्रवासयेत्। स्वधर्म्म
पारिव्राज्यवतो धर्म्मयश्चैषां स्वामिनं कश्चित् मोक्षयेत प्राणसंशयात्। दासत्वात्स
विमुच्येत पुत्रभागं लभेत सः। एषां मध्ये तथा भक्तस्यापेक्षणात् स घः भक्तदासः
प्रमुच्यते। निग्रहाद्दुड वा याश्च मुच्यते वडवाभृतः। निग्रहात् त्यागात्। वडवाया
दास्याः। नारदः॥ चौरापहृतविक्रीता येच दासीकृता बलात्। राज्ञा मोचयितव्यास्ते
दासत्वं तेषु नेष्यते। कात्यायनः॥ स्वदासीं यस्तु संगच्छेत् प्रसूता च भवेत्ततः। अवे
स्यावीजं कार्य्या स्याद्दासी सान्वया नु सा। अस्यार्थः अवेस्यावीजं स्वामिना तस्यां ज
नितं पुत्रं सान्वया तत्पुत्रसहिता अदासी कार्य्या इर मन्यपुत्राभावे अन्यथा त्व दास
न्य एव पुत्रस्तदर्थं क्रियायामिति नसान्वया अदासी कार्य्येति रत्नाकरप्रकाशका १२५
रपारिजातादयः। मिश्रास्तु मन्यन्ते वत्स्वरसः। यः प्रसादेनादासः कार्य्यस्तत्र प्रका

रमाह नारदः॥ स्वं दासमिच्छेद्यः कर्तुमदासं प्रीतमानसः। स्कंधादादाय तस्याशु
भिंद्यात् कुंभं सहांभसा। साक्षताभिः सपुष्पाभिर्मूर्द्धन्यद्भिरवाकिरेत्। अदा
स इति चोक्त्वा त्रिः प्राङ्मुखं तमथोत्सृजेत्। ततः प्रभृति वक्तव्यः स्वाम्यनुग्र
हपालितः। भोज्यान्नोऽथ प्रतिग्राह्यो भवेदभिमतः सतां। अथ नात्र य एवैते भा
र्य्यादासस्तथा सुतः। यत्ते समभिगच्छन्ति यस्यैते तस्य तद्धनं। प्रीतमानसस्तुष्टः
स्कंधात् स्वदासस्य कुम्भं भिंद्यात् अम्भसा सलिलेन सह अद्भिः पानीयैः॥ उत्
सृजेत् विसृजेत्। ततः प्रभृति स्वाम्यनुग्रहपालित इति संज्ञया वक्तव्यः अभि
मतः पूज्यः। देवलः॥ पत्नौ जीवति नारीणां दासानां स्वामिनि स्थिते। तद्भिय
तम स्वाम्यं सर्व्वार्थेष्वब्रवीन्मनुः॥ विश्रब्धं ब्राह्मणः शूद्राद्द्रव्योपादानमाच
रेत्। नहि तस्यास्ति किंचित् स्वं भर्तृहार्य्यधनो हि सः॥ कात्यायनः॥ दासस्य

Indira Gandhi National
Centre for the Arts

१२५ तु धनं यत् स्यात् स्वामी तत्र प्रभुर्यतः। प्रमादविक्रयाद्यन्तु न स्वामी धनमर्हति। स्वा
मिप्रसादात्तु विक्रयाद्वयम्लब्धं दासेन तद्दासधनं स्वामी नार्हति। एवमेव वाच
स्पतिमिश्रप्रकाशकामधेनुपारिजातादयः। प्रकाशविक्रयाद्युत्तं तत्स्वामीध
नमर्हति इति लक्ष्मीधरेण पठितं न तु व्याख्यातं। तत्र प्रकाशविक्रयाद्यं तद्धनं
तत् स्वामी दासस्य नार्हति न दासप्रभोस्तत्र प्रभुत्वमित्यर्थः इति रत्नाकरः। दासे
नोढा तु दासी या सापि दासीत्वमाप्नुयात्। यस्माद्भर्त्ता प्रभुस्तस्याः स्वाम्यधीनः
प्रभुर्यतः। अत्र दासपरो यस्थापितप्रतियोगिकमेव दासीत्वं दासत्वं च परिग्रा
यात्। अतो स्वामिकान्यस्वामिका वा परिणीता सती स्वामिनः स्त्री भवति अर्थी एम·
श्वदासोढत्वं पूर्वस्वामिदास्यमोक्षहेतुरक्तः। अत एव तत्प्रकरणे वाक्यमिदं। १२५
साम्यनुमत्या च दासकृतं प्रमाणमतस्तद्विमतिविषयचेटिकापरिणयनात्तत्प्र

वं स्वामित्वत्वहानिरिति ॥० ॥ अथ दास्याधिकारिणः ॥ तत्र नारदः ॥ वर्णानां प्रा
तिलोम्येन दासत्वं न विधीयते। स्वधर्म्मत्यागिनोऽन्यत्र दारवद्दासता मता। उत्तमस्य
नीचदासत्वं न भवति दारत्ववत्स्वाश्रमधर्म्मत्यागिनः पुनस्तादृशी दासतेति फलितार्
थः ॥ विष्णुः ॥ यस्तूत्तमवर्णं दास्ये नियोजयति तस्योत्तमसाहसो दण्डः। उत्तमवर्ण
ब्राह्मणं। उत्तमसाहसः पणसहस्रं कात्यायनः ॥ त्रिषु वर्णेषु विज्ञेयं दास्यं विप्र
स्य न क्वचित् समवर्णेषु विप्रस्तु दासत्वं नैव कारयेत्। शीलाध्ययनसंपन्नस्तदूनं
कर्म्म कारयेत्। तत्रापि नाशुभं किंचित् प्रकुर्वीत द्विजोत्तमः। ब्राह्मणस्य हि दासत्वा
न्नृपतेजो विहन्यते। क्षत्रविट्शूद्रधर्म्मस्तु समवर्णं कदाचन। कारयेद्दासकर्म्माणि
ब्राह्मणं न बृहस्पतिः। सगुणो निर्गुणं अधिकगुणोऽनुनगुणं कर्म्म कारयेत्। अ
त्रापि अशुभं विण्मूत्रशोधनादिकं न कारयेत्। क्षत्रियवैश्यशूद्राणां तु समानगु

Indira Gandhi National
Centre for the Arts

१२६ णानामपि सवर्णोपि क्वचित् दासस्वामिभावो भवेत्। ब्राह्मणस्य समवर्णोसमानः
र्णोस्मानगुणो वा कारयेदिति वृहस्पतिम्मन्यत इति पारिजातहलायुधौ। तत्रवि
दृष्टद्धर्म्मस्य ब्राह्मणो ब्राह्मणं दासकर्म्माणि न कारयेदिति लक्ष्मीधरः। मनुः
॥क्षत्रियं चैव वैश्यं च ब्राह्मणो वृत्तिकर्षितौ। बिभृयादानृशंस्येन स्वानि कर्म्माणि
कारयेत्। स्वानि जातिसुक्तानि। दास्यं तु कारयेन्मोहात् ब्राह्मणः संस्कृतान् द्विजा
न्। अनिच्छतः प्राभाविक्याद्राज्ञा दंड्यः शतानि षट्। प्राभाविक्यात् प्रभुत्वात्। संस्कृता
न् अध्ययनसंपन्नान् तेन यो ब्राह्मणः शीलाध्ययनसम्पन्नान् द्विजान् अनिच्छतः
स्वप्रभुत्वात् द्विजानुचितकर्म्माणि कारयेत् सराज्ञा षट्शतानि दंड्य इत्यर्थः। णम
तथा शूद्रं तु कारयेद्दास्यं क्रीतमक्रीतमेव वा। दास्यायैव हि सृष्टोसौ स्वयमेव १२६
स्वयंभुवा। न स्वामिना विसृष्टोपि शूद्रो दास्याद्विमुच्यते। निसर्गजं हि तत्तस्य क

र्थं तस्मात्तदपोहति। शूद्रं तु क्रीतमक्रीतं वा दास्यं जघन्यमपि कारयेत्। दास्याद्दासकर्म्मणः
॥कात्यायनः॥ आरुह्य ब्राह्मणीं यस्तु विक्रीणीयात्तथैव च। तस्यानरकृतं कार्य्यं दंड्याः
स्युः कामानुसंश्रितां यस्तु दासीं कुर्य्यात् कुलस्त्रियं। संक्रामयति वान्यत्र दंडस्तत्रा
कृतं भवेत्। यः स्वेच्छयोपगतामपि कुलस्त्रियं दासीं कुर्य्यात् अन्यस्मै वा समर्पयेत्
स दंड्य इत्यर्थः। तथा बालधात्रीमदासीं च दासीमिव भुनक्ति यः। परिचारकपत्नीं च
प्राप्नुयात् पूर्वसाहसं। विक्रोशमानां यो भक्तां दासीं विक्रेतुमिच्छति। अनापदिस्थः
शक्तः सन् प्राप्नुयाद्द्विशतं दमं। बालधात्रीं बालस्य स्तन्यदानेन पोषणं कुर्वाणां। अ
दासीः निःस्त्रियं शरणागतां वा इति विश्वरूपः। परिचारकः सेवकः। विक्रोशमा
नां नाहं विक्रेतव्येति वदंती पूर्वसाहसं सार्द्धपणशतद्वयं॥ ० ॥ अथ वेतनस्यान
पाकर्म्म॥ तत्र नारदः॥ भृतानां वेतनस्योक्तो दानादानविधिक्रिया। वेतनस्यानपाक

Indira Gandhi National
Centre for the Arts

१२७ र्म्मतद्विवादपदं स्मृतं। भृत्यायवेतनं दद्यात्कर्म्मस्वामी यथाकृतं। आदौमध्येऽवसा
ने वा कर्म्मणो यद्विनिश्चितं। भृतावनिश्चितायां तु दशभागमाप्नुयुः। लाभगो
वीर्य्यशस्यानां वणिग्गोपकृषीवलाः। यथाकृतं यथाव्यवस्थितं। कर्म्मण आदौ
मध्येऽवसाने पंचसप्तादिविंशतिरित्यादिक्रमेणेति पारिजातः। लाभो वाणिज्ये
धनवृद्धिः गोवीर्य्यं दुग्धं। अनेकसाध्ये विशेषमाह याज्ञवल्क्यः॥ यो यावत्कु
रुते कर्म्म तावत्तस्य तु वेतनं। उभयोरप्यसाध्यत्वात्साध्यं कुर्य्याद्यथाश्रुतं। अने
कपुरुषैर्यत्साध्यं कर्म्म तत्रोभयोरप्यसाध्यं कर्म्मानुसारेण वेतनं देयं यत्तु
स्वामिकर्म्मकारयोरन्यतरस्यासाध्यं भवति तत्र यथाश्रुतं यथाविहितं वंटनं का राम·
र्य्यमित्यर्थः। पारिजातस्तु उभयोरपीत्युभयग्रहणं अनेकोपलक्षणार्थं तेनद्व १२७
व्यामशक्यकर्म्मणि यो यावत्कर्म्म करोति तस्मै कर्म्मानुसारेण वेतनं देयं। साध्ये

तु यथाश्रुतं यथापरिभाषितमित्यर्थ इत्याह॥ बृहस्पतिः॥ त्रिभागं पंचभागं वा गृह्णीया
त्सीरवाहकः। तत्र व्यवस्थामाह स एव॥ भक्ताच्छादनभृत्सीरी भागं गृह्णीत पं
चकं। जातशस्यत्रिभागं तु प्रगृह्णीतोपधाभृतः। उपधया व्यापारफलेन शस्यादि
ना भृतः तेन भक्ताछादनभृतादन्य इत्यर्थः। नारदोक्तो दशमांशः सीरवाहकेत
रविषयः। आपस्तम्बः। उद्वसतः कीनाशस्य दंडताडनं तथा पशुपस्यावरोधनं
चास्य पशूनां। उद्वसतः पलायमानस्य कीनाशस्य हलवाहकस्य दंडताडनं। तथा
पशुपालकस्य दंडताडनं अस्य पशूनां चावरोधनं कार्य्यमित्यर्थः॥ वृद्धमनुः॥ स
मुद्रयानकुशला देशकालार्थदर्शिनः। नियच्छेयुर्भृतिं यां तु सा स्यात्प्रगकृताय
दि॥ समुद्रयानकुशलावनिर्वितनाभिज्ञा नियच्छेयुर्दद्युरित्यर्थः॥ बृहस्पतिः॥
गृहीतवेतनः कर्म्म न करोति यदा भृतः। समर्थश्चेद्दमं राज्ञो द्विगुणं तच्च वेतनं।

Indira Gandhi National
Centre for the Arts

१२८ समर्थः सन्न चेत् कर्म न करोतीति संबंधः ॥ याज्ञवल्क्यः ॥ गृहीतवेतनः कर्म त्यजन्
द्विगुणमावहेत्। अगृहीते समं दाप्यो भृत्यै रक्ष्य उपस्करः। कर्मारम्भं त्यजन् गृही
तवेतनो द्विगुणं वेतनं दद्यात् अगृहीतवेतनः समं परिदाप्य इति तावन्मात्रं धिकं न
द्विगुणमित्यर्थः। भृत्यैर्हलवाहकादिभिः रक्ष्यो रक्षणीयः उपस्करो लांगलका
दीनां योक्त्रादि ॥ नारदः ॥ कर्माकुर्वन् प्रतिश्रुत्य कार्यो दत्त्वा भृतिं बलात्। भृतिं द
त्वा बलात् कर्म कार्यः कारयितव्य इत्यर्थः ॥ ० ॥ बृहस्पतिः ॥ प्रतिश्रुत्य न कुर्याद्यः
स कार्यः स्याद्बलादपि। स चेन्न कुर्यात्तत् कर्म प्राप्नुयाद् द्विशतं दमं। इदं मारभ्या
कुर्वतः। अनारंभे तु मनुः ॥ भृतो नार्त्तो न कुर्याद्यो दर्पात् कर्म यथोदितं। स दं रम
ड्यः कृष्णलान्यष्टौ न देयं चास्य वेतनं। यथोक्तमार्त्तः सुस्थो वा यस्तत् कर्म न का १२८
रयेत्। न तस्य वेतनं देयमल्पोनस्यापि कर्मणः। कृष्णलानि सुवर्णस्य निष्कोषः।

अनार्त्तः कर्माकरणहेतुरोगादिकोपघातरहितः न कारयेन् स्वयमन्यद्वारा वा अल्पो
नस्य किंचिदपरिसमाप्तस्य ॥ तथा मनुः ॥ आर्त्तस्तु कुर्यात् सुस्थः सन् यथाभा
षितमादितः। सुदीर्घस्यापि कालस्य स लभेतैव वेतनं। यस्मादार्त्तिवशात् कर्म हि
त्वा सुस्थः स चिरेणापि कृत्वा वेतनं लभेतेत्यर्थः ॥ नारदः ॥ काले पूर्णे त्यजन्
कर्म भृतेर्नाशमवाप्नुयात्। स्वामिदोषादपक्रामन् यावत् कृतमवाप्नुयात्।
भृतेरविद्यायाः सर्वं स्यादिति यावत्। तेन तद्दोषात्त्यागे किं यत्स विभृतिर्निर्देया यत्
त्वपूर्णे एव काले स्वामिदोषात्त्यागस्तदा यावत्कृतं तावतो भृतिर्लभ्येतेत्यर्थः ॥
विष्णुः ॥ भृतकश्चापूर्णे काले कर्म त्यजन् सकलमेव मूल्यं दद्यात् राज्ञे च पणशतं द
द्यात् तद्दोषेण यद्विनश्येत्तत् स्वामिने देयमन्यत्र राजदैवोपघातात् स्वामी चेद्भृत
कमपूर्णे काले जह्यात्तस्य सकलमेव मूल्यं दद्यात् पणशतं राज्ञे अन्यत्र भृतक

Indira Gandhi National
Centre for the Arts

१२९ दोषातामुल्लसंवेतनं॥ वृद्धमनुः॥ प्रमादान्नाशितं दाप्यः समं द्विड्रोहनाशितं। तनु॰
दाप्योहृतं चौरैर्दग्धमुदकं जलेन वा। दाप्यो भृतकः प्रकरणात्। हृतं चौरैर्दग्धमुदकं
जलेन वेत्यनेन भृतकदोषव्यतिरेकेणाविपत्तिमुपलक्षयति इति रत्नाकरः
।मिश्रास्तु मध्यत्रैवस्वरसः॥ वृहस्पतिः॥ प्रभुणा विनियुक्तः सन् भृतको वि
दधाति यत्। तदर्थमप्रभुं कर्मस्वामी तत्रापराधुयात्। तदर्थे स्वाम्यर्थे अ
प्रभुं चौर्यादि स्वामिन एव तत्र दोषो न तु भृतस्येत्यर्थः॥ वृद्धमनुः॥ पथिवि
क्रीयतद्भांडं वणिग्भिस्तत्सजेद्यदि। अगतस्यापि देयं स्याद्दृते द्वैलभेतु सः।
अगतस्यापि पूर्वश्रावितं अध्वानमगतस्यापि भृतकस्य हृतवेतनं देयं स्यात् रम.
किंतु गताध्ववेतनार्द्धमित्यर्थः॥ कात्यायनः॥ यदा च पथि तद्भांडं मसिध्येत हि १२९
येत वा। यावानध्वा गतस्तेन तावतां लभते भृतिं। असिद्धेन अवरोधविषयी॰

क्रियेत॥ कात्यायनः॥ सत्येन पथि सहायं यः श्रान्तं रोगार्त्तमेव वा। आप्नुयात्सह
संपूर्वं ग्रामेह समापयन्। यः स्वामी ग्रामे त्वहमप्रतिपाल्य श्रान्तं रोगार्त्तं वा सह
यं भृतकं हृत्संसृजेत्। सपूर्वसाहसंदाप्योदण्डइत्यर्थः॥ ०॥ अथ पण्यस्त्रीविधिः
॥तत्र नारदः॥ शुल्कं गृहीत्वा पण्यस्त्री नेच्छन्ती द्विगुणं वहेत्। अनिच्छन् शुल्क
दात्रापि शुल्कहानिमवाप्नुयात्। शुल्कं वेतनं अत्रापवादमाह रत्नाकरधृतास्मृ
तिः॥ व्याधिता सश्रमा व्यग्रा राजकर्मपरायणा। आमंत्रिता च नागच्छेद वाच्या
वडवा स्मृता। अवाच्या निर्दोषा वडवात्र वेश्या॥ मत्स्यपुराणे॥ अयोनौ यः
समाक्रामेत् बहुभिर्वापि वासयेत्। शुल्कं सोऽष्टगुणं दाप्यो विनयं तावदेव तु।
अयोनौ मुखादौ यः समाक्रामेत् मेहनं प्रवेशयेत्। बहुभिर्वा वासयेत् आत्मा
र्थं भाटशुल्कं दापयित्वा बहुभिः पुरुषैर्योजयेत्। स वेश्या शुल्कं अष्टगुणं राजदंडं

Indira Gandhi National
Centre for the Arts

१३० चरघातिसर्थः॥ मत्स्यपुराणे॥ अन्यमुद्दिश्य यो वेश्यां नयेदन्यस्य कारणात्
तस्यास्यं दंडो भवेद्राज्ञः सुवर्णस्य च माषकं। नीत्वा भोगं न यो दद्यात्स दाप्यो द्वि
गुणं वेतनं। राजन्यत्र द्विगुणं दंडं तथा धर्मो न हीयते। बहूनां व्रजतामेकां स
र्वेषां द्विगुणो दमः। संप्रदधुः पृथग्राज्ञे दंडं च द्विगुणं परं॥ अत्र द्विगुणो दंडो दमो दंडश्च व्यस
चारित्रये राज्ञे चरेयः॥ नारदः॥ वेश्याः प्रधाना यास्तत्र कामुकास्तद्गृहोषिताः। तत्स
मुत्थेषु कार्येषु निर्णयं संशये विदुः। प्रधानात्स्त्रीलिंगनिर्देश आर्षः तत्समुत्थे
षु वेश्यागृहोषितकामुकसमुत्थेषु संशये वेश्याकामुकविप्रतिपत्तौ॥ ०॥ अ
थ गृहादिभाटकं॥ तत्र नारदः॥ परभूमौ गृहं कृत्वा स्तोमं कृत्वा वसेत्तु यः। स तद्गृ एम·
हीत्वा निर्गच्छेत्तृणकाष्ठेष्टकादिकं। स्तोमं विना वसित्वा तु परभूमावनिच्छतः। १३०
निर्गच्छंस्तृणकाष्ठानि न गृह्णीयात्कथंचन। स्तोमं वा सम्यक् स्वं। कात्यायनः॥ गृहवा

र्यापणादीनि गृहीत्वा भाटकेन यः। स्वामिने नार्पयेद्यावत्तावद्दाप्यः स भाटकं। वारिका
शित्वाऽप्रतिष्ठितमत्र विवक्षितं। तथाह स्मृत्यंतरे गोवरोष्ठारीन् गृहीत्वा भाटकेन यः
। नार्पयेत्कृतकृत्यः सन् तावद्दाप्यः स भाटकं॥ वृद्धमनुः॥ यो भाटयित्वा प्राकटं नी
त्वान्यत्र गच्छति। भाटं नरः प्रदद्यात्स तावन्नरस्यापि भाटकं। प्राकटमिति बाह्यमा
त्रोपसत्तवां अनडुहस्यापि अवाहितस्यापि नारदः॥ स्तोमवाहीनि भांडानि पूर्णा
कालेषु पालयेत्। गृहीतुराभवेद्भग्नं नष्टं चान्यत्र संप्लवात्। स्तोमं वेतनं। पूर्णका
लेऽवधिकाले उपनयेत् तत्स्वामिने समर्पयेत् संप्लवो राजदैवतं तेन राजदै
वमंतरेण विघटितं प्राकारादि गृहीतुः समाधेयमिति समुदायार्थः॥ ०॥
अथ स्वामिपालविवादः॥ तत्र मनुः॥ पशुषु स्वामिनां चैव पालानां च यथा
विधि। विवादं संप्रवक्ष्यामि यथावद्धर्मतत्त्वतः। पशुषु विवादे भर्तृषु। गोपः

Indira Gandhi National
Centre for the Arts

१३१ क्षीरभृतिर्यस्य स दुह्याद्दशतो वरां। गोस्वाम्यनुमते भृत्यः सा स्यात्पाले भृते भृतिः। क्षी
रभृतिः क्षीरमात्रभृतिः। दुह्याद्दशतो वरां दशसु गोषु या वरा तां दुह्यादित्यर्थः। स्व
एकगोदोहनरूपा। पाले गोपाले। अभृते ग्रासाच्छादनादिनादनिशेषः। इदं द
शमात्रधेनुदत्तौ। धेन्वाधेनुदत्तोनु नारदः॥ गवां शताद्वत्सतरी धेनुः
स्याद्द्विशताद्भृतिः। प्रतिसंवत्सरं गोपे संदोहश्चाष्टमेऽहनि। गवां शताद्
त्तितात् द्विशतादित्यत्रापि तथा। वत्सतरी त्रिहायनी गौः। संदोहो यावत्सोत्र धे
नवस्तावतीनामष्टमाहे सम्यग्दोहः॥ नारदः॥ उपानयेद्गां गोपाय प्रत्यहं रजनी
क्षये। चीर्णाः पीताश्च ता गोपः सयाह्ने प्रत्युपानयेत्। उपानयेदित्यस्यार्थमुपन राम:
येत्। चीर्णाः भक्षिततृणाः पीताः पीतजलाः। सायाह्ने ईषदवशिष्टदिने प्रत्युपा १३१
नयेत् स्वामिने समर्पयेत्॥ याज्ञवल्क्यः॥ यथार्पितान् पशून् गोपः सायं प्रत्यर्पये

त्तथा। प्रमादहतनष्टांश्च प्रदाप्यः कृतवेतनः। प्रमादः पालस्यदत्तादि। यथैव प्रातः
समपेत्रचरणादिदोषरहिताः पशवः। स्वामिना च गोपाले समर्पिताः। तथैव सायं स
मर्पये गोपस्तानानीय समर्पयेत्। प्रमादात् मृतान् नष्टान् वा गां दाप्यः। स यदि कृतवेत
नो भवेत्। इति दीपकलिका। मनुः॥ दिवा वक्तव्यता गोपे रात्रौ स्वामिनि तद्गृहे। योग
क्षेमेऽन्यथा चेत्पालो वक्तव्यतामियात्। वक्तव्यता पर्यनुयोगः॥ यदि योगक्षेमौ
अन्यथा रात्रावपि गोपस्य व्यवस्थापितौ तदा स एव रात्रावपि वक्तव्यतामिया
दित्यर्थः। अत्रापवादमाह तु मनुनारदौ॥ विक्रम्य तु हृतं चौरैर्न पालो दातुमर्
हति। यदि देशे च काले च स्वामिनः स्वस्य शंसति। देशकाले अन्वेषणयोग्यो॥ इ
ति विवादरत्नाकरः। चौरैः पुनः पटहादिमोक्षस्पृहीनं पालो दातुं नार्हतीति विवुद्ध
तिचोराणां बहुत्वप्रबलत्वकथनपरं। यदि संनिहितदेशे हरणकालानन्तरमे

Indira Gandhi National
Centre for the Arts

१३२ वातीयस्वामिनः कथयन्निति उत्तरक भद्रः विबुध्यंतेस्य त्र विक्रमेति यारोपितस्यपन्ते
॥तथा व्यासः॥ पालग्रहे ग्रामघाते तथा राष्ट्रस्य विप्लवे॥ यत्प्रणष्टं हृतं वा स्यात्
न पालस्तत्र किल्बिषी। पालग्रहे पालग्रहणो विरोध इति यावदिति चंद्रेश्वरः॥
बृहस्पतिः॥ क्रमिचोरव्याघ्रभयाद्दरीश्वभ्राच्च पालयेत्। व्यायच्छंश्छक्तितः
क्रोशेत्स्वामिने वा निवेदयेत्। दरी कंदरा श्वभ्रं गर्त्तः। क्रम्याद्युपद्रवेभ्यः शक्ति
तो रक्षां कुर्यात्। क्रोशेत् उच्चैः परान् श्रावयेत्॥ नारदः॥ अव्यायच्छन्नविक्रो
शन्स्वामिने चानिवेदयन्। वोढुमर्हति गोपस्तां विनयं चैव राजनि। वोढुं दातुं तां दम·
गां। मनुनारदौ॥ नष्टं विनष्टं कृमिभिः श्वहतं विषमे मृतं। हीनं पुरुषकारेण प्र
दद्यात्पाल एव तत्। नष्टं चौरादिनापहृतं। विनष्टमिति कृमिभिरित्यत्रान्वेति। श्वप १३२
द मत्स्याद्युपलक्षकं। विषमे दुर्गे पर्वते हीनं पुरुषकारेणागोपकर्त्तव्यप्रतीकारेण

हीनं स च पालस्कंधस्थं तेन पालवैगुण्यं तद्दाने कारणमित्यर्थः॥ याज्ञवल्क्यः॥
पालदोषविनाशे तु पाले दंडो विधीयते। अर्द्धत्रयोदशपणाः स्वामिनो द्रव्यमेव च
।पालदोषाद्विनाश इति विज्ञः। द्रव्यं विनष्टद्रव्यमूल्यपरं चेतत्। विष्णुः॥ पाल
दोषविनष्टपशुमूल्यं च स्वामिने दद्यात्। अननुज्ञानादुहनं पंचविंशतिकार्षा
पणान्। ब्रह्मपुराणे॥ गृहीतमूल्यो गोपालो गास्त्यक्त्वा निर्जने वने। ग्रामं चापि
नृपैर्वध्यः शालाकीव वनेचरः। गां ज्ञातरोगां शालाकी चेति शालाकी भिषग्वैद्यादिः
स यथा स्वामिनं त्यक्त्वा स्वेच्छया वनगामी दंड्यः तथायमपीत्यर्थः। इति रत्नाकरः
॥ शालाकी नापित इति मिश्राः। यदा रोगादिना देवाज्जियते गौर्गृहे स्वचितास्तदा
स गोपतिर्दंडी रत्ना गोपालवेतनं। यदा प्रतीकारसमर्थेन गोपतिना अप्रतिकृ
ता गौ रोगादिना विनष्टा तदा सोऽपि शारंड्यः गोपस्य वेतनं दापयितव्यमिति वर्नु

Indira Gandhi National
Centre for the Arts

१३३ लार्थः॥एवमेवरत्नाकरः॥मनुनारदौ॥अजाविके तु संरुद्धे वृकैः पाले त्वनायति
।यां प्रसह्य वृको हन्यात् पाले तत्किल्बिषं भवेत्।अजाविकग्रहणेन पश्वाद्युप
लक्षणे संरुद्धे अभिमते।अजाविके वृकैः परिवृते सति पालेऽनागच्छति या
मजामेडकां वा बलेन वृको हन्यात् तत्र पालः दोषभागित्यर्थ इति कुल्लूकभट्टः
॥नारदः॥अनेन सर्वपालानां विवादः समुदाहृतः।मृतेषु च विशुद्धिः स्या
द्वालशृंगादिदर्शनात्।अनेन एतेन सर्वपालानामश्वादिपालानामपि वा
लशृंगादिदर्शनात् केनापि प्रकारेण मृतत्वं निश्चितं कुर्यादिति तात्पर्यार्थ
ः॥व्यक्तमाह मनुः॥कर्णौ चर्म च वालांश्च वस्तिं स्नायुं च रोचनाः। पशुस्वामि एमः
निरदद्यान्मृतेष्वंगादि दर्शनं।कर्णौ चेत्यादिना मृतपशोः साधारणचिह्नान्यु १३३
पलक्षंते मृते व्यवहितमृते अंगादि चिरावस्थायीनि शृंगादीनि शृंगादि सपि

पाठः॥अथ विक्रीयासम्प्रदानं॥ ० ॥तत्र बृहस्पतिः॥समासेनोदितस्त्वेष समया
वारनिर्णयः।क्रयविक्रयसंजातो विवादः श्रूयतामयं॥नारदः॥विक्रीय पण्यं
मूल्येन क्रेतुर्यो न प्रयच्छति।विक्रीयासंप्रदानं तद्विवादपदमुच्यते।लोकेऽस्मिन्द्वि
विधं द्रव्यं स्थावरं जंगमं तथा।क्रयविक्रयधर्मेषु विग्रहः पण्यमुच्यते।विक्री
यपण्यं मूल्येन क्रेतुर्यो न प्रयच्छति।स्थावरस्य त्वयं दाप्यो जंगमस्य क्रियाफलं
।अर्घवृद्धिरवहीयेन सोदयं पण्यमाहरे--त्।स्थापयितामेषनियमोदिमत्ता
भोदिग्विचारणां।स्थावरस्य विक्रीतभस्यादेः।स्वयंग्राह्यस्य प्रदानेनोपस्तयः
।जंगमस्य तथाविधस्य दोहभारादेः क्रियावाहनादिफलं स्तीर्णादि।यदि विक्रे
ताप्राप्तमूल्योपि पण्यं न ददाति तत्र पण्यंकालवशात् र्पचितार्थे भवति तदा
तद्ग्राह्यायक्रेत्रे सोदयं क्रयकालीनमूल्यं यावत् तत्कालेन च त्रुटितं तत्स

Indira Gandhi National
Centre for the Arts

१२४ हितं पण्यं दापयितव्यः। यस्त्वक्रेतादिकपरिवादी — — तस्येतद्दर्शनात् अनुरूपला
भसहितं पण्यं दापयेदित्यर्थः। एवमेव रत्नाकरः॥ वाचस्पतिमिश्रास्तु अवक्री
येत दूत्सत्रावहीयेत इति पठित्वा क्रीतं रत्नादि चेत्तेनार्घतमर्घो दवहीयते।
हीनमूल्यं च चेत्तस्यानन्तरमूल्यहानिसहितं स्यादिति क्रेतृदेयमिति व्या
ख्यातवान्॥ विष्णुः॥ गृहीतमूल्यो यः पण्यं नैव दद्यात् तस्मै सोदयं दाप्योऽरा
ज्ञा च पणशतं दण्ड्यः। एतत्सर्वं रत्नमूल्यस्यार्घमूल्यस्य तु धारतोऽशोभाभा
वः॥ व्यतिक्रममाह नारदः॥ रत्नमूल्यस्य पण्यविधिरेष प्रकीर्तितः। अरत्नेष्व
त्र समयात् क्रेतुरतिक्रमः। मूल्ये दत्ते विक्रेत्रा पण्यदाने क्रेतुरतिक्रमो एम·
नमवति। तत्रापि यदि क्रेत्रा तावद्दिनानन्तरं मूल्यं दातव्यमित्यादि समयो न कृ १२४
तः स्यात्तदेति शेषः इति निष्कृष्टार्थः॥ कात्यायनः॥ क्रीत्वा प्राप्तं न गृह्णीयात् यो नर घार

दूषितं। समूल्याद्दशभागेन तु रत्नाद्द्रव्यमाप्नुयात्। प्राप्तं स्ववशतां नीतं। स्ववशतामना
नीते तु विशेषमाह स एव॥ अप्रत्तेऽर्थे क्रियाकाले कृते नैव प्रदापयेत्। एवं धर्मो
दशाहात्तु परतोऽनुशयो न तु। क्रियाकालः साक्षिलेख्यादि। तस्मिन् कृतेऽपि पणेऽस्व
वशतामनानीते तु अवध्यभ्यं नरे पुनः पण्यसदशाहात् परे विक्रेतुर्दशमभागहानिः।
प्रकाशदोषकस्य तु नावधूत्तरं पण्यावर्जनमित्यर्थः॥ नारदः॥ उपहन्येत वा पण्यं
दह्येतापह्रियेत वा। विक्रेतुरेव सोऽनर्थो विक्रीयासंप्रयच्छतः॥ याज्ञवल्क्यः॥ राज
दैवोपघातेन पण्यदोष उपस्थिते। हानिर्विक्रेतुरेवासौ याचितस्याप्रयच्छतः॥ ना
रदः॥ निर्दोषं दर्शयित्वा तु सदोषं यः प्रयच्छति। मूल्यं तु द्विगुणं दाप्यो विनयं तावदेव
तु॥ बृहस्पतिः॥ ज्ञात्वा सदोषं यः पण्यं विक्रीणात्यविचक्षणः। तदेव द्विगुणं दाप्यस्त
त्समं विनयं तथा। मत्तोन्मत्तेन विक्रीतं हीनमूल्यं भयेन च। अस्वतन्त्रेण मूढेन स्ना

Indira Gandhi National
Centre for the Arts

१३५ ण्यं तस्य पुनर्हरेत्। विक्रीणाति दोषमनुक्त्वेति शेषः। अथवा तं वेणस्वभावतो हेतुतो वा।
त्याज्यं गर्हितं तस्य क्रेतुः पुनर्हरेत्। विक्रेतेतु शेषः। एतच्च दशाहात् परतोपि॥ बृह-
स्पतिः॥ योन्यहस्ते तु विक्रीय अन्यस्मै तत् प्रयच्छति। सोपि तद्द्विगुणं दाप्यो विनि-
यं तावदेव तु। अन्योऽत्रानतरीयोऽतत्प्रयुक्त इति यावत्॥ एवमेव मिश्राः॥
अन्यत्र मूल्यसंवादं कृत्वान्यत्र विक्रयेऽयं दंड इति चंडेश्वरः॥ व्यासः॥० स्वसे-
कारेच योर्दघाघ्याकालेन गृह्यते। पण्यं भवेद्धि स्पृष्टं तन्न दीयमानमगृह्णतः
।यच्च विक्रेता क्रयनार्थी स्वसंकारेद्रव्यं दद्यान्न्स्य पण्यं दीयमानमगृह्णतः तद्धि
स्पृष्टं सत्क्रमेव भवेत् विक्रेत्रेतेन तद्द्रव्यं नच क्रेत्रा विक्रेतुः पार्श्वग्राह्यमित्यर्थः राम
।तथा दीयमानं नगृह्णाति क्रीत्वा पण्यं च यः क्रयी। विक्रीणानस्तदन्यत्र विक्रे- १३५
ताना पण्यधुयात्॥ याज्ञवल्क्यः॥ विक्रीतमपि विक्रेयं पूर्वे क्रेतर्यगृह्णति। हानि

श्चेत् क्रेतृदोषेण क्रेतुरेव हि सा भवेत्॥ नारदः॥ लाभार्थं वणिजां सर्वं पण्येषु क्रयवि-
क्रयः। स च लाभार्घमासाद्य महान् भवति वा न वा। तस्माद्देशे च काले च प्रक्रमेतार्घ्य-
विद्वल्लोकः। न जैह्म्येण प्रवर्त्तेत श्रेयानेवं वणिक्पथः। मूल्यमव्यवस्थाप्य क्रीते देश-
कालानुसारेण व्यवस्थापको वणिक् प्रक्रमेत अनुरूपं मूल्यं प्रकल्पयेत्। न जैह्म्ये-
णाकुटिलतया प्रवर्त्तेत उचितमूल्यं नरवंडयेदित्यर्थः॥०॥ अथ क्रीतानुशयः॥
तत्र नारदः॥ क्रीत्वा मूल्येन यः पण्यं क्रीतं न बहु मन्यते। क्रीतानुशय इत्येतत् विवाद-
परमुच्यते। क्रीत्वा मूल्येन यः पण्यं दुष्क्रीतं मन्यते क्रयी। विक्रेतुः प्रतिदेयं तत्तस्मि-
न्नेवाह्न्यविक्षितं। एतच्च बीजान्यभोगविनश्वरवस्त्रादिविषयं बीजविषये उपभो-
गाविनश्वरलौहादिविषये च पुनरेतमेव प्रसारेणावधिमाह तु याज्ञवल्क्यबृह-
स्पती। दशैकसप्तपंचाहमासत्र्यहार्द्धमासिकं। बीजायोवाह्यरत्नस्त्रीदोह्यपुंसांप

Indira Gandhi National
Centre for the Arts

१३६ रीक्षेयां। बीजं ब्रीह्यादि अयो लौहं वाह्यो बलीवर्द्दः रत्नं प्रवालादि स्त्री दासी दोह्यं
महिष्यादि पुमान् दासः। अतोऽत्रोक्तपण्यदोषलक्षणपरिसंख्यानेन क्वचित्। विक्रेतु
प्रतिदेयं न तत्क्रेता मूल्यमवाप्नुयात्। दुष्टमप्यर्वागेव देयं। अविज्ञातं कुपक्रीतं दु
ष्टं पश्चाद्विभावितं। क्रीतं तत्स्वामिने देयं पण्यं कालेऽन्यथा न तु। काले परीक्षा
कालाभ्यन्तरे। अन्यथा तदूर्द्ध्वमित्यर्थः। क्रेतृभिर्ज्ञातदोषे तु वस्त्रमात्रे नारदः।
परिभुक्तं तु यद्वासः क्लिष्टरूपमलीमसं। सदोषमपि तत्क्रीतं विक्रेतुर्न भवेत्
पुनः॥ व्यासनारदौ॥ तृणकाष्ठेष्टकासूत्रधान्यासवरसस्य च। वस्त्रकूप्यहिरण्या
नां सद्य एव परीक्षणं। अहाद्दोह्यं परीक्षेत पंचाहाद्वाह्यमेव च। मुक्तारत्नप्रवाला एम·
नां सप्ताहात्स्यात्परीक्षणं। द्विपदामर्द्धमासं तु पुंसां तद्द्विगुणं स्त्रियाः। द १३६
शाहः सर्वबीजानामेकाहो लोहवाससां॥ नारदेन एकाहेन वासः परीक्षणप्रतिपाद

नाद्यासवाक्यविरोधः परं तथैव व्याख्येयं एतत्सर्वं कालनियमनं अवीक्ष्य गृहीते बो
द्धव्यं॥ तथा च नारदः॥ क्रेता पण्यं परीक्षेत प्राक्स्वयं गुणदोषतः। परीक्ष्याभिमतं क्री
तं विक्रेतुर्न भवेत् पुनः॥ बृहस्पतिरपि॥ परीक्षेत स्वयं पण्यमन्येषां च प्रदर्शयेत्।
परीक्षितं बहुमतं गृहीत्वा न पुनस्त्यजेत्॥ याज्ञवल्क्यः॥ क्षयं वृद्धिं च वणिजा पण्यानाम
मविजानता। क्रीत्वा नानुशयः कार्यः कुर्वन्षड्भागदण्डभाक्॥ नारदोऽपि॥ क्रीत्वा नानु
शयं कुर्याद्वणिक्पण्यविचक्षणः। क्षयं वृद्धिं च जानीयात् पण्यानां यस्य यादृशी
॥ दोषादोषविशेषमाह कात्यायनः॥ क्रीत्वा चानुशयात्पण्यं त्यजेद्दोषादियो नरः। अ
दुष्टमेव काले तु स मूल्याद्दशमं हरेत्। काले तु क्रापणकाले हरेद्विक्रेत्रे दद्यादि
त्यर्थः। दूरंकाक्ष्यं यद्दूरं क्रेता न स्वायत्तीकृतं तत्परं स्वायत्तीकृतपरं तु क्रीत्वाग
च्छन्ननुशयमित्यादि भविष्यद्राज्यमिति न तेन विरोधः॥ दोषमाच्छाद्य यदावि

Indira Gandhi National
Centre for the Arts

१३० क्रीतं तदा बहुनापि कालेन परावर्त्तयितुं शक्यत एव दशाहमनुः ॥ नान्यदन्येन संसृष्ट
रूपं विक्रयमर्हति। न चासारं न च न्यूनं न दूरेण तिरोहितं। अन्यत् कुंकुमादि अन्ये
न कुसुम्भादिना सारवर्णसदोषं उत्कृष्टेन दोषपरं चैतत् न्यूनं मानहीनं दूरे दूरस्थि
ततयाऽज्ञातगुणदोषं दूरस्थः। तिरोहितं वस्त्रादिनापिहितं एतच्च सर्वमेव ज्ञातं
चिरेणापि परावर्त्तमिति मिश्राः। यस्मिन् यस्मिन् कृते कार्य्ये यस्येहानुशयो भ
वेत्। तमनेन विधानेन धर्म्ये पथि निवेशयेत्। अनुशयोऽकरणमतिः पश्चा
त्तापइत्यन्ये ॥ ० ॥ अथ सीमाविवादः ॥ तत्र बृहस्पतिः ॥ क्रयविक्रयानुशये राम:
विधिरेष प्रकीर्त्तितः। ग्रामक्षेत्रगृहादीनां सीमावादं निबोधत ॥ मनुः ॥ सी
मां प्रति समुत्पन्ने विवादे ग्रामयोर्द्वयोः। ज्येष्ठे मासि नयेत् सीमां सुप्रकाशेषु १३०
सेतुषु। सीमावृक्षांश्च कुर्वीत न्यग्रोधाश्वत्थकिंशुकान्। शाल्मलीशालतालां

श्च क्षीरिणश्चैव पादपान्। गुल्मान् वेणूंश्च विविधान् शमीवल्लीस्थलानि च। शरान्
कुब्जकगुल्मांश्च तथा सीमा न नश्यति। तडागान्युदपानानि वाप्यः प्रस्रवणानि
च। सीमासन्धिषु कार्य्याणि देवतायतनानि च। उपच्छन्नानि चान्यानि सीमा
लिङ्गानि कारयेत्। सीमाऽज्ञाने नृणां वीक्ष्य लोके नित्यं विपर्य्ययं। अश्मनोऽ
स्थीनि गोवालांस्तुषान् भस्मकपालिकाः। करीषमिष्टकाङ्गारान् शर्करा बालुका
स्तथा। यानि चैवं प्रकाराणि कालाद्भूमिर्न भक्षयेत्। तानि सन्धिषु सीमाया अप्र
काशानि कारयेत्॥ तेषामयमर्थः नयेत् उन्नयेत् सुप्रकाशेषु जलादिनाप्राद्य
केषु सेतुष्विति सीमालिङ्गपरं ज्येष्ठपदमपि सीमाव्यंजककालोपलक्षकं
गुल्माः प्रकाण्डरहिताः वेणून् मधुरकंटकत्वादिभेदेन नानाप्रकारान् शमी
वृक्षानिति भरः वल्ली गुडूच्यादयः स्थलानि कृत्रिममृत्पिण्डाः ॥ कुब्जकगुल्मा

Indira Gandhi National
Centre for the Arts

१३९ स्तद्रूपागुल्माःतडागानिमहाम्भांसिउदपानंकूपःवाप्यःपुष्करिण्यःप्रस्रवणा
निनघतिकश्रोतांसिभूमिच्छन्नानिभूम्यावृतानिउपच्छन्नानीतिलोकर
कालेनापठिताआच्छन्नानीव्याख्यातं।अश्मानिवस्तुमात्राण्यप्यस्थीनि
कपालिकाःकर्पराःअंगाराणिवीणोल्मुकाः।शर्कराःक्षुद्रभांडावयवाः।ए
वंप्रकाराणिशर्करादीनिभूमिर्नभक्षयेत्ननाशयेत्।नमतिकालंनयेदिति
थेः।अप्रकाशानिकारयेत्मृत्तिकाधःस्थापयेत्॥बृहस्पतिः॥करीषास्थि
तुषांगारशर्करास्मकपालिकाः।सिकतेष्टकगोवालकार्पासास्थीनिभ
स्मच।प्रक्षिप्यकुम्भेष्वेतानिसीमान्तेषुनिधापयेत्।ततःपौगण्डबालानां एम·
प्रयत्नेनप्रदर्शयेत्।वार्द्धकेचशिशूनांतेदर्शयेयुस्तथैवच।एवंपरंपराज्ञा १३९
नेसीमाभ्रांतिर्नजायते।तेपौगण्डबालाः॥मनुः॥एतैर्लिंगैर्नयेत्सीमांराजाविव

दमानयोः।पूर्वभुक्त्याचसततमुदकस्यागमेनच।सततमविच्छेदेननयेदितिसंब
यः उदकस्यागमोजलप्रवाहः।मनुः यदिसंशयएवस्याल्लिंगानामपिदर्शने
।साक्षिप्रत्ययएवस्यात्सीमावादविनिर्णयः।यदिप्रच्छन्नैःकालःलिंगदर्श
नेपिकेचित्प्रच्छन्नांगारादिकुम्भाःसीमास्थानांतरंनीत्वानिखाताःनायं
न्यग्रोधःसीमान्तःसचनष्टःसादिसंदेहएवस्यात्तदासाक्षिप्रमाणकस
वविवादःइतिकुल्लूकभट्टः॥कात्यायनः॥तस्मिन्भोगःप्रयोक्तव्यःसचस
त्रिषुतिष्ठति।लेख्यारूढस्त्रिवत्सरस्तस्मामाहुर्दृयाञ्चितं।तस्मिन्सीमानि
र्णयेभोगःप्रयोक्तव्यःप्रमाणत्वेनज्ञातव्यः।साक्षिषुभोगस्तेस्थितिविवक्षितं।
तथासाक्ष्याभावेचचतुःसामासीमान्तवासिनः।सीमायानिर्णयंकुर्युःप्रय
ताराजसन्निधौ।सीमान्तवासिसग्रामाश्चत्वारोयदिवापितः।क्रमेणैवसमाः

Indira Gandhi National
Centre for the Arts

१३९ सीमां नयेयुः क्षितिधारिणः। सीमांतानामभावे तु मौलानां सीमसाक्षिणां। इमा
नप्यनुयुंजीत पुरुषान् वनगोचरान्। व्याधान् शाकुनिकान् गोपान् कैवर्त्तान् मूल
खातकान्। व्यालग्राहानुंछवृत्तीनन्यांश्च वनगोचरान्। तेपृष्टाश्च यथा ब्रू
युः सीमासंधिलक्षणं। तत्तथा स्थापयेद्राजा धर्मेण ग्रामयोर्द्वयोः। ए
तानि वचनानि नैकस्य महर्षेः। सीमाग्रामिनः सीमांतवासिनः। सन्निहि
तवासिनः। समग्रामाः समाः समसंख्या ग्रामा ग्राम्याः। ते समसंख्या ग्रा
मा इत्युक्तं भवति। एतदेव विवृतं चत्वार इत्यादिना। मौला ग्रामोत्पत्ति
महनरा। अनुयुंजीत पृच्छेत उंछजीविनः मूलसंप्रयाव प्रिष्ठजीविनः राम
। ते विपर्यये न श्रीलता तप्रायः सीमक्षाद्रतिभावः। निगरति तिमाह मनुः १३९
॥ ग्रामेयकुलानां तु सीमायां विवादे सः। स्वकर्मं श्रापिताः स्वैः स्वैर्बू

युक्तेपि समं न्नसं। सकृते रितिरथाभिधानेन मेत्सकृतं नश्यत्विति समन्नसंसतं। तेपृ
ष्टाः स्फ यथा ब्रूयुः सामंताः सीमनिर्णयं। निवध्नीयात्तथा सीमां सर्वास्ताश्चैव नामतः।
नारदः॥ नैकः समुन्नयेत् सीमां नरः प्रत्ययवानपि। गुरुत्वादस्य कार्यस्य क्रियेयं बाबहु
पुस्थिता। एकश्चेद् उन्नयेत् सीमां सोपवासः समुन्नयेत्। रक्तमाल्याम्बरधरः क्षितिमा
दाय मूर्द्धनि। सोपवासत्वमत्राधिकं। एकश्चेत्संतापामतयोरुभयानुमतो भवति
तदा सोपवासो रक्तमाल्याम्बरधरो मूर्द्धि क्षितिमादाय सीमां समुन्नयेदित्यर्थः॥ बृह
स्पतिः॥ ज्ञातृचिह्नविनाशे च टकोऽथ भयसम्मतः। समन्वतः सोपवासः सीमां संदर्शये
न्नरः॥ ज्ञातृचिह्नविनाशे ज्ञातृणां चिह्नानां चाभावे॥ कात्यायनः॥ कर्त्तव्याम प्रदृष्टानु
राज्ञा धर्मं विजानता। सत्याद्दुष्टांस्तु सामंतान् गत्वा मौलादिभिः सह। समिश्रं कारये
त् सीमामेव धर्मविदो विदुः॥ सामंताः सीमाप्रभवाः सीमानिकटे उत्पन्ना इति यावत्।

Indira Gandhi National
Centre for the Arts

१४० कात्यायनः॥ ग्रामो ग्रामस्य सामंतः क्षेत्रं क्षेत्रस्य कीर्त्तितं। गृहं गृहस्य निर्द्दिष्टं समंतात्
परिरभ्य च। समंतात्परिरभ्येति यः परिवेष्ट्य स्थितश्चतुर्द्दिक्षु ग्रामादेः स एव
सीमासाक्षी। एवं क्षेत्रगृहयोरपीत्यर्थः॥ मौलवृद्धानाह स एव। ये तत्र पूर्वं सामंताः
पश्चाद्देशांतरं गताः। तन्मूलत्वात्तु ते मौलाः ऋषिभिः संप्रकीर्त्तिताः॥ नारदः॥ यदा
तु न स्युर्ज्ञातारः सीमायाश्चलनं तदा। तदा राजा द्वयोः सीमामुन्नयेदिच्छया स्वयं।
स्वेच्छयेत्यर्थः॥ बृहस्पतिः॥ यदा हि क्रोधलोभेन छलेनान्येन वा कृता। प्रवृत्ता
न्यस्य नृपेण न सा सिद्धिमवाप्नुयात्। क्रोधादिनाकृता पिशुनो निरस्या सीमा अन्या ६४
नु तत्कृता रक्षणीयेत्यर्थः। प्रमाणरहिता भुक्ता यस्य या वा कृता गुणाधिकाय एम·
वैरत्नात स्यतां न विचालयेत्॥ बृहस्पतिः॥ अन्यग्रामात्समाहृत्य दत्तान्यस्य १४०
यदा मही। महानद्याथ राज्ञा वा कथं तस्य विचारणा। नद्योत्सृष्टा राजदत्ता यस्य तस्यै

व सा मही। अन्यथा न भवेल्लाभो नराणां राजदैवतं। तयोरर्थो जीवनं च राजदैववशान्नृ
णां। यस्मात्सर्वेषु कार्येषु तत्कृतं न विचालयेत्। ग्रामयोरुभयोर्यत्र मर्यादा क
ल्पिका नदी। तयोरर्थेन चान्या सा चालयन्दंडमर्हति। कुरुते तु दाहरणं भाग्याभा
ग्यवशान्नृणां। तयोरर्थेन चाभासो चालयेद्दण्डमर्हति। एकत्र कूलपातं तु भूमेरन्य
त्र संस्थितिं। तीरे नदी प्रकुरुते तस्य तां न विचालयेत्। कूलपातक्रमेणायाभूः सो
तरस्वामिन एवेत्यर्थः। क्षेत्रं समस्तमुल्लंघ्य भूमिश्छिन्ना यदा भवेत्। नदीस्रो
तः प्रभावेन पूर्वस्वामिन एव तां। क्षेत्रोल्लंघनेन नदीसंचारे पि ल्लंघिताभूः पूर्व
स्वामिन एवेत्यर्थः॥ याज्ञवल्क्यः॥ आरामायतनग्रामनिपानोद्यानवेश्मसु।
एष एव विधिर्ज्ञेयो वर्षाम्बुप्रवहादिषु। आरामः समीपवर्त्ती पल्लवितभूभागः।
आयतनं देवगृहं भूमिः निपानं कूपादुपपानीयोपलक्षितनिम्नभूभागः। एषसानि

Indira Gandhi National
Centre for the Arts

१४१ सामंतादिरूपो विधिः। वर्षाम्बुप्रवहा विष्वरुश्चितो यो ऽस्य वर्त्मादिषु॥ मनुः॥ क्षेत्रकूपतडा
गानामारामस्य गृहस्य च। सामंतप्रत्ययो ज्ञेयः सीमासंधिविनिर्णयः॥ बृहस्पतिः
।निवेशकालादारभ्य गृहवाप्यागनादिकं। येन यावद्यथा भुक्तं तस्य तन्न विचालये
त्। वातायनाः प्रणाल्यश्च तथा निर्यूहवेदिकाः। चतुःशालं स्यंदनिकाः प्राक्
द्विनचालयेत्। वातायनं गवाक्षः प्रणाली जलनिर्गममार्गः। निर्यूहो नागद
न्तकः वेदिका प्रतोल्यादि संस्कृतो च तामंडः। चतुःशालं चतुर्द्वारगृहं। स्यन्दनिका
परलप्रांतः॥ कात्यायनः॥ मेखलाभ्रमनिष्काशगवाक्षान्नोपरोधयेत्। प्रणालीं
गृहवास्तुं च पीडयन्न दण्डभाग्भवेत्। निवेशसमयादूर्ध्वं तेन यो ऽन्यः करोति न। राम:
दृष्टिपातं प्रणालीं च न कुर्यात् परवेश्मनि। मेखला गृहादिसूत्रबंधः। भ्रमो ज १४१
लविलम्ब स्रुति। निष्काशः। भ्रमो ऽत्र जलनिर्गमप्रदेशः स्रुतिवंद्रश्चरः। निष्काशो निःशरण

पथ इति विवादचिंतामणिः॥ नोपरोधयेत् न निरुन्ध्यात्। गृहवास्तु गृहभूमिः। दृष्टिपातो
गवाक्षः॥ बृहस्पतिः॥ वर्चस्थानं वह्निचयं गर्तं शिष्टानुसेचनं। असारात् परकुड्य
स्य कर्तव्यं न कदाचन। वर्चस्थानं मूत्रपुरीषोत्सर्गस्थानं वह्निचयमग्निस्थानं। क
चिद्वह्निस्थानमिति पाठः सन्तु सुगमः। असारात् इति समीपे॥ कात्यायनः॥ अ
लिद्वयमुत्सृज्य परकुड्यान्निवेशयेत्। चक्रं तैलादियंत्रं। अरत्निर्निष्कनिष्ठमु
ष्टिहस्तः॥ बृहस्पतिः॥ यांति यांति जना येन पशवश्चानिवारिताः। तदुच्यते संसार
णं न रोद्धव्यं तु केनचित्। नारदः॥ अवस्करस्थलश्वभ्रभ्रमस्यन्दनिकादिभिः। च
तुष्पथ चैत्यस्थानं रथ्यामार्गं न रोधयेत्। अवस्करो विष्ठा गृहादिशोधनार्थं पांसु
निचय इति हरिहराचार्यः। स्थानं वेदिकाप्रभृतिगर्ताः। भ्रमो जलनिर्गममार्गः।
स्यन्दनिका परलप्रांतः। आदिशब्देनान्यदपि तादृशं ग्राह्यं। रथ्यामार्गो राजमा

Indira Gandhi National
Centre for the Arts

१४२ गोरथ्याचत्वरं दृतिकस्य तह ॥ कात्यायनः ॥ सर्वजनपदा येन प्रयान्ति स च तुष्पथः । अनि
रुद्धो यथाकामं राजमार्गस्तु उच्यते । न तत्र रोधयेत् किंचित् नोपहन्यात् केनचित् तृणु
वीचार्यंतत् पादीनां मार्गोदानाद्दण्डभाक् । यस्तत्र संकरं स्वस्मान्न तु त्यातो पनमे
वच । कामात् पुरीषं कुर्याच्च तस्य दण्डस्तु साधकः । तत्र मार्गसंकरोऽवस्करः । द
र्गसंकट्विषयं । अतो वस्समात्येन विरोधः ॥ मनुः ॥ समुत्सृजेद्राजमार्गे यस्त्वमेध्य
मनापदि । स द्वौ कार्षापणौ दद्यादमेध्यं चाशु शोधयेत् । आपद्गतस्तथा वृद्धो गु
र्विणी बाल एव वा । परिभाषणमर्हन्ति तच्च शोध्यमिति स्थितिः । अत्र कार्षा
पणद्वयदण्डविधानं अप्रकृतिप्रायितमलसागे वोध्यं । परिभाषणं एमः
दण्डप्रत्यंभ्यः पुनरेवं माकार्षीरित्यादि वचनं । अशोध्यमापद्गतादिनेति १४२
शेषः ॥ तथा विष्णुः ॥ पथ्युद्यानोदकसमीपेष्वशुचिकरादिसागे पणाशतं तच्च

प्रास्येत् । मुत्रकरोऽवकरः स च समार्जनीशोधनीस्यात् संकरोऽवकरस्त्वमेसमवकीर्णाते
ग्राह्यः । पणशतं दण्डइति शेषः । तत्मलं प्रास्येत् शोधयेत् ॥ कात्यायनः ॥ तडागोद्यान
तीर्थानि यो मेध्येन विनाशयेत् । अमेध्यं शोधयित्वा तु दण्डयेत एवं साहसं । उपहर्त्
द्वारातरमेध्यं शोधयित्वासाद्विपणाशतं दण्डयेत् । इरमसंतान्याहे ॥ कात्याय
नः ॥ सीमामध्ये तु जातानां वृक्षाणां क्षेत्रयोर्द्वयोः । फलं पुष्पं च संजातं क्षेत्रस्वामिषु
निर्दिशेत् । द्वयोः क्षेत्रस्वामिषु । अन्यक्षेत्रेषु जातानां शाखा यत्रान्यत्र संस्थिताः । स्वा
मिनं तं विजानीयाद्यस्य क्षेत्रेषु संस्थिताः । संस्थितादत्र स्यशाखा इति शेषः ॥ मनुः ॥
गृहं तडागमारामं क्षेत्रं वा भीषया हरन् । शतानि पंच दण्डः स्यादज्ञानाद्विशतो
दमः । गृहादिस्वामिनं भयमुपापतरूहारिहरणं च शतपणादिरण्डः ॥ अ
ज्ञानाद्विसा । तथा च स्वामित्वभ्रमेतु हरनद्विशतमित्यर्थः ॥ बृहन्मनुः ॥ स्थापितां च

Indira Gandhi National Centre for the Arts

१४३ वमर्य्यादामुभयोर्ग्रामयोस्तथा। अतिक्रामंति ये पापास्ते दण्ड्या हि प्रातंरमं॥ याज्ञव
ल्क्यः॥ मर्य्यादायाः प्रभेदे तु सीमातिक्रमणे तथा। क्षेत्रस्य हरणे दण्डो मध्यमो
त्तमसाहसं। मर्य्यादाचिह्नभूतवृक्षादिनस्याः प्रभेदे विदारणे सीमातिक्रमणे
सीमार्थं दध्यादिभग्नहरणे उत्तमसाहसं क्षेत्रस्य हरणे बोध्यं। शड्. खिलखिलो
॥ क्षेत्रमर्य्यादाभेदे अष्टशतं सीमातिक्रमे अष्टसहस्रं। क्षेत्रोरहरणे अष्टश
तं अष्टभिरधिकं शतं सहस्रं च। क्षेत्रोरहरणे शस्यनिर्वाहकोरहरणं॥ ० ॥
अथ कृष्टाकृष्टे॥ तत्र नारदः॥ संवत्सरेणार्द्धखिलं खिलं स्याद्वत्सरैस्त्रिभिः॥
पंचवर्षावसन्नं च क्षेत्रं स्यादटवीसमं। एकवर्षपतितमर्द्धखिलं त्रिवर्षपतितं खि राम
लं पंचवर्षपतितमरण्यं भवतीत्यर्थः॥ बृहस्पतिः॥ गृहीत्वा बाहयेत्कालेवा १४२
पगोपनसंग्राहात्। अकुर्वन्स्वामिने दाप्यो मध्यं कृष्टसरं तु सः। गृहीत्वा क्षेत्रमो

पनेत्त्वणां सग्रहं शस्यसंचयं अकुर्वन् क्षेत्रवापं सरः शस्यं मध्यं कृष्टरं नानुत्कृष्टं
॥ व्यासः॥ क्षेत्रं गृहीत्वा यः कश्चिन्न कुर्यान्न च कारयेत्। स्वामिने स सदं दाप्यो राज्ञे
दण्डं च तत्समं। यत्र क्षेत्रे यद्देयं यद्दत्तं दाहसस्व। चिरावसन्ने दशमं कृष्यमा
णोनयाष्टमं। समंस्कृतेषु षष्ठं स्यात्परिकल्प्य यथास्थितिः॥ एतत्सर्वं मध्यो
त्पानुः॥ बृहस्पतिवाक्यात्। तेनारण्यमध्ये मध्योत्पानुर्दशमं खिलेऽष्टमं अ
र्द्धखिले षष्ठभागं क्षेत्रमंगीकृत्य पातयित्वा क्षेत्रिणो अंगीकर्त्ता दाप्य इत्यर्थः॥ त
त्र नारदः॥ अशक्तप्रेतनष्टेषु क्षेत्रिकेष्वनिवारितः। क्षेत्रं चेत्कश्चिदभ्युप
जीवेत्स तत्फलं। विकृष्यमाणः क्षेत्रेषु क्षेत्रिकः पुनराव्रजेत्। खिलोपचारं त
त्सर्वं दत्त्वा क्षेत्रमवाप्नुयात्। अशक्तो द्रव्यरहितनष्टस्य देशः क्षेत्रविलो
भत इत्यर्थः। कर्षकः क्षेत्रिकः क्षेत्रस्वामी खिलोपचारं खिलकर्षकव्ययाया

Indira Gandhi National
Centre for the Arts

१५४ सनिष्क्रयं। खिलोपचारानाशङ्को विशेषयस एव। तदष्टभागं प्रा नायावत्सम्प्रग
ताः समाः। संप्राप्ते चाष्टमे वर्षे भुक्तं तत्क्षेत्रं लभेत सः। यदि क्षेत्रपतिर्मध्ये न ददाति
तदा कर्षकोऽष्टमं भागं तस्मै दद्यात्। यदि चाष्टमवर्षपर्यन्तमपि क्षेत्रभोगं
करोति तदा व्यवहारानेति न तत्सर्वं क्षेत्रमुत्सृजति स हि तं क्षेत्रपरिवेवेति हला
युधपारिजाते। प्रकाशकारकस्तततोऽष्टमवर्षे स्वामिनन्दूते वं व्याख्यातवान्
।कल्पतरौ कात्यायनः॥ अशक्तितो नरो यस्तु खिलार्थी यः कृतोद्यमः। तदष्ट
भागहीनं तु कर्षकः फलमाप्नुयात्। वर्षाण्यष्टौ समभोक्ता स्यात् परतः स्वामिनो ग्राम
हितता। क्षेत्रस्याष्टमसंशं तत्र स्वामी लभते सममांशं कर्षकः॥ अष्टौ वर्षा १५४
ण्येवं ततस्तु खिलोपचारमरत्वेव स्वामी क्षेत्रं लभते। अतिकृच्छ्रकर्षणी
यखिलविषयमेतत् पूर्ववचनं तु कृच्छ्रकर्षणीयखिलविषयमित्यतो न वि

यो विरोधः॥ क्षेत्रमननुमत्या क्षेत्रवापमनुः॥ ये क्षेत्रिणो विवर्जितः परक्षेत्रप्रवापिनः। ते वै
शस्यस्य जातस्य न लभन्ते फलं क्वचित्। खिलातिरिक्तभूस्वामिनः षड्भागः करः। बलि
षड्भागमाददीतेत्यादिवचनात्। एवमनुमत्यारेतं क्षेत्रादिकं कृषकोदीर्घं विना नरानुंश
क्यतदातिलक्ष्मीधरः। ओघवाताहतं बीजं यस्य क्षेत्रे प्ररोहति क्षेत्रिकस्यैव तद्बीजं न
बीजी लभते फलं। तथा अबीजीविक्रयी चैव वबीजोत्कृष्टी तथैव च। मर्यादाभेदक
स्यैव प्राप्नुयाद्दिकृतवधं॥ ०॥ अथ ग्रामस्वरक्षा॥ तत्र याज्ञवल्क्यः॥ ग्रामेच्छया गोप्रचा
रो भूमिराजवशेन वा। धनुःशतं परीहारो ग्रामक्षेत्रान्तरं भवेत्। द्विशतं खर्वटस्यस्या
न्नगरस्य चतुःशतं। ग्रामेच्छया ग्रामवासिजनेच्छया भूम्यस्य महत्त्वानुसारेण
राजाज्ञया वा गोप्रचारो गोप्रचारणार्थं भूभागः कर्तव्य इति प्रथमप्रतीकार्थः। स
चायं परीहारो यो ग्रामक्षेत्रान्तरह्रोधो धनुःशतं ग्रामे धनुःशतद्वयं खर्वटःक्षेत्रान्तरस्य॥

Indira Gandhi National
Centre for the Arts

१५५ ग्रामनगरखर्वटलक्षणं च मार्कण्डेयपुराणे यथा। तथा शूद्रजनप्रायाः सुसमृद्धकृ
षीवला। क्षेत्रोपभोगभूमध्ये वसतिर्ग्रामसंज्ञिता। सोत्सेधवप्रप्राकारं सर्वतः
खातकावृतं। योजनार्द्धार्द्धविष्कंभमष्टभागायतं पुरं। प्रागुदक्प्रवणं शस्तं शुद्धवं
शविनिर्गमं। तदर्द्धेन तथा खेटं तस्माद् न्यूनं च खर्वटं॥ मनुः॥ धनुःशतं परीणाहो ग्रा
मस्य स्यात् समंततः। शम्यापातास्त्रयो वापि त्रिगुणो नगरस्य तु। तत्रापरिवृतं धा
न्यं विहिंस्युः पशवो यदि। न तत्र प्रणयेद्दण्डं नृपतिः पशुरक्षिणां। संपाताः कोडपा
ता नगरस्य नाधिकस्तस्य खेटस्येति यावत्। तत्र परीहारान्तरं विष्णुः॥ पथिग्रा
मविवीतान्ते चास्य कालं महापथे। वीतान्ते न दोषो वर्त्मग्रामपरीहाराणां समी एम:
पे यत्क्षेत्रमनावृतं तस्यात्यकालं गवादिभक्षणे पालदोषो नास्ति बहुकालभ १५५
क्षणे तत्रापि दोषः। आशयापराधात् इच्छयापराधसंभवात्॥ तथा च याज्ञवल्क्यः



॥ पथि ग्रामविवीतान्तक्षेत्रे दोषो न विद्यते। अकामतः कामचारी चौरवद्दण्डमर्हति॥
विवीतं गवादिचरणस्थानं॥ क्षेत्रेष्वन्येषु च पशुः सपादं पणमर्हति। सर्वत्र तु
सदो वं स्यात् क्षेत्रिकस्येति धारणा। अन्येषु दूरस्थेषु॥ वर्त्मग्रामान्तरादिव्य
तिरिक्तक्षेत्रेषु पशुर्भक्षयन् सपादं पणं दण्डमर्हति। अत्र पाल एव दण्ड्यः
स्यादिति कुल्लुकभट्टः॥ इदं तु गवादिविषयेतरपरं सामान्यविशेषन्याया
त्॥ शङ्खलिखितौ॥ गोश्चरंती गौः पंचमाषान् दिवा रात्रौ न मुहूर्त्तं माषं
ग्रामे दद्युः॥ चरंती यावत् सोऽह्नि संभक्षयंती रात्रौ माषान् मुहूर्त्तं चरंती मा
षमेकं ग्रामे दद्युः। प्राच्या मास्ते त्वाद्य वदद्दण्डेवेत्यर्थः। माषोऽत्र कार्षापण
स्य विंशतितमो भागः। माषो विंशतिभागस्तु ज्ञेयः कार्षापणस्य तु। इति नार
दीयात् इति चंडेश्वरः। माषस्त्वाद्य ... तौ ग्राह्यः। सौवर्णमाषकः कंत्यार



Indira Gandhi National
Centre for the Arts

स्तु१

२४६ एकर्मासु प्राप्नुते। पशूनां ग्रासचारतो माषस्यैकार्जनैर्भाष्यकारवचनात् ति त १
॥ दण्डस्तु न तत्स्वामिन एव पशोर्दण्डाज्ञानात्॥ कात्यायनः॥ पारयेत्पालाप
हृंगाहौ पालो महिषीं तथा। तथा जाविकवत्सानां पालो दण्डः प्रकीर्तितः। प
लपारकार्षापणाचतुर्थोपारः। दूरं तत्राभक्ष्यतो मं तन्यमिति रत्नाकरः॥
गौतमः॥ पंचमाषान्गविषे हु दुड्डे स्वमाह ष्योर्द्रम अजाविके द्वा। प्रा
उक्तलिखितौ॥ सर्वेषामेव वत्सानां मासं सर्वं शापमानो वत्सः प्र
थमवयाः॥ नारदः॥ सत्वानां द्विगुणो दण्डो वत्सानां तु चतुर्गुणः। प्रस
त्तचारकालं तु चारदण्डः स्मृतो बुधैः। सत्वानां ग्रासभक्षणे न प्रोक्तानां राम:
वत्सानां तत्रैव चरित्वानीत्वा रात्रिकानां। तदेतदप्रसत्तचारकाभिप्रा २४६
यं पराइस्य प्रसत्तचारकविषतायां तत्र स्वामिनि प्रपसे च वलेन चारकाः

पत्यत्तचारकाः। नारदः॥ समुत्सृष्टपशुनाशो नु तत्स्वामी सदमाप्नुयात्। वधेन पालो मु
च्येत दण्डं स्वामिनि पातयेत्। वधेनापराधानुरूपताडनेन समुत्सृष्टपशुनाशात् यस्मि
न्नाशे पुनः प्रतोहो न भवति सदुष्टव्यः॥ विष्णुः॥ सर्वत्र स्वामिने विनष्टमुत्स्यं च॥ अ
स्यार्थः। विनष्टग्रासमुत्स्यं चरापयेदिति शेषः॥ नारदः॥ गोभिस्तु भक्षितं शस्यं यो
नरः प्रतियाचते। सामंतानुमतं देयं धान्यं यत्तत्र नाशितं। गवत्र गोमिने देयं धान्यं
वै वर्षका यच। एवं हि विनयः प्रोक्तो गवां शस्यावमर्दने। भक्षितं धान्यं तत्र धान्या
नुरूपं गवत्रे यव वसं धान्य स्तम्ब इति यावत्। गोमी गोस्वामी तेन गवत्रं धान्यं वा
ले त्रिंशो देयमित्यर्थः॥ प्राच्यमध्ये तन्त्रकभागित्वात् ग्राह्यं॥ यथा च उशनाः॥
गोभिर्विनाशितं धान्यं यो नरः प्रति याचते। पितरस्तस्य नाश्नन्ति नाश्नन्ति चदि
वौकसः इति विवादचिन्तामणिः॥ चण्डेश्वरस्तु अत्रैकस्मिन्नपराधे दण्डरानार

Indira Gandhi National
Centre for the Arts

१४७ नविधायकवचनस्यारिनरात्रिकामंकामकृतादिव्यवस्थयापरस्यांविरोधःप-
रिहरणीयइत्याह। अत्रपालाधिष्ठानकालेपालस्यदण्डः॥ नोचेत्स्वामिनए-
वतत्रैवरिपरष्टीने॥ विष्णुः॥ अपालकायामत्रस्वामीसपालायामतुपालकः
॥०॥ अथारण्याः॥ तत्रपालानुवर्त्तीनारदः॥ राजग्राहगृहीतोपिवज्राग्नि-
निहतोपिवा। अथसर्पेणवारष्टोवृक्षाद्वापतितोभवेत्। व्याघ्रादिभिर्हतो
वापिव्याधिभिर्वाप्युपद्रुतः। नतत्रदोषःपालस्यनचदोषोऽस्तिगोमतां॥ याज्ञ-
वल्क्यः॥ महोक्षोत्सृष्टपशवःसूतिकागन्तुकादयः। पालोयेषांनतेमोच्यादैव-
राजपरिप्लुताः। महोक्षोबीजसेक्तावृषः। उत्सृष्टपशवोवृषोत्सर्गादिनात्स- राम
ष्टपशवः। सूतिकानवप्रसूतिकाअनिर्दशाहा। आगन्तुकाःस्वयूथपरिभ्र- १४७
ष्टाग्रामान्तरादागतावा। आदिशब्देनहस्त्यादयोऽरण्याजमात्रश्चसंरक्ष्या

ण्याः। पालोयेषांनविद्यतेद्गुतिश्रेषः। तेनापालामेघादिदर्शनागर्ज्जनादिश्रवणाद्वाप-
लायिताःपशवोयदिस्तेनंचरंतिनदाशेषांनभवतीत्यर्थः। एवमेवपारिजातविवादचिं-
तामण्योः। चण्डेश्वरस्तुपालोयेषांचेतिपठित्वायेषांपालोविद्यतेतेपिदैवराजपरि-
प्लुताःविद्युदादिभिर्दैवैराजपुरुषैर्वापालदोषंविनाविद्राविताःतेपिमोच्याइत्य-
र्थः॥ इत्याहमनुः॥ अनिर्दशाहांगांसूतांवृषान्देवपशूंस्तथा। सपालान्वावि-
पालान्वाअदण्ड्यान्मनुरब्रवीत्। वृषान्बीजसेक्तॄन्। उत्सृष्टानामपिगवांगर्भा-
र्थंगोकुलेगोपैर्बलात्सपालत्वसंभवादितिकुल्लूकभट्टः॥ उशनाः॥ अदण्ड्या
हस्तिनोऽश्वाश्चप्रजापालाहितेस्मृताः। अदण्ड्याःकाणकुब्जाश्चवृषश्चकृतल-
क्षणाः। अदण्ड्यागन्तुकागौश्चसूतिकाप्यभिवारिणी॥ अदण्ड्याश्चोत्सवेगावः
श्राद्धकालेतथैवच। अश्वाराजकीयास्तेषामेवप्रजापालकत्वादितिमिश्राः। अश्व

Indira Gandhi National
Centre for the Arts

१४८ महिष्योर्दशाहमिति गोभिलेनयदुक्तं तदुष्णिगाद्यश्वादिविषयं।अत्रकालाकुञ्जशाद्वा
भ्यामसंतामसमर्थउच्यते। कुतलस्तराः त्रिभ्यलार्चकितः।अभिचारिणी असंतमा
रणाश्रीला। पारिजातकृतानुअभिसारिणीतिपठितंहायस्यतीतिव्याख्यातंच॥
शङ्खलिखितौ॥तुदुपशावः सर्वथाअरण्यास्वतरगजवाजिनश्वारण्याः।अ
रण्याः शीघ्रंनिवारयितुमशक्याः। अश्वतरोऽश्वायांगर्दभाद्गुत्पन्नः। तथाचानु
शासनं॥ गर्दभारघोरको जातः सर्वेचाश्वतरोमतइति। पारिजातप्रकाशकारा
भ्यां अरण्याइत्यत्रावध्याइतिपठित्वा अताड्याइतिव्याख्यातं॥कात्यायनः॥
अधमोत्तममध्यानां पशूनांचैवताडने। स्वामीतुविवदेयत्रतत्रदण्डंपकल्पये राम
त्।ताडकस्येतिशेषः।अस्यापवादमाहस एव॥तेत्राणमविशीनेषुगृहेषुपशु १४८
हाजिषुग्रहणांततप्रविष्टानांताडनेचबृहस्पतिः॥पशुराजिषुविकीर्णांयवसस्य

लेषु गृहणांबंधनंगृहादिप्रविष्टेषुपशुषुताडनवारणायोर्नदोषइतिफलितं॥
०॥ अथवाक्पारुष्यं॥ तत्राहमनुः॥ लेनाभिहितोधर्मः सीमाविनिर्णये।अ
तःपरंप्रवक्ष्यामिवाक्पारुष्यविनिर्णयं॥ नारदः॥देशजातिकुलादीनामाक्रोशन्य
ङ्गसंयुतं। यद्वचः प्रतिकूलार्थं वाक्पारुष्यंतदुच्यते।आक्रोश आक्षेपः।तत्र
देशाक्षेपो यथागौडं प्रतिकलहप्रिया गौडाः। जात्याक्रोशो यथा असंतलुब्धा
ब्राह्मणाः कुलाक्रोशो यथाक्रूरचरिता वैश्वानराः। आदिपदाद्विद्याशिपरिग्रहः
।न्यंकुमवर्णताड्यासंयुतं यत्प्रतिकूलार्थं वचस्तद्वाक्पारुष्यमितिसामा
न्यलक्षणं।भितास्तगवाचस्पतिमिश्रारयोथैवं वर्णयंति॥नारदः॥निष्ठुरा
श्लीलतीव्रत्वात्तदपित्रिविधं स्मृतं।गौरवानुक्रमात्तेषांदण्डोप्युक्रमाद्गु
रुः।गौरवानुक्रमाद्यथोत्तरं गौरवात्तेषांवाक्पारुष्याणांनिष्ठुरादीनांलक्ष

Indira Gandhi National
Centre for the Arts

१४९ णामाहसत्यवा। साक्षेपं निष्ठुरं ज्ञेयमश्लीलं न्यंकुसंज्ञितं। तापनीयैरूपक्रोशैस्तीव्र
माहुर्मनीषिणः॥ कात्यायनोपि॥ यत्र सत्यसंज्ञितैरंगैः परमाक्षिपति क्वचित्
।अभूतैरप्यभूतैर्वा निष्ठुरा वाक्स्मृता तु सा। न्यंकारगहनं वाचा क्रोधानुकूल
तेयदा। वर्णदेशकुलानां च अश्लीला सा बुधैः स्मृता। महापातकयोक्त्री च राग
द्वेषकरी तु या। जातिभ्रंशकरी यातु तीव्रा सा कथिता तु वाक्। न्यंकारगहनं
मेहनाशिनिकृष्टांगप्रकटीकरणेन तिरस्करणं॥ बृहस्पतिः॥ अभियो
क्तिताडनं च पारुष्यं द्विविधं स्मृतं। एकैकं तु त्रिधा भिन्नं रगउश्रोत्कष्टिल
क्षणः। देशकालकुलादीनां क्षेपः पापनियोजनं। द्रव्यं विना तु प्रथमं वाक् धर्म
पारुष्यं तदुच्यते। भगिनीमातृसंबंधमुपपातकशंसनं। पारुष्यं मध्यमं प्रोक्तं १४९
वाग्विशास्त्रविदिभिः। अभक्ष्यपेयकथनं महापातकदूषणं। पारुष्यमुत्तमं प्रोक्तं

तीव्रं मर्मातिघट्टनं। द्रव्यं विना द्रव्यग्राह्योपमभिधेयपरत्वेनाभिधेयं परार्थं विना अ
सत्यमिति फलितं। एतच्च सर्वत्रान्वायि। महापातकपरं पातकोपपातकयोरप्युप
लक्षणं। अन्यथा ननुशंसनस्यकस्याथनेनभावान्नशंसकस्यारएडत्वापत्तेः। तेना
सत्यं पापाभिधानं प्रथमं असत्यमुपपातकाभिधानं द्वितीयं। असत्यं महापातका
द्यभिधानं शंसनं उत्तमं वाक्पारुष्यं भगिनीत्यादेस्तव भगिनीत्व मातरमयाग्रा
ह्यादृत्यभिकीर्तनमित्यर्थः। तत्रातिपातकमाह विष्णुः॥ मातृगमनं दुहितृगम
नं स्नुषागमनं। महापातकमाह मनुः॥ ब्रह्महत्या सुरापानं स्तेयं गुर्वंगनागमः।
महांति पातकान्याहुः संसर्गश्चापितैः सह। ब्राह्मणप्राणवियोगफलको व्यापा
रो ब्रह्महत्या। तथा निषिद्ध सुरापानं ब्राह्मणस्वामिकाशीतिरत्निकापरिमितसु
र्णस्तेयं गुरुभार्यागमनं एतैश्च सह संवत्सरेण पततीति वक्ष्यमाणप्रकारेणास्य

Indira Gandhi National
Centre for the Arts

१५० सर्वाण्येतानि महापातकानीत्याह इति कुल्लूकभट्टः ॥ मनुः ॥ संवत्सरेण पतति पति-
तेन सहाचरन् । याजनाध्यापनाद्यौनान्न तु यानासनाशनात् । पतितेन सह संस-
र्गमाचरन् लोको यानगमनैकासनोपवेशनैकपंक्तिभोजनरूपात् संसर्गात् संव-
त्सरेण पतति न तु याजनाध्यापनाद्यौनात् संवत्सरेण पतति किं तु सद्य एवेत्य-
र्थः । अध्यापनमत्रोपनयनपूर्वकं सावित्रीपाठनं याजनादीनां सद्यः पातहे-
तुमाह देवलः ॥ याजनं योनिसंबंधं स्वाध्यायं सहभोजनं । कृत्वा सद्यः पतत्येव
पतितेन सहाचरन् ॥ बौधायनः ॥ संवत्सरेण पतति पतितेन सहाचरन् । या-
जनाध्यापनाद्यौनात् सद्यो न शयनासनात् ॥ अनुपातकमाह मनुः ॥ अन- एम·
तं च समुत्कर्षे राजगामि च पैशुनं । गुरोश्चालीकनिर्बं धः समानि ब्रह्म- १५०
हत्यया । ब्रह्मोज्झता वेदनिंदा कौटसाक्ष्यं सुहृद्वधः । गर्हिता न्नाद्ययोर्जग्धिः सु-

रापानसमानि षट् । निक्षेपस्यापहरणं नराश्वरजतस्य च । भूमिवज्रमणीनां च रु-
क्मस्तेयसमं स्मृतं । रेतःसेकः स्वयोन्यासु कुमारीष्वंत्यजासु च । सख्युः पुत्रस्य च स्त्री-
षु गुरुतल्पसमं विदुः । एषामर्थः ॥ जात्युत्कर्षनिमित्तं उत्कर्षभाषणं यथा । ब्रा-
ह्मणोहमिति ब्राह्मणो वदति राजनि वा स्तेनादीनां परेषां मारणफलकं । दोषाभि-
धानं गुरोश्चानृताभिशंसनं ॥ तथा च गौतमः ॥ गुरोरनृताभिशंसनमिति महापा-
तकसमानीति एतानि ब्रह्महत्यासमानि । अधीतवेदस्यानभ्यासेन विस्मरणं अ-
सच्छास्त्राश्रयणेन वेदकुत्सनं साक्ष्ये मृषाभिधानं मित्रस्य वधो निषिद्धस्य ल-
शुनादेर्भक्षणं अनाद्यस्य पुरीषादेरदनं । मेधातिथिस्तु नभोसे इति संकल्प्य
यद्दत्तं तेन दत्तमिति व्याचष्टे । एतानि षट् सुरापानतुल्यानि ॥ ब्राह्मणस्व-
र्णाव्यतिरिक्तनिक्षेपस्यापहरणं मनुष्यतुरगरूप्यभूमिमणीनां हरणं सुवर्णा-

Indira Gandhi National
Centre for the Arts

१५१ स्तेयसमं। सोदर्य्याभगिनीकुमारीचाण्डालीसखिभार्य्यास्वपुत्रभार्य्यासु रेतःसे
कस्तद्गुरुभार्य्यागमनेन समानमाहुः॥ उपपातकमाह मनुः। गोवधोऽयाज्यसं
याज्यपारदार्य्यात्मविक्रयाः। गुरुमातृपितृत्यागः स्वाध्यायाग्न्योः सुतस्य च। प
रिवित्तितानुजेन परिवेदनमेव च। तयोर्दानं च कन्यायास्तयोरेव च याजनं।
कन्याया दूषणं चैव वार्द्धुषित्वं व्रतच्युतिः। तडागारामदाराणामपत्यस्य च विक्र
यः। व्रात्यता बांधवत्यागो भृत्याध्यापनमेव च। भृताच्चाध्ययनादानमपण्यानां
च विक्रयः। सर्वाकरेष्वधीकारो महायंत्रप्रवर्त्तनं। हिंसौषधीनां स्त्र्याजीवोऽ
भिचारो मूलकर्म च। इंधनार्थमशुष्काणां द्रुमाणामेवपातनं। आत्मार्थं च क्रि राम·
यारंभो निंदितान्नादनं तथा। अनाहिताग्नितास्तेयमृणानां चानपक्रिया। १५१
असच्छास्त्राधिगमनं कौशीलव्यस्य च क्रिया। धान्यकुप्यपशुस्तेयं मद्यपस्त्री

निषेवनं। स्त्रीशूद्रविट्क्षत्रवधो नास्तिक्यं चोपपातकं॥ एषामर्थः॥ गोहननं जाति
कर्मदुष्टानां परपत्नीगमनं आत्मविक्रयो मातृपितृगुरूणां च शुश्रूषाद्यकर
णं सर्वदा ब्रह्मयज्ञत्यागः वेदविस्मरणस्य ब्रह्मोज्झतेत्युक्तत्वात्। अग्नेश्च स्वाध्या
यस्य च त्यागः। सुतस्य तत्संस्कारभरणाद्यकरणं। कनीयसा आदौ विवाहे कृ
ते ज्येष्ठस्य परिवित्तित्वं प्रागुक्तं कनिष्ठस्य परिवेत्तृत्वं तयोश्च कन्यादानं तयो
रेव च विवाहे होमाद्यार्त्विज्यं कन्यायां मैथुनवर्जमंगुलीप्रक्षेपादिना दूषणं
रेतःसेकपर्य्यंतमैथुनेनु रेतःसेकः स्वयोन्यासु कुमारीष्वित्युक्तत्वात् प्रतिसिद्ध
वृद्धिजीवनं ब्रह्मचारिणो मैथुनं तडागोद्यानभार्य्यापत्यविक्रयः यथाकालम
नुपनयनं बांधवानां पित्रादीनां त्यागः प्रतिनियतवेतनग्रहणपूर्वकमध्या
पनं अविक्रय्याणां विक्रयः सुवर्णाद्युत्पत्तिस्थानेषु राजाज्ञया अधिकारः

Indira Gandhi National
Centre for the Arts

१५२ महतामुदकप्रतिबंधहेतूनां सेतुबंधादीनां प्रवर्त्तनं ओषधीनामार्द्राणां हिंसनं
भार्यादिस्त्रीणां वेश्यात्वं कृत्वा तदुपजीवनं श्येनादिना परद्रव्यस्य मारणादिमंत्रौ
षधादिना वशीकरणं पाकादिस्वप्रयोजनार्थमार्द्रवृक्षच्छेदः अनातुरस्य
देवपित्राद्युद्देशमंतरेण पाकानुष्ठानं निंदितस्यान्नस्य लशुनादेरनिच्छ
या भक्षणं बुद्धिपूर्वकाभ्यासभक्षणे पुनर्गर्हितान्नादे- जग्धिरित्युक्तं सत्याधि
कारे अग्न्यनाधानं स्वर्णादन्यस्य सारद्रव्यस्यापहरणं ऋणानां त्रिभिर्ऋ
णैर्ऋणवानिति श्रुत्युक्तानामनपाकरणं श्रुतिस्मृतिविरुद्धशास्त्राभ्यसनं
नर्तनगीतवादनोपसेवनं धान्यस्य ताम्रलोहादेः पशूनां च चौर्यं हि जातीनां पा राम:
नमद्यपायाः स्त्रियाः गमनं स्त्रीशूद्रवैश्यक्षत्रियहननं अदृष्टार्थकर्माभावबुद्धिः १५२
एतत्प्रत्येकमुपपातकं। बांधवत्यागदूषणेनैव मात्रादीनां त्यागप्राप्तौ पृथग्व

चनं पित्रादिबांधवत्यागेनाचरणमंतरेण प्रायश्चित्तं भवति किंतु मात्रादित्याग
प्रायश्चित्तान्न्यूनमपि भवतीति कुल्लूकभट्टः ॥ जातिभ्रंशकरमाह मनुः ॥ ब्राह्म
णस्य रुजः कृत्वा घ्रातिरघ्रेयमद्ययोः जैह्म्यं च मैथुनं पुंसि जातिभ्रंशकरं स्मृतं।
ब्राह्मणस्य दंडहस्तादिना पीडाक्रिया घ्रातिरघ्रेयदुर्गंधितयाऽघ्रेयं लशुनपु
रीषादि तस्य मद्यस्य च घ्राणं कुटिलत्वं पुंसि च मुखादौ मैथुनमित्येतत्प्रत्येकं
जातिभ्रंशकरं स्मृतमित्यर्थः॥ संकरीकरणमाह मनुः॥ खराश्वोष्ट्रमृगेभाना
मजाविकवधस्तथा। संकरीकरणं ज्ञेयं मीनाहिमहिषस्य च। गर्दभतुरगोष्ट्र
हरिणहस्तिछागमेषमत्स्यसर्पमहिषाणां प्रत्येकं वधः संकरीकरणं ज्ञा
तव्यमित्यर्थः॥ ०॥ अपात्रीकरणमाह मनुः॥ निंदितेभ्यो धनादानं वाणिज्यं
शूद्रसेवनं। अपात्रीकरणं ज्ञेयमसत्यस्य च भाषणं। अप्रतिग्राह्येभ्यः प्रति

१५३ ग्राही वाणिवाणिज्यं शूद्रस्य परिचर्य्यानृताभिधानमित्येतत् प्रत्येकमपात्रीकर
णं ज्ञेयमित्यर्थः ॥ ० ॥ मलावहमाह स एव ॥ कृमिकीटवयोहत्यामद्यानुगतभो
जनं। फलैधः कुसुमस्तेयमधैर्यं च मलावहं ॥ कृमयः क्षुद्रजंतवः येऽपि ईषत्
स्थूलाः कीटास्तेषां पक्षिणां च हननं मद्यानुगतं यद्द्रव्यमपि मद्यकाधेकत्र
पिण्डकादौ कृत्वा मद्येन सहानीतं तस्य भोजनमिति कुल्लूकभट्टः ॥ मेधातिथि
स्तु मद्यानुगतं मद्यसंसृष्टमाह तच्चिंत्यं तत्र प्रायश्चित्तगौरवात् ॥ फलका
ष्ठपुष्पाणां च चौर्यमधैर्यं स्वल्पेऽपि च येऽसंतवैक्लव्यमित्येतत् प्रत्येकं मलावहमि
त्यर्थः ॥ ० ॥ प्रकीर्णमाह विष्णुः ॥ यदनुक्तं तत्प्रकीर्णकं अनुक्तं निष्कृतकं दम·
पापमित्यर्थः ॥ बृहस्पतिः ॥ समानयोः समो दण्डो न्यूनस्याद्विगुणोऽधमः । उ १५३
त्तमस्यार्द्धिकः प्रोक्तो वाक्पारुष्ये परस्परं। परस्परं वाक्पारुष्ये तत्रैव आत्मापक

र्षस्य दण्डो यथासावाहेयेन समो जात्यादिभिस्तत्र समो दण्डः स्यान्न्यूनस्ता
न स्योक्तो द्विगुणः । उत्तमस्तस्यार्द्धिको दण्ड इत्यर्थः ॥ याज्ञवल्क्यः ॥ अर्द्धो
ऽधमेषु द्विगुणः परस्त्रीयत्तमेषु च । अधमेषु आत्मापेक्षया न्यूनशीलगुणे
षु आत्मेषु रधिकगुणास्याद्वीरदण्डः परस्त्रीषु परभार्य्यास्वृत्तमेषु । आत्मप्र
पेक्षया अधिकगुणेषु अर्द्धत्वं । द्विगुणं चापराधानुरूपस्यण वमेववा च स्यात्
दिति मिश्राः ॥ कात्यायनोऽप्याह ॥ मोह प्रमाणात् संहर्षात् प्रीत्या चोक्तं मयेति यत्
। नाहमेवं पुनर्वक्ष्ये दण्डार्द्धं तस्य कल्पयेत् । याज्ञवल्क्यः ॥ सत्यासत्यान्यथास्तो
त्रैन्यूनांगेन्द्रियरोगिनां । क्षेपं करोति चेद्दण्ड्याः पणानर्द्धत्रयोदश । न्यूनांगाः क
र्णादिहीना न्यूनेन्द्रिया नेत्रादिहीनाः रोगिनः कुष्ठप्रभृतयः । तेषां सत्येनासत्ये
नान्यथास्तोत्रेणावाक्षेपमाक्रोशं करोति चेत्पणानर्द्धत्रयोदशदण्ड्याः सत्यं

Indira Gandhi National
Centre for the Arts

१५४ चनेत्रस्त्येनेत्रमप्यन्त्यत्वमसीति असत्संद्रियवतिइंद्रियमप्यन्त्यत्वमसीति अ
न्यथास्तोत्रं असद एव वचनस्मानतिशयेनासीतिवचनं प्रथमवाक्पारुष्यस
मजातिगुणविषमेतत् । एतत्विषय एव बृहस्पतिः ॥ समजातिगुणानां च
वाक्पारुष्ये परस्परं । विनयोभिहितः शास्त्रे पणाद्यर्द्धत्रयोदश ॥ विष्णुः ॥
सवर्णाक्रोशने द्वादशपणान्दण्ड्यः । हीनवर्णाक्रोशने षट्कान्त्यजा
दीनां तथा ॥ याज्ञवल्क्यः ॥ अभिगंतास्मि भगिनीं मातरं च जन्तेति हि । शपंतं
दापयेद्राजा पंचविंशतिकं दमं ॥ व्यासः ॥ पापोपपातकक्रोशे महापातकशं
सकाः । आद्यमध्योत्तमान्दण्डनेद्युरेते यथाक्रमं । अत्र महापातकपदं अ एम.
तिपातकपरं मितिन परेणाविरोधः । एतेषां पापादिशंसकानां यथाक्रमं प्रथ १५४
ममध्यमोत्तमसाहसाः दण्डा इत्यर्थः ॥ याज्ञवल्क्यः ॥ पतनीयकृते क्षेपे दण्डो मध्यम

साहसं । उपपातकयुक्ते तु दाप्यः प्रथमसाहसं । पतनीयकृते पातित्यहेतुभिर्ब्रह्म
हत्यादिभिः कृते आक्रोशे इति चण्डेश्वरः ॥ मनुः ॥ शतं ब्राह्मणमाक्रुश्य क्षत्रियो
दण्डमर्हति । वैश्योप्यर्द्धशतं द्वे वा शूद्रस्तु वधमर्हति । आक्रुश्य मध्यमेन वा
क्पारुष्येणाङ्गति शोष इति पारिजातः । द्विधे साक्रोशगौरवापेक्षया वधस्ता
डनजिह्वाच्छेदनादिरूपः । अत्रैव चण्डेश्वरस्य रसः ॥ मनुः ॥ विप्रः पंचाशतं द
ण्ड्यः क्षत्रियस्याभिशंसने । वैश्ये स्यादर्द्धपंचाशत् शूद्रे द्वादशको दमः । अ
भिशंसनमाक्रोशः । वैश्येप्यर्द्धाभिशंसनीयेइति विवादचिंतामणिः ॥ पंचाश
तमित्युत्तमो अपरोत्तपरयोरिमेधातिथिः ॥ बृहस्पतिः । विप्रः शतार्द्धं दण्ड्य
स्तु क्षत्रियस्याभिशंसने । वैश्ये शतार्द्धं पंचाशत् शूद्रस्यार्द्धत्रयोदश । वैश्यस्य
क्षत्रियस्तेवेदण्डनीयः शतं भवेत् । तदर्द्धं क्षत्रियो वैश्यं शिपन्न विनयम

Indira Gandhi National
Centre for the Arts

१५५ हितास्मृ शूद्रेपि क्षत्रियस्य पणा विंशतिर्दमः। शूद्रस्य नुवृत्तौ बृहस्पतिः॥ धर्मोप
देशाकर्त्ता च वेदोदाहरणान्वितः। आक्रोशकश्च विप्राणां जिह्वाच्छेदेन शाध्य
ते॥ मनुः॥ ब्राह्मणक्षत्रियाभ्यां तु दण्डः कार्यो विजानता। ब्राह्मणे साहसः पू
र्वः क्षत्रिये चैव मध्यमः। इदं ब्राह्मणक्षत्रिययोः परस्परं पातनीयाक्रोशवि
षयमुभयोरेवमेव॥ मनुनारदौ॥ एकजातिर्द्विजातींस्तु वाचा दारुणया क्षिप
न्। जिह्वायाः प्राप्नुयाच्छेदं जघन्यप्रभवो हि सः॥ नामजातिग्रहं तेषामतिद्रो
हेण कुर्वतः। निक्षेप्योयोमयः शंकुर्ज्वलन्नास्ये दशांगुलः। एकजातिरिह
शूद्रः। उपनयनाभावात्॥ द्विजातिं ब्राह्मणादित्रयं। दारुणया पातित्याभि एम·
शंसनरूपयेति कल्पतरुः। जघन्यप्रभवं शूद्रत्वात् पद्भ्यामुत्पन्नत्वेन बोधितत्वा १५५
त्। एतेन संकरजातीनामपि द्विजातिं दारुणात्ते पेऽयं दण्डः। तेषामपि जघन्य

जातित्वादिति चण्डेश्वरादयः। अयोमयः लोहमयः। शंकुः कीलकः। द्विजातीनाहतेगो
तमः॥ शूद्रो द्विजातीनभिसंधायाभिहत्य च॥ वाक्दण्डपारुष्याभ्यामंगमोच्योये
नापहन्यात्। तेनाक्रोशे जिह्वाछेदः। अंगताडने तस्य मोच्यः येनांगेन ताडयेत् तस्य
छेदः॥ मनुः॥ श्रुतं देशं च जातिं च कर्म शारीरमेव च। वितथेन ब्रुवन् दर्पाद्दाप्यः स्या
द्विशतं दमं। कर्मेति पञ्चम्यादिरूपं। शारीरं शारीरावयवं। वितथेनासत्येन तेन य
त्श्रुतदेशो जाति त पञ्चम्या शारीरावयवं। विकल्पदर्पोद्दसत्संवदति तत्र द्विशतं
दण्ड्यः॥ उदाहरणान्येषां यथा नानेन वेदः श्रुतः नास्यार्यावर्त्तो देशः नायं विप्रः
नानेन तपः कृतं नायमनुष्ठकर्मसादिरपेः। स्वगुणाराध्यतानेन पठनवत्तानं॥
नारदः॥ अवकृत्य च राजानं धर्म्मार्थे च व्यवस्थितं। जिह्वाछेदाद्भवेच्छुद्धिः सर्व
स्वहरणेन वा॥ याज्ञवल्क्यः॥ राज्ञोऽनिष्टप्रवक्तारं तस्यैवाक्रोशनं तथा। तन्मंत्रस्य

Indira Gandhi National
Centre for the Arts

१५६ वमेनारं छित्वाजिह्वांप्रवासयेत्। अनिष्टं अनिष्टश्लोकाः। मंत्रः स्वराष्ट्रस्यादि हे
तुल्यापाद चिंता। नारदः ॥ लोकेस्मिन्द्वाववक्तव्यौ अवध्यौच प्रकीर्तितौ। ब्राह्मणा
श्चैवराजाच तौहीदं विभृतोजगत्। पतितं पतितेत्युक्त्वा चौरं चौरेतिवा पुनः। वच
नात्तुल्यदोषः स्यान्मिथ्याद्विर्दोषतां व्रजेत्। वचनात्तत्र शास्त्रेरूपात्। अत्रापवाद
माहकात्यायनः॥ यत्रस्यात्परिहारार्थं पतितस्तेनकीर्तितः। वचनात्तत्र न स्यात्तु
दोषोयत्रविभावयेत्। यत्रपरिहारार्थं पतितादिसंसर्गपरिहारार्थं पातित्या
दिकीर्तितमितिविभावयतितत्र न दोष इत्यर्थः। याज्ञवल्क्यः॥ त्रैविद्यनृपदे राम·
वानां क्षेपउत्तमसाहसः। मध्यमोजातिपूगानां प्रथमोग्रामदेशयोः। त्रैविद्यो
वेदत्रयसम्पन्नः॥ नृपः प्रजापालकः। जातयो ब्राह्मणादयः। तेषांपूगः संघः॥ मनुः १५६
॥मातरंपितरंजायांभ्रातरंतनयंगुरुं। आक्षारयन्शतंदण्ड्यः पंथानं चाददद्गुरोः।

आक्षारयन्वाक्पारुष्यविषयीकुर्वन्दण्डइत्यनुवर्ततेविष्णुः॥ गुरूनाक्षारयन्का
र्षापणशतं। बृहस्पतिः॥ त्रिपनश्वास्यादिकं दद्यात्पंचाशत्परिकंदमं। उशनाः
॥यत्रनोक्तोदमः सर्वेणैतेनासात्स्तु महात्मभिः। तत्रकार्य्यं परिज्ञाय कर्तव्यं दण्डधा
रणं॥ ० ॥ अथदण्डपारुष्यं॥ एषदण्डविप्रोक्तोदमवाक्पारुष्यस्यनत्वतः। अत
ऊर्द्धं प्रवक्ष्यामिदण्डपारुष्यनिर्णयं। दण्डपारुष्यलक्षणमाह बृहस्पतिः॥ हस्त
पाषाणलगुडैर्भस्मकर्दमपांसुभिः। आयुधैश्च प्रहरणं दण्डपारुष्यमुच्यते।
नारदोपि॥ परगात्रेष्वभिद्रोहो हस्तपादायुधादिभिः। भस्मादिभिश्चोपघातो
दण्डपारुष्यमुच्यते। तस्यापिदृष्टं त्रैविध्यं मध्योत्तमक्रमात्। अवगूरणनिः
शंकपातनं क्षततर्शनैः॥ अभिद्रोहोहिंसा अवगूरणं शस्त्राद्युद्यमनं निःशंक
पातनं निर्दयं शस्त्रादिपातनं अरुधिरं समध्यमं सरुधिरं क्षततर्शनेन परेनविव

Indira Gandhi National
Centre for the Arts

१५० स्तिनमुत्तमं॥ बृहस्पतिः॥ भस्मादीनां प्रक्षेपणं ताडनं च करादिना। प्रथमं दण्डपारु
ष्यं स्मृतः कार्य्योत्र माषिकः। एष दण्डः समेषूक्तः परस्त्रीष्वधिकेषु च। द्विगुणाद्वि
गुणो ज्ञेयः प्रधानाद्येत्र यात्सुरे। तडनमात्रोघमात्रं माषिकः दण्डमाषपरिमि
तः समेषु ज्ञात्यादिभिस्तुल्येषु। त्रिगुणादृति ज्ञातिगुणाभ्यामधिकेषु द्रव्यं स्या
द्वी आह याज्ञवल्क्यः॥ भस्मपंकरजःस्पर्शे दण्डो दशपणः स्मृतः। अमेध्यपा
र्ष्णिनिष्ठूतस्पर्शने द्विगुणः स्मृतः। समेष्वेव परस्त्रीषु द्विगुणास्तूत्तमेषु च। ही
नेष्वर्द्धदमो मोहमदादिभिरदण्डनं। अमेध्यं अशुचनवकर्णविट्दूषिकाभुक्तो
च्छिष्टादि। पार्ष्णिश्चरणस्य पश्चिमभागः चरण एव तात्पर्य्यमित्यादिके श्रित राम·
निष्ठुतं मुखनिःसृतं जलं एतैः स्पर्शने प्रागुक्ताद्दशपणाद्द्विगुणं दण्डः १५०
परस्त्रीषूत्तमेषु च द्विगुणादृतियोजना –। हीनेषु अपकृष्टेषु मोहश्चित्तवैकुल्यं म

द्यमद्यादिजनितावस्था आदिपदादुन्मादादेः संग्रहः। छर्दिमूत्रपुरीषाद्यैरा
पःस चतुर्गुणाः। षड्गुणाः कायमध्ये तु द्विषड्गुणाः स्मृताः आदिपदात् शुक्रादयो
ग्राह्याः। अपेक्षितो व्यतिरिक्ताङ्ग एवमेव रत्नाकरः। अधःकाये इति मिश्राः चतुर्गु
णाः प्रागुक्तगुणात् एवं षड्गुणाद्यावपि॥ कात्यायनः॥ उद्गूरणे तु हस्तस्य कार्य्यो द्वा
दशकोदमः। स एव द्विगुणः प्रोक्तः पातनेषु द्विजातिषु। उद्गूरणे हस्तस्य प्रहारार्थ
हस्तोद्यमः। पातने हस्तस्य कस्मै चिदिति विवादचिन्तामणिः। रत्नाकरे तु द्विजा
तिषु स्वस्वजातिषु इति पाठः। तत्र व्यक्त एवार्थः॥ बृहस्पतिः॥ उद्यतेऽस्त्रशि
लाकाष्ठके तव्यः प्रथमो दमः। परस्परं हस्तपाते दशविंशतिकस्तथा। अयं
चोभयोरेव समानजातीयोर्दण्ड इति मन्तव्यः। दण्ड इत्यनुवर्त्तते विष्णुः॥ हस्तेनोद्गू
रयित्वा दशकार्षापणान् पादेन तु विंशतिकाष्ठेन प्रथमसाहसं शस्त्रेणोत्तमसाह

Indira Gandhi National
Centre for the Arts

१५८ संऽवनमंप्रतिअधमस्त्रीतज्ञात्रमुघमतितरामहत्त्वंपणानद्दण्डः॥याज्ञवल्क्यः॥
उद्गूर्णे हस्तपादे तु दशविंशतिकौ दमौ। परस्परस्य सर्वेषां शस्त्रे मध्यमसाहसं
।एतत्तुल्यसमानजातीमानमेव गंतव्यं।असमानजातीयानां तु दण्डान्तरश्चवर्णा
नुपणानुवृत्तौ शंखलिखितौ॥ प्रहारे घातेऽष्टपंचाशत्निपातने द्विगुणोऽभिहि
यतेऽनेनेति प्रहारो दण्डादिः षट्पंचाशत्। उद्दंडो तमवर्णानाधमवर्णस्य दण्डो
घमनेवोद्धव्यं॥ मनुः॥ पाणिमुद्यम्य दण्डं तु पाणिच्छेदनमर्हति।। सहासेनम
भिप्रेप्सुर्हत्कटदेशापकृष्टजः। कट्यांकृतांको निर्वास्यः स्फिचं वास्यावकर्त्तयेत
।अवष्ठीवतो दर्पादद्वावोष्ठौ छेदयेन्नृपः। अवमूत्रयतो मेढ्रमपशर्द्धयतो गु राम
दं। केशेषु गृह्णतो हस्तौ छेदयेदविचारयन्। पादयोर्दाढिकायां च ग्रीवायां वृ १५८
षणेषु च। ब्राह्मणविषयेऽस्य दण्डोऽयं व्यक्तमाह नारदः॥ येनांगेनावरो

धर्म्मो ब्राह्मणस्यापराध्नुयात्। तदंगं तस्य छेत्तव्यमेवं शुद्धिमवाप्नुयात्॥ मनुः॥ ये
नकेनचिदंगेन हिंस्याच्चेच्छ्रेष्ठमन्त्यजः। छेत्तव्यं तत्तदेवास्य तन्मनोरनुशासनं।मु
ख्याचोरूपनामत्रेणागुरश्रेहे न ब्राह्मणस्यापमाने यथाक्रममोष्ठादिच्छेदः।ह
स्तावितिद्विवचनमेकेनापि करेणग्रहणे हस्तच्छेदनार्थं दाढिकाश्मश्रूः॥या
ज्ञवल्क्यः॥ पादकेशांशुककराकर्षणेषु पणान्दश। पीडाकर्षांशुकावेष्टपाद
ध्यासे शतंदमः। समस्य हस्तपादकेशवस्त्रान्यतमाकर्षणे दशपणान् त
स्यैव वस्त्रावेष्टननिष्ठुराकर्षणपूर्वकं स्वचरणानुरोपने शतं पणान्दण्डस्या
र्थः॥ बृहस्पतिः॥ कार्षापणतास्यदन्तपलग्ने घाते दमो बुधैः। द्विकापनक
ष्ठापेस्ताडये नहि माषकः। द्विगुणाः शोणितोद्भेदे दण्डः कार्य्यो मनीषिभिः।
यरानुशास्त्रोरिनात्ततमेवकरोतिदराततगौरवानुसारेण दण्डः कार्य्यः दृसुरव

Indira Gandhi National
Centre for the Arts

१५९ दण्डार्थः। शस्त्रकरणकदुःखोपादानविशेषयति॥ विष्णुः॥ दण्डशोणितेन विना
दुःखमुत्पादयिता त्रिंशतं पणान् सहशोणितेन चतुःषष्टिं॥ मनुः॥ त्वग्भेद
कः शतं दण्ड्यो लोहितस्य च दर्शकः। मांसभेत्ता तु षण्निष्कान् प्रवास्यस्त्वस्थि
भेदकः। अत्र सहशोणितेत्यादिना शोणितेन चतुःषष्टिपणदण्डाभिधानात्
धिकत्वभेदादि प्रयुक्तशोणितः दूरं बोध्यं। ॥बृहस्पतिः॥ कर्णनासाकर
च्छेदे दन्तभेदे स्थिभंजने। कर्तव्यो मध्यमो दण्डो द्विगुणः पतितेषु च॥ पतितेषु
स्वस्थानोच्चावितेषु॥ कर्णादिषु बृहस्पतिः। धातनेत्र प्रमापणमिति। धातनेत्र
प्रमापणं मारणं॥ कात्यायनः॥ कर्णौष्ठघ्राणपादाक्षिजिह्वाशिश्नकरस्य च रामः
।छेदने चोत्तमो दण्डो भेदने मध्यमो भृगुः। छेदने स्वस्थानोच्चाविते भेदने वि १५९
दारणे॥ याज्ञवल्क्यः॥ करपादं तभंगे छेदने कर्णनासयोः। मध्यो दण्डो व्रणोद्भेदे

मृतकल्पे हते तथा॥ व्रणोद्भेदे प्ररूढव्राह्मणस्य व्रणीकरणे। तथा ताडितो यथा मृतक
ल्पोऽभूत् एतेषु प्रत्येकं पंचशतीदण्डः॥ विष्णुः॥ नेत्रकंधरबाहुसक्थिभंगेषु चोत्तमं उ
भयनेत्रभेदिनं राजा यावज्जीवं बन्धनान्न मोचयेत् तादृशमेव कुर्यात् पारम्पलयोः श
क्थ्यः संधिः तादृशो यादृशमन्यं कृतवान्॥ याज्ञवल्क्यः॥ द्विशतं भेदिनो राजद्विष्टा
देशकृतस्तथा। विप्रत्वेन तु शूद्रस्य जीवतोष्टशतो दमः। राजद्विष्टादेशकृत् अ
मुकस्य मर्यादां ज्ञामरिष्यतीत्यादिदेशकारी तस्य विप्रचिह्नयज्ञोपवीतधारणादि
नाजीविकां कुर्वतः शूद्रस्य दण्डोऽयं। अत्रैकविषये नानाविधशारीरार्थदण्डा
ल्पपीडाभूयस्त्वापत्ताभ्यां समाधेयाः॥ अत एव मनुः॥ मनुष्याणां पशूनां च दुः
खाय प्रहृते सति। यथा यथा महद्दुःखं दण्डं कुर्यात्तथा तथा। दुःखाय दुःखोत्प
त्तिमभिसंधाय तेन प्रमारे कृते धनादि कृते च न दोष इति दर्शितं॥ नारदः॥ येनांगेना

Indira Gandhi National
Centre for the Arts

१६० वरो वर्णो ब्राह्मणस्यापराध्नुयात्। तदंगं तस्य छेत्तव्यमेव शुद्धिमवाप्नुयात्। अव
रो हीनवर्णः। तथा राजनि प्रहरेद्यस्तु कृतागस्यपि दुर्मतिः। शूलं तमाग्नौ विप
चेत् ब्रह्महत्याशताधिकं। यदि ब्राह्मणोत्तरपरः ननु ब्राह्मणं हन्यात् सर्वपापे
ष्वपि स्थितमिति विशेषनिषेधात्। तथा चायमर्थः। स्वापराधेपि वा द्विकृतप्रह
रं ब्राह्मणानितरिक्तं शूलमारोप्याग्नौ पचेदिति मिश्राः। चण्डेश्वरस्तु शूलमा
रोप्य यत् संक्लिष्ट येनेतत् शूलं तेन प्रथमतः शूलभेदेन पीडां विधायाग्निपाके
न पीडा कर्त्तव्या इत्यर्थ इत्याह मनुः॥ येन केनचिदंगेन हिंस्यात् श्रेयांसमंत्यजः
। छेत्तव्यं तत्तदेवास्य तन्मनोरनुशासनं। हिंस्यात् श्रेयांसं त्रैवर्णिकं अंत्यजः राम
शूद्रः शूद्रस्यैतदनुवर्त्ता आपस्तम्बः॥ वाचि पथि शय्यायामासने च समीभवतो १६०
दण्डताडनं। वाचि युगपद्वादः पथि तुल्यवद्गमनं शय्यायामासनयोरुपवेशसाम्यं॥ वृह

स्पतिः॥ अंगावपीडने चैव भेदने छेदने तथा। समुत्थानव्ययं दाप्यः कलहापहृतं तथा।
समुत्थानव्ययं भग्नसंघटनार्थं भेषजं पथ्यादिजनकधनव्ययं॥ याज्ञवल्क्यः॥
एकं घ्नतां बहूनां च यथोक्ताद्द्विगुणो दमः। कलहापहृतं देयं दण्डश्च द्विगुणः
स्मृतः। द्विगुणो दमः प्रत्येकं कलहापहृतं देयं कलहे यद्येनापहृतं लुण्ठितमिति
यावत्॥ मनुः॥ भार्या पुत्रश्च दासश्च शिष्यो भ्राता च सोदरः। प्राप्तापराधास्ताड्याः
स्युः रज्ज्वा वेणुदलेन वा। अधस्तात्तु प्रकर्त्तव्या नोत्तमांगे कथंचन। अतोऽन्यथा
पुत्रश्च दासश्च प्रहर्त्तस्तु यथोक्तं दण्डमर्हति॥ शिष्यार्त्तावापस्तम्बः॥ अपरा
धेषु चैवं सततमुपालंभेतानि त्रासमुदकोपस्पर्शनमिति दण्डाः। यथामात्र
मानुवर्त्तेः॥ अस्यार्थः॥ उपलंभेत् तोक्तिभिस्तिरस्कुर्यात् अतित्रासमतिभीत्यु
त्पादनं उदकोपस्पर्शनं अतिशयितकाले पारणीयसेचनं यथामात्रं न त्वप्रा

Indira Gandhi National
Centre for the Arts

२६२ क्रमानुसारेण आनिवृत्तेः। अपराधनिवृत्तिपर्यंतमिति॥ नारदः॥ कश्चित्कृतात्मन
श्छिद्रं दृष्ट्वा तत्परमभिद्रवेत्। हेत्वर्थगतिसामर्थ्ययुक्तस्तत्र परीक्षणं। आत्मनश्छि
द्रं व्रणादिरूपं परमभिद्रवेत्। अहमनेन व्रणवान्कृतोऽयं दण्ड्यतामिति अनुयु
ज्ञात् हेतुर्विकृतस्वरादिः। अर्थः प्रयोजनं गतिसन्निधिगमनं सामर्थ्यं प्रहारक्षम
ता॥ कात्यायनः॥ हेत्वादिभिर्न पश्येच्चेद्दण्डपारुष्यकारणं। तदा साक्षिकृतं तत्र रि
क्थं वा विनियोजयेत्। सास्य भावे दिव्यं॥ बृहस्पतिः॥ आकृष्टस्तु समाक्रोशंस्ताडितः
प्रतिताडयन्। हत्वाततायिनं चैव नापराधी भवेन्नरः। वाक्पारुष्यादिना नीचो यः
सन्तमभिलङ्घयेत्। स एव ताडयंस्तस्य नान्येष्व्यो महीभुजा। नीचः श्वपचादिः सन्तं ब्राह्म राम
णादिरेव तस्य श्वपचादेः हिंसार्थं घातिनान्नेष्व्यो न दण्ड्य इत्यर्थः॥ एलाकरस्तु नीचोऽ २६२
नुत्तमः सन्तमुत्तमं स एव उत्तम एवेत्यर्थः इत्याह नारदः॥ श्वपाकषण्ढचाण्डालविकला

वधकवृत्तिषु। हस्तिपव्रात्यदासेषु गुर्वाचार्यातिगेषु च। मर्यादातिक्रमे सद्यो घात
एवानुशासनं। न च तद्दण्डपारुष्ये दोषमाहुर्मनीषिणः। यमेते ह्यतिवर्तेरन्नेतो
त्तमस्तान्नपनयेत्। स एव विनयं कुर्यात्न तद्विनयभाङ्नृपः। मला ह्येते म
नुष्याणां धनमेषां मलात्मकं। अतस्तान्घातयेद्राजा नार्थदण्डेन दण्डयेत्॥ उ
ग्रान्तु जातः श्वपाकः। क्षत्तुर्जातस्तथो-ग्रांच श्वपाक इति वचनात्। उग्रं तु शू
द्रायां क्षत्रियाज्जातं प्राहुरुग्रमिति द्विजा इति देवलेन नीरीतो ग्राह्यः॥ षण्ढः क्ली
वः॥ चाण्डालः शूद्राद्ब्राह्मण्यां जातः। वधकवृत्तिः परवध एव वृत्तिर्जीवनोपायो
यस्य स वधकवृत्तिर्धीवरादिः। हस्तिपो हस्त्यधिरोहकः। दासो गृहजातादिः
गुर्वाचार्यातिगाः गुर्वाचार्यवचनलङ्घनकर्त्तारः मर्यादाधर्मव्यवस्थाः सद्योऽवि
लम्बितं घात एव ताडनमेव न तु यथापराधं। श्वपाकादयो येषु ताडनं कुर्वते एतेषां

Indira Gandhi National
Centre for the Arts

१६२ घातरूपं दण्डं कुर्युः तेषामसामर्थ्ये राजा तं घातरूपमेव दण्डं कुर्यान्नार्थदण्डैः।अत्र
हेतुर्मेलाहो तेदूत्सारी सर्थः।रत्नाकरादिपुस्तकेतायमेवार्थः॥कात्यायनः॥अल्प
प्रपश्चतेरासानांम्हि छानां पापकारिणां।प्रतिलोम्यप्रसूतानां ताडनं नार्थतो दमः
।पापकारिणोऽतिप्रायेण प्रातिलोम्यप्रसूतान   दमः॥विष्णुः॥अजाश्वोष्ट्रघा
ती ह्येककरपादः कार्य्यः विमांसविक्रयी पशुघाती च कार्षापणशतं दण्ड्यः।प
शुस्वामीतन्मूल्यं दद्यात्।पशूनां पुंस्त्वोपघातकारी च अरण्यपशुघाती च पंचा
शतं कार्षापणान् पक्षिघाती मत्स्यघाती च दश कार्षापणान् कीटोपघाती का
र्षापणान्॥   ।विमांसं विरुद्धमांसं श्वसृगालादिमांसमिति यावत्॥अ   एम·
त्संतामपासेनु याज्ञवल्क्यः॥कूटस्वर्णव्यवहारी विमांसस्य च विक्रयी। १६२

अङ्गहीनः प्रकर्तव्यो दाप्यश्चोत्तमसाहसम्॥कात्यायनः॥त्रिपणो द्वादशपणो घाते तु पशुपक्षिण
णां॥सर्पमार्जारनकुलश्वशूकरवधे नृणां॥स्वयमसंता प्रकृष्टमृगपक्षिघाते त्रिपणात्मकः।त
तदुत्कृष्टघातके पुरशपणाः।सच प्रागेवोक्तः।ततउत्कृष्टघाते द्वादशपणाः।विष्णूक्तपञ्चाश
त्पणात्मकश्चसंतोत्कृष्टमृगपक्षिविषयः।पञ्चाशदुत्तमो दण्डः क्षुद्रेषु मृगपक्षिष्विति वचना
त्॥मनुः॥गोकुमारीं देवपशूनुक्षाणं वृषभं तथा॥वाहयन्साहसं पूर्वं प्राप्नुयादुत्तमं वधे।गो
कुमारी वर्षेणासंयुक्ता गौः।देवाय दत्तः पशुः।उक्षाणं।उक्षसेचने इत्यनुसारात्।बीजसेक्तारं वृ
षं।वृषभपदेन जीर्णवृषो बोक्तः।मनुः।छिन्ननासे भिन्नयुगे तिर्यक्प्रतिमुखागते।अक्षभं
गे च यानस्य चक्रभङ्गे तथैव च।छेदने चैव यन्त्राणां योक्त्ररश्म्योस्तथैव च॥आक्रन्दे चाप्य-ही
ति न दण्डं मनुरब्रवीत्छिन्ननस्ये छिन्ननासासम्बन्धिरज्ज्वौ भिन्नयुगे भिन्नयुगोकाष्ठे तिर्य
क्प्रतिमुखागते तिर्यक्प्रतिमुखं यत्र तत्प्रतिरोधाद्गमनागमनं वलेन यस्य रस्य यानस्य

Indira Gandhi National
Centre for the Arts

गमनादितरपि न दंडहेतुरित्युक्तं। अक्षभङ्गमध्यकाष्ठं यन्त्राणां युगादिबन्धनानां योक्त्रं युग
बन्धनरज्जुः रश्मिः प्रग्रहः आक्रंदेत्यपेहीति दूरं गच्छेत्युच्चैरभिलापे सारथ्यादिनाकृते
तदनादरे प्राणिसमीपमागतो यदि रथादिना पीड्यते तदा सारथ्यादेर्न दंडइत्यर्थः। तथा
यत्रातिवर्त्तेते युग्यं वै युग्यात्। प्राजकस्य तु। तत्र स्वामी भवेद्दंड्यो हिंसायां द्विशतं दमं। य
त्रानभिज्ञः प्राजकः सारथ्यादिः स्वामिनाकृतः तदज्ञानाच्च युग्यं तुरगादि अतिवर्त्तते।
अतिक्रामति। तत्र तज्जन्यहिंसायां स्वामी द्विशतं दंड्यः यत्र पुनरभिज्ञः प्राजकः। सा
रथ्यादि स्वामिनाकृतः। तदज्ञानाच्च तत्र प्राजकस्यैव न स्वामिनः तदिदमाह मनुः।
प्राजकश्चेद्भवेदाप्तः प्राजको दंडमर्हति। तथा सचेतरपथि नसंरुद्धः पशुभिर्वा रथेन वा। राम॰
प्रमापयेत्प्राणभृतस्तत्र दंडो विचारितः। यत्र प्राजकाकौशलप्रयुक्तः। परवाह्यातदे १६३
शमानप्रतिरोधः। प्राणिहिंसाहेतुर्भवति तत्रापि प्राजकस्य दंडोविचारितो निश्चितइ

त्यर्थः। इदानीं प्राणिविशेषसाध्ये दंडमाह मनुः। मनुष्यमारणे क्षिप्रं चौरवत्किल्बि
षं भवेत्। प्राणभृत्सु महत्स्वर्द्धं गोगजोष्ट्रहयादिषु। अत्र चौरवत्तद्धननेन सतिसा
हसेयोऽर्थदंडः॥ सोतिदिश्यते। ननु वधदंडस्तस्यार्द्धत्वाभावात्। उत्तरार्द्धे गवादिषु अ
र्द्धत्वाभिधानासंगतेः। तथा क्षुद्रकाणां पशूनां च हिंसायां द्विशतोदमः। पञ्चाशत्तु
भवेद्दंडः शुभेषु मृगपक्षिषु। गर्द्दभाजाविकानां च दंडः स्यात्पंचमाषिकः। माषिक
स्तु भवेद्दंडः श्वसूकरनिपातने। क्षुद्रत्वमस्य परिमाणतस्तच्च वयस्यकलत्रादीनां
शुभमृगाः रुरुप्रभृतयः। शुभपक्षिणः॥ शुकादयः। माषको हि रूप्यकृष्णलेद्वतिप
दिजातः॥ कात्यायनः॥ प्रमापणे प्राणभृतां प्रतिरूपं तु दापयेत्॥ तस्यानुरूपं मूल्यं
वा दंड इत्यब्रवीन्मनुः। प्रतिरूपं प्रमापितः॥ प्राणिगुणादिनासमं शतनश्च प्रतिरूपादि
दासं स्वामिने॥ अथ स्तेयं॥ तत्र मनुः। दाषोऽर्थिनेनाभिहितो दंडपारुष्यनिर्णयः। स्ते

Indira Gandhi National
Centre for the Arts

२६५ नस्यातः प्रवक्ष्यामि विधिं दंडविनिर्णये॥ स्यात्साहसं त्वन्वयवत् प्रसभं कर्म यत्कृतं।
निरन्वयं भवेत्स्तेयं हृत्वापव्ययते च यः। अन्वयवत् रक्षकपुरुषसमक्षं तेन प्रस
भं बलात्कारेणापहृत्यापहारस्तगोपयतोपहरणं साहसं निरन्वयं रक्षकपुरुषा
समक्षं अपव्ययते अपहृतमित्यर्थः। तेन यत्रापहार्योपहरणं भवति तत्स्तेयं॥
अथ स्तेनाः॥ तत्र मनुः। द्विविधांस्तस्करान्विद्यात् परद्रव्यापहारिणः। प्रकाशांश्
श्चाप्रकाशांश्च चारचक्षुर्महीपतिः। स्वचिन्हैरेव विज्ञेयाश्चारैस्तस्करवैरिभिः। स
चिन्हैश्चौरचिन्हैः। वृहस्पतिः। प्रकाशाश्चाप्रकाशाश्च द्विविधास्तस्कराः स्मृताः॥
प्रज्ञासामर्थ्यमायाभिः प्रभिन्नास्ते सहस्रशः। प्रज्ञापरद्रव्यापहारानुरूपा मायापर राम·
र्थ्यमोहनं। तथा नैगमावैद्यकितवाः सभ्योत्कोचकवंचकाः दैवोत्पातविदो भद्राः शि २६५
ल्पज्ञाः प्रतिरूपकाः॥ अक्रियाकारिणश्चैव मध्यस्थाः कूटसाक्षिणः। प्रकाशतस्कर

ह्येते तथा कुहकजीविनः। निगमाः कपटतुलादिधारणाद्वारार्थहारिणः। वैद्या रोगं प्रकोप्य
प्यार्थहारिणः कितवाः कूटदेवनेनार्थहारिणः। सभ्याः पार्षदाः। अर्थलोभेनान्यथ
वादिनः। उत्कोचकाः कार्याधिकारिणः सन्त उत्कोचकग्राहिणः। वंचकाः सम्भूयोद्य
तानां प्रच्छाद्य इतरार्थग्राहिणः। दैवं भाग्यं भद्रः शान्तिनियुक्तः शांतिहेतुमलं तेवा
र्थहरः। शिल्पज्ञाः कूटशिल्पेनार्थहराः कूटसाक्षिणो यथावादेन परद्रव्यापहारि
णः कुहकजीविनइंद्रजालादिनार्थहारिणः। नारदः। प्रकाशवंचकास्तत्र कूटमा
नतुलाश्रिताः। उत्कोचकाः सोपधिकाः कितवाः पण्ययोषितः प्रतिरूपकराश्चैव मंग
लादेशकारिणः। इत्येवमाद्या विज्ञेयाः प्रकाशतस्करा भुवि। सोपधिकाः ये भयमा
शांवा दर्शयित्वा परस्य धनमपहरंति। मंगलादेशकारिणः। मंगलादेशद्वारार्थहराः।
इत्येवमाद्यपदात्परिपदेन नानापर्णोपजीव्यादयो ग्राह्याः। नारदः। अप्रकाशास्तु वि

Indira Gandhi National
Centre for the Arts

१६५ ज्ञेयाबहिरभ्यन्तरश्रिताः ॥ सप्रमत्तप्रमत्तार्त्तान्संमुष्णंत्यन्ययेन राः ॥ सन्धिछिरः पांथमु सा १
सा ष्णांद्विचतुःपारहारिणः । उत्क्षेपकाः सस्यहरास्तेयाः प्रछन्नतस्कराः । उत्क्षेपकाः हृत्क्ष २२
कस्याग्रतरावानवहितस्पदृष्टिं वञ्चयित्वार्थहारिणः । सस्यहरणग्रहणेन प्रछन्नहा
रकं विवक्षितं । श्लोकश्चकारश्चतान्यान्यानिवचनान्यनतिप्रयोजकत्वेनोपेक्षितानत
याग्रन्थबाहुल्यभियाचनेहलिखितानि ॥ मनुः ॥ तेषां दोषानभिख्याप्य स्वेस्वे कर्म
णितत्त्वतः । कुर्वीतशासनंराजा सम्यक्सारानुसारतः । अभिख्याप्यलोके कथयित्वा
श्री ४ सारशब्दोत्रापराधनपरः । तेनापकृतधनानुसारेणतानदंडयेदित्यर्थः । बृहस्पतिः ।
संसर्गचिन्हलोप्त्रैश्च विज्ञाता राजपूरुषैः ॥ प्रदाप्यापकृतं शास्तोरमैः शास्त्रप्रचोदितैः राम·
। संसर्गः प्रमितैश्चौरैः सह मेलनं चिन्हं चौरत्वलिंगं संधिखनित्रादि । लोप्त्रं चोरि १६५
तद्रव्यं । एषामन्यतमेनापि चोरमवधार्य चोरितद्रव्यं तद्द्वारा द्रव्यस्वामिने प्रदाप्य

राजशास्त्रदृष्टेन दंडेन तं शासयेदित्यर्थः । मनुः ॥ परमं यत्नमातिष्ठेत्स्तेनानां निग्रहे नृ
पः ॥ स्तेनानां निग्रहादस्य यशो राष्ट्रं च वर्द्धते । अभयस्य नु यो दाता स पूज्यः सततं नृपः । सत्रं
हि वर्द्धते तस्य सदैवाभयदक्षिणं ॥ ७ ॥ अथ प्रकाशतस्करदंडः ॥ ७ ॥ तत्राह व्यासः ॥
तुलामानविशेषेण लेख्येन गणनेन च ॥ अर्घस्य वृद्धिह्रासेन मुषंति वणिजो जनान ॥ त
द्रव्यसदृशे द्रव्ये हीनमल्पं विमिश्रितं ॥ कुर्वन्सौपाधिकाद्रव्यान्येपणानां परिवर्त्तमे ॥ या
ज्ञवल्क्यः ॥ मानेन तुलया वापि योंशमष्टममाहरेत् दंडं स द्विशतं प्राप्नोति वृद्धौ हानौ च क
ल्पितः ॥ मानेन कपटमानेन वा काशेनान्यायांतेन येनकेनापि छद्मप्रकारेण कपट
तुलादिनापि यः परद्रव्यस्याष्टमांशमपहरति स पणाशतद्वयं दंडं प्राप्नः ॥ वृद्धौ
हानौ चेति । यस्तु नवमांशं सोष्टमभागन्यूनं द्विशतं पंचसप्तमांशं सप्तमभागं द्वि
शतं प्राप्नुयादित्यर्थः वाचस्पतिमिश्रेणाप्येवमेवार्थोनुवर्णितः । शंखलिखितौ । कू

१६६ टतुलामानप्रतिमानव्यवहारेआहीरोंगछेदोवा॥मानंप्रस्थादिआदीरोमुंडनादिरूपः।
अंगछेदः कर्णादिछेदः॥कूटतुलामानेनकूटप्रतिमानेनवायोव्यवहरति।बहुधा
तस्यमुंडनंयस्तुतत्रशीलः तस्यकर्णादिछेदःकार्यः इतिमिश्रभट्टाचार्याः॥अत्र
गौरवागौरवाभ्यांविकल्पस्थितिरितिरत्नाकरः।मनुः॥समैर्हिविषमंयस्तुच
रेद्वैमूल्यतोपिवा॥सप्राप्नुयाद्दमंपूर्वंनरोमध्यममेववा।समैः साधारणैःपदा
र्थैः विषमंविलक्षणम॥वस्तुपरिवर्त्तनमूल्येनवान्यूनपरस्यषष्ठभागहानौ
साईपणाहर्यं।पंचमादिभागहानौतुपंचशतपणादंडंदाप्यइत्यर्थः॥एवमेवह
लायुधादयः॥तथाअबीजविक्रयीयस्तुबीजोत्कृष्टंतथैवच॥मर्यादाभेदकश्चै राम॰
वविकृतंप्राप्नुयाद्वधं।अबीजविक्रयीअबीजंबीजत्वायोविक्रीणातिबीजोत्कृष्टात् १६६
उत्तममपिबीजंबलेनयोहरति।मर्यादाभेदकः।देशजातिकुलशास्त्रराजलोकस्थि

तिक्रमकारी।विकृतंवधंकर्णादिछेदनरूपं॥बृहस्पतिः॥प्रच्छन्नदोषव्यामिश्रपुनः
संस्कृतविक्रयी।पण्यंतद्द्विगुणंदाप्योवणिग्दंडंचतत्समं॥प्रच्छन्नदोषोगोपितदो
षः।व्यामिश्रंअपद्रव्यमिश्रितं।पुनःसंस्कृतंविक्रयपण्यंपुरातनंक्षालनादिनापुन
र्नवीकृतं यदेषामन्यतमं।विक्रीणीतेसविक्रीतभाजनात्द्विगुणंभाजनास्विकं
क्रेतरि॥विक्रीतवस्तुसमंचदंडंराजनिदाप्यइत्यर्थः॥याज्ञवल्क्यः॥मिथ्याव
दन्परीमाणंशुल्कस्थानादपाक्रमन्॥दाप्यस्त्वष्टगुणंयश्चसव्याजक्रयवि
क्रयी॥पण्यस्यपरिमाणमतथ्यंवदन्।क्रयादेकत्वोअपरांपरिहरन्कूटंक
यंविक्रयंवाकुर्वन्प्रकृतपण्यादष्टगुणंदंडंदाप्यइत्यर्थः॥विष्णुः॥तुलाशास
नमानानांकूटकृन्नाणकस्यच॥एभिश्चव्यवहर्त्तायःसदाप्योदममुत्तमं॥तुलाश
वर्णादितोलनदंडः।शासनंराजसंबंधिचिन्हं।नाणकोमुद्रामानं।टंकादियत्रता

Indira Gandhi National
Centre for the Arts

१६६ टतुलामानप्रतिमानव्यवहारेष्वाधीशंगच्छेदोवा॥मानंप्रस्थादिआधीरोमुंडनादिरूपः।
ग्रंगच्छेदः कर्णादिछेदः॥कूटतुलामानेनकूटप्रतिमानेनवायोव्यवहरति।वदुधा
तस्यमुंडनंयस्तततश्रीलः तस्यकर्णादिछेदः कार्यः इतिमिश्रभट्टाचार्याः॥अत्र
गौरवागौरवाभ्यांविकल्पस्थितिरितिरत्नाकरः। मनुः॥समैर्हिविषमंयस्तुच
रेद्वैमूल्यतोपिवा॥सप्राप्नुयाद्दमंपूर्वंनरोमध्यममेववा।समैः साधारणोःपरा
र्थैः विषमंविलक्षणम॥वस्तुपरिवर्त्तनमूल्येनवाग्न्हनपरस्यषष्ठभागहानौ
साद्दपणादुर्यं।पंचमाषिभागहानौतुपंचशतपणोदंडंदाप्यइत्यर्थः॥एवमेवह
लायुधारयः॥तथाअवीजविक्रयीयस्तुवीजात्कृष्टीतथैवच॥मर्यादाभेदकश्चै एम·
वविकृतंप्राप्नुयाद्वधं।अवीजविक्रयीअवीजंवीजतयायोविक्रीणाति।वीजोत्कृष्टात् १६६
उत्तमसपिवीजंवलेनयोहरति।मर्यादाभेदकः।देशजातिकुलग्रामराजलोकस्थि

स्थितिक्रमकारी।विकृतंवधंकर्णादिछेदनरूपं॥वृहस्पतिः॥प्रछन्नदोषव्यामिश्रपुनः
संस्कृतविक्रयी। पणपंतद्विगुणंदाप्योवणिग्दंडंचतत्समं॥प्रछन्नदोषोगोपितदो
षः।व्यामिश्रंअपद्रव्यमिश्रितं।पुनःसंस्कृतंविक्रयपणपंपुराननंश्लानादिना पुन
र्नवीकृतं यएषामन्यतमं।विक्रीणाति सविक्रीतभाजनात् द्विगुणंभाजनास्यिकं
क्रेनदि॥विक्रीतवस्तुसमंचदंडंराजनिदाप्यइत्यर्थः॥याज्ञवल्क्यः॥मिथ्याव
दन्परीमाणंशुल्कस्थानात्पारक्रमन्॥दाप्यस्त्वष्टगुणंयश्चसव्याजक्रयवि
क्रयी॥पणपस्यपरिमाणमतथ्यंवदन्।क्रयादेकर्त्तव्योअपणोपरिहरनकूटंक्र
यंविक्रयंवाकूर्वन्प्रकृतपणापारष्टगुणंदंडंदाप्यइत्यर्थः॥विष्णुः॥तुलाशास
नमाम्नानांकूटकृन्नाणकस्यच॥एभिश्चव्यवहर्त्तायःसदाप्योदमपुत्तमं॥तुलाप्र
वर्णादितोनदंडः।शासनंराजसंवंधिचिन्हं।नाणकोमुद्रामानं।टंकादिःयत्रता

Indira Gandhi National
Centre for the Arts

१६७ नकूटाननिर्माभियोवातेनव्यवहरति।सपणसहस्रंदंड्यइत्यर्थः।तथाचकूटंकूटकं
कृतेकूटंयस्मात्यकूटकं॥सनाणकपरीक्षीतुराज्ञउत्तमसाहसं।नाणकोमुद्रेतिव्या
ख्यातंयोमुद्रापरीक्षकोरौप्यादिनांमुद्रांअमुद्रांकृतेभद्रांवामन्द्रांकृते
सासहस्रंपणान्दंड्यइत्यर्थः।विष्णुः॥उत्तमंसाहसंदंड्योभिषङ्मिथ्याचरन्नु
त्तमेषुमध्यमंमध्यमेषुप्रथमंतिर्यक्षु।व्यासः।अनिच्छन्तमभिमतंसंयोज्यप्रव्र
सनेनरं।अपकर्षतितद्द्रव्यंवेश्याकितवशिल्पिनः।अनिच्छंतंप्रवसन्नुत्सृजं।
अभिमितंकार्याकार्यज्ञानहीनं।एतेविप्रवंचकाइत्यर्थः।अन्यायवादिनः
सभ्यास्तथैवोत्कोचजीविनः।विप्रवंचकाश्चैवनिर्वास्याःसर्वएवते।याज्ञवल्क्यः राम
।उत्कोचजीविनोद्रव्यहीनान्कृत्वाविवासयेत्।तथाबृहस्पतिः।ज्योतिर्ज्ञानंत १६७
थोत्पातमविदित्वानुयेनराणां।अवयन्त्यर्थलोभेनविनेयास्तेपियत्नतः।याज्ञवल्क्यः॥

वसानस्थानपणान्राज्ञोरजकस्तुपरांशुकं।विक्रयावक्रयाधानयाचितेषुपणान्दृ
श।अवक्रयोभाटकं।आधानंबंधकीकरणं।कूटस्वर्णव्यवहारीविमांसस्यचविक्रयी
अंगहीनःप्रकर्तव्योराज्ञश्चोत्तमसाहसं।असुवर्णस्यौषधादियोगात्सुवर्ण-स
मुत्पाद्ययः।क्रयादिव्यवहारंकरोति।योश्वादिमांसंहरिणादिमांसत्वेनप्रकाश्यवि
क्रीणातिसपणसहस्रंदंडमारोपणीयोङ्गहीनश्चकार्यइत्यर्थः॥एवमेववि
वादचिंतामणिः॥मनुः।सर्वकंटकपापिष्ठंहेमकारंतुपार्थिवः॥प्रवर्त्तमानमन्या
येछेदयेल्लवशःक्षुरैः॥कंटकःप्रकाशतस्करः॥प्रवर्त्तमानमितिनित्यप्रवर्त्तौ
लट्।तेनान्यायाभ्यासेयंदंडइत्याहुः।कात्यायनः।मञ्चमिमणीमुद्रायःकाष्ठवल्क
लवाससां॥अजातौजातिकरणेविक्रेयोष्टगुणोदमः॥लघुमूल्यकानामेतेषां
कौशलेनबहुमूल्यकरणसादृश्यंसमुत्पाद्यविक्रयीप्रकृतमूल्यादधिकंयत्

Indira Gandhi National
Centre for the Arts

२६८ सलभतेनरश्गुणां दाप्यः। रत्नाकरकारोक्तौ शाहरणां यथा मदिकल्पदिकामोरसस्त्रावेण
कल्पदिके निचर्मणि आवर्ण्णे कर्षाधानो सारनेन व्याघ्रचर्मणि निस्फाटिके लौहिसाचरणे
नपश्रणाइति। कार्पासादिके सूत्रे गुणाकर्षाधानेन पट्टसूत्रमिति। कार्णीयसे वर्णे
लकर्षाधानेन रजतमिति विल्वकाष्टचंदनामोरसंचारेणा चंदनमिति॥ वल्कले दुर्गा
त्वचंदनमिति। कार्पासके वाससि गुणाधानेन कौशेयमित्यादि। तथा समुद्रपक्षि
णांच साराभाण्डञ्च कृत्रिमं॥ आधानं विक्रयं वापि नयतो दंडकल्पना। भिन्ने पणे तु प
ञ्चाशत् पणे तु शतमुच्यते। द्विपणे द्विशतो दंडो मूल्यवृद्धौ च वृद्धिमान्॥ समुद्गः स
मपुटः॥ सारभांडं सारभूतं। पणपंमगमसादिः॥ तथा चतुष्कं समपुटं पूर्णत्वेन प्रका एम·
श्यकृत्रिमं वस्तु नास्तिकत्वेन वा प्रकाश्यमन्यस्य तौ विक्रीणानस्य वा दंडः॥ सच कीदृशि १६८
त्याह भिन्ने त्यादि भिन्ने न्यूनः॥ अर्थात् पणात् तेन पणान्यूनमूल्यवस्तुनि तथा कुर्वतः

पंचाशत्पणाः॥ पणमूल्ये तु शतं पणाः। द्विपणमूल्ये शतद्वयं। ततोधिकमूल्यारोपणेन
वक्रमेण दंडवृद्धिः। कार्य्या इत्यर्थः॥ बृहस्पतिः॥ अल्पमूल्यं तु संस्कृत्य नयंति बहुमूल्य
तां॥ स्त्रीबालकान्वंचयंति दंड्यास्तेर्थानुरूपतः। हेममुक्ताप्रवालाद्यं कुर्वंते कृत्रिमं तु
ये। क्रेत्रे मूल्यं प्रदाप्यास्ते राज्ञे च द्विगुणं दमं॥ द्विगुणां विक्रीतता दृग्द्रव्यमूल्यापेक्ष
या॥ याज्ञवल्क्यः॥ अग्नौ सुवर्णमक्षीणं द्विपलं रजते शते। अष्टौ त्रिपुणि सीसे तु ता
म्रे पंचदशायसि॥ सुवर्णमुद्रसुवर्णं अन्यादृशस्य क्षयिता शितेन सुद्ध सुवर्णेन
कं दिनमपिध्मायमाने क्षयो न भवति॥ तथा रजतपलशते पलद्वयमेव। तथा
तावति त्रपुणि सीसे च अष्टपणामेव॥ तथा तावति ताम्रे पणपंचकं। तादृशोऽ
यसि दशपणा निक्षीयंते इत्यर्थः॥ तथा च ततोधिकं क्षयं वरन वनिक दंड्य इति
भावः॥ याज्ञवल्क्यः॥ शते दशपला वृद्धिरौर्णे कार्पासिके तथा॥ मध्ये पंच पणासौ

Indira Gandhi National
Centre for the Arts

१६८ त्रेसोप्येतं त्रिपणास्मृता ॥ स्थूलसूत्रे कार्पासिके आविके वाऽत्र न पणमिति ॥ तेवपनाय
प्रयुक्ते उसे द्रपणादिकं ॥ वासो भवति मध्यविधसूत्रे पंचपणाधिकं सूक्ष्मसूत्रे त्रि
पणाधिकमित्यर्थः ॥ अथ प्रकाशतस्करदंडः । ये तु तस्कराः संधिं कृत्वाऽनेकविध
धनमपहरंति राजा अपहृतसर्वद्रव्यं स्वामिने दापयित्वा तेषां चौराणां हस्तौ
तीक्ष्णे छित्वा अक्षशूले निवेशयेत् । तदाह मनुर्व्यासः । संधिं कृत्वा तु ये चौर्यं रात्रौ कु
र्वंति तस्कराः ॥ तेषां छित्वा नृपो हस्तौ तीक्ष्णे शूले निवेशयेत् ॥ निवेशयेदित्यत्र
तानिति शेषः ॥ एवमुत्तरवचने संधिछेत्तारमिति शेषः इति बोध्यं संधिछेत्तारने
कविधं धनं प्राप्तोति वेगृहात् प्रदाप्यः स्वामिने सर्वं कृतं शूले निवेशयेत् ॥ तत हृतम्
नुअभ्यासे यथाह बृहस्पतिः ॥ संधिछिदो ह्यकृत्वा ताञ्छूलमारोपयेत्ततः ॥ पांथ १६८
चौर्यं विशेषयति सर्वं पांथमुषां चक्षे गलेवध्वावलम्बयेत् ॥ अत्र वाटचौराः
तथा

हृत्वा राष्ट्रदुर्गवनौ या इत्यर्थ इति मिश्राः । नारदकात्यायनौ ॥ स्वदेशघातिनो ये स्युस्तथा मा
र्गनिरोधकाः ॥ तेषां सर्वस्वमादाय राजा शूले निवेशयेत् ॥ अस्यायमर्थः ॥ यस्य रा
ज्ञो देशे चौरा निवसंति तत् राजन्देशं तेषां चौराणां स्वदेशः तद्घातिनः । स्वदेशघातिनः
॥ एतेन परदेशघातिनां चौराणां राज्ञा सर्वस्वग्रहणं न कर्त्तव्यमिति भावः । मनुः
॥ पुरुषाणां कुलीनानां नारीणां च विशेषतः ॥ मुख्यानां चैव रत्नानां हरणे वधमर्
हति ॥ कुलीनानां सत्कुलजातानां मुख्यानां महत्तराणां तत्र नारीपुरुषयोर्व
धे विशेषमाह बृहस्पतिः ॥ मनुष्यहारिणो राज्ञा दग्धव्याः कटाग्निना । स्त्रीहर्त्ता
लोहशयने दग्धव्यो वै कटाग्निना । कटो वीरणः ॥ तथा च कटेन वेष्टयित्वा तन्म
भवेन कटाग्निना ॥ शाह्यादृतिपूर्वप्रतीकार्थः ॥ परत्र लोहशयने इत्यधिकाभ्या
सः ॥ नरहर्त्ता हस्तपादौ छित्वा स्थाप्यश्चतुष्पथे ॥ द्वरंतु मध्यविधपुरुषापह

Indira Gandhi National
Centre for the Arts

१७० रणे। पुरुषं हरतः प्रोक्तो दंडउत्तमसाहसः॥ उत्तमधमपुरुषापहरणे। तथा व्यासः। सर्व
स्वं हरतो नारीं कन्यां तु हरतो वधः॥ उत्तमपरुषकन्यापहरणे मनुः॥ गोषु ब्राह्मण
संस्थासु तुलिकायाश्च भेदने। पशूनां हरतो चौरः सद्यः कार्योर्द्धपादिकः॥ महा
पशूनां हरणे शस्त्राणामौषधस्य च। कालमासाद्य कार्यं च राजा दंडं प्रकल्पये
त्॥ ब्राह्मणसंस्थासु वृक्षेणस्वामिकासु॥ तूलिकाया भेदनेनासाभेदनं तच्चे
ह वाहनार्थमिति रत्नाकरः। पशावश्चात्रविडालनकुलव्यतिरिक्ताः। क्षुद्रपशवः
। तयोर्विशेषश्च वक्ष्यमाणो महापशूनां हस्त्यश्वादीनां कालो युद्धादिः कार्यमारोह दम·
णादि तेन युद्धाद्यवसरेऽश्वापहरणमतिदंडाय। दंडकल्पनं च वक्ष्यमाणया १७०
याज्ञवल्क्यादिवचनात्॥ नारदः। महापशून्स्तेनयतो दंडउत्तमसाहसः॥ म
ध्यमो मध्यमपशून्पूर्वः क्षुद्रपशौ हृते॥ व्यवस्था वक्ष्यमाणयाज्ञवल्क्यादिवच

नात्॥ नारदविष्णुवाक्योक्तात् अश्वहर्ता हस्तपादौ कटिं छित्त्वा प्रमाप्यते। एतच्च विशिष्टा
श्वहरणे। सामान्याश्वहरणे विष्णुना एककरपादादिकत्वस्य प्रतिपादनात् याज्ञव
ल्क्यः। बन्दिग्राहांस्तथा वाजिकुंजराणां च हारिणः॥ प्रसह्यघातिनश्चैव शूलमा
रोपयेन्नरं॥ मनुः॥ कोष्ठागारायुधागारदेवतागारभेदिनः॥ हस्त्यश्वरथहन्तृंश्च
हन्यादेवाविचारयन्। विष्णुः। गोश्वोष्ट्रगजापहारकः एककरपादिकः। कार्यः अ
जाद्यपहारी एककरश्च कटितु रगावसन्नापकृष्टान्कौशाश्वोवागुणा वा नसम
योवानयुद्धस्य द्रुत्यतप्राप्तिलाघवं। व्यासः। पशून्हर्नुश्चार्द्धपादमतीक्ष्णशस्त्रे
णकर्त्तयेत्॥ तस्य एकपादं कुरुए कुद्दालादिना छिन्द्यादित्यर्थः। बृहस्पतिः। धान्यं
दशभ्यः कुम्भेभ्यो हरतोऽभ्यधिकं वधः॥ शेषेप्येकादशगुणं दाप्यस्तस्य च तद्धनं।
प्रमाणात्तु पुरुषस्य प्रमाणात्तु करस्य ह्रादशभिः॥ प्रसृतिभिः। कुडवो भवति च

Indira Gandhi National
Centre for the Arts

१७१ तुर्भिःकुडवैःप्रस्थोभवतिचतुर्भिःप्रस्थैराढकःचतुर्भिराढकैर्द्रोणाः।विंशत्याद्रोणैःकु
म्भइतिविवादचिंतामणौ।दशद्रोणोभवेत्खारीकुंभोपिद्रोणविंशतिः।द्रोण
श्चकोभिताक्षरायाम्।अष्टमुष्टिर्भवेत्कुंचिःकुंचयोष्टौचपुष्कलम्॥पुष्कला
निचत्वारिआढकःपरिकीर्तितः।चतुराढकोभवेद्द्रोणइत्येतन्मानलक्षणं॥
इतिस्मार्तभट्टाचार्याः॥दशाभ्यइतिरत्नाप्यधिकंधान्यमपहरन्मारणीयः।
न्यूनंत्वपहरणांतत्समंधान्यंस्वामिनितरेकादशगुणंचराजनिदंडस्तेनदाप्यइ
त्यर्थः॥अन्येनुपलंचकुडवःप्रस्थस्याढकोद्रोणएवचधान्यमानेषुबोद्धव्याक्रम
शोमीचतुर्गुणाः॥द्रोणैःषोडशभिःखारीविंशत्याकुम्भउच्यते।कुम्भैस्तुदश एम·
भिर्वाहोधान्यसंख्याःप्रकीर्तिताः।विंशत्याद्रोणैरित्यन्वयः।एतद्वाक्यानुसारेण १७१
कुंभमाहुः॥मनुः॥क्षेत्रिकस्यात्ययेदंडोभागाद्दशगुणोभवेत्।ततोर्द्धदंडोभृत्या

नामज्ञानात्कर्षकस्यतु॥शस्यभागव्यवस्थयाभृत्कर्षकस्यदोषेणशस्यनाशेस्वभा
गात्दशगुणस्तस्यदंडःअनंतरभृत्यस्यदोषेणतन्नाशेस्वभागात्पंचगुणःकर्ष
कस्यदंडइत्यर्थः॥अयंचदंडोराज्ञाग्राह्यः॥भृत्स्वामीतुतद्विनाशितंस्वग्राह्यंशस्य
भागंततोलभतेइतिद्रष्टव्यं॥मनुः॥परिभूतेषुधान्येषुशाकमूलफलेषुच॥निर
न्वयःशतंदंडःसान्वयोऽर्द्धशतंदमः॥निष्पुलाकीकृतेषुस्वल्पधान्येषुअन्यकृते
षुशाकमूलफलेषुवानिरन्वयःग्रहणेहतुपीसादिसंबंधमून्यः।शतंपणान्दं
डः।ततसंबंधवांश्चेत्पंचाशतंपणान्दंड्यः॥स्वल्पधान्यहरणोयंदंडःग
हस्थधान्यहरणेपूर्वोक्तएवदंडइत्सविरोधः।तथापुष्पेहरितधान्येचगुल्मव
ल्लीनगेषुच।अन्येष्वपरिपूतेषुदंडःस्यात्पंचकृष्णलाः॥पुष्पेकुसुम्भादौहरि
तधान्येघासमूलधान्येनगोवृक्षाः।अन्येषुएकपुरुषोद्धार्यहार्येष्वपरि

Indira Gandhi National
Centre for the Arts

१७२ पत्रेष्वपहृतकल्केषु धान्येष्विति वचनपरिनाशेनान्वयः॥ इति चंडेश्वरः। तथा तावतन्य
नेषु सपुलाकेषु खलधान्येषु गुल्मलतानां च क्षेत्रापहृते सुवर्णमाषो दंड इति मिश्रा
ः॥ काष्ठभांडाद्युपक्रम्य नारदः। तुलाधरिममेयानां गणिमानां च सर्वशः। एभिस्तु तु
ल्यमूल्यानां स्याद्द्विगुणो दमः॥ तुलाधरिमं कर्पूरादि। मेयं व्रीह्यादि गणिमं। पूगेना
प्रभृति। एभिः काष्ठादिभिः। तेन पूर्वोक्तकाष्ठाद्यपेक्षयाधिकमूल्यानां धरिममेय
गणिमानामन्यतमापहारे तन्मूल्याद्द्विगुणो दंडः। इत्यर्थः। तुलाधरिममेयानां
शतादधिकापहरणे वधः कार्यः। तदूनपंचाशदधिकसुवर्णस्य तन्मूल्यरजत
तादृशवस्त्राणां वा हरणे ताडनं तदूर्णसुवर्णस्य तन्मूल्यरजततादृशवस्त्राणां राम
।वा हरणे कर्णछेदः। कार्यः। हेमरजतस्य वा शतकर्षाधिकस्य तथा वाससो वा १७२
शताधिकस्य हर्त्तीवधः। पंचाशदधिकस्य तस्य हर्त्तीछिन्नहस्तः कार्यः। तदूर्णमस्य

स्यहर्त्तीएकादशगुणं तन्मूल्यं वा दाप्यः। इत्याह। यथा मनुः। तुलाधरिममेयानां शतादभ्य
धिकं वधः। सुवर्णरजतादीनामुत्तमानां च वाससां। पंचाशतस्त्वभ्यधिके हस्तछेदन
मिष्यते। शेषेष्वेकादशगुणं मूल्याद्दंडं प्रकल्पयेत्। शंखः। सुवर्णरजतापहारे शतादि
रंगछेदो वा यत्किंचित्स्वल्पं सुवर्णरजतमपहरणे अभ्यर्हितस्ताडनीयः। तदूनः छि
न्नकर्णः कार्य इत्यर्थः इति मिश्राः। पंचाशदूनविषयं निर्द्धनविषयमिति रत्नाकरः।
विष्णुः। रत्नापहार्युत्तमसाहसं। अपकृष्टरत्नापहारी सहस्रं पणान् दंड्यः। इति मि
श्राः अवध्यसधनविषयमिति चंडेश्वरः। उत्तमे रत्ने मनुः॥ मुख्यानां चैव रत्नानां हर
णो वधमर्हति। शंखः। अपशतं सीताद्रव्यादिहरणे यथाकालं। सीताद्रव्यं हलकु
द्दालादिकं कृषिसमये अपहरणे अष्टाधिकं शतं पणा दंड्यः। हर्तं च दाप्यः। अ
पहृते सुवर्णमाषो दंड इति मिश्राः। व्यासः। अल्पधान्यापहरणे क्षीरे तद्विकृते तथा।

Indira Gandhi National
Centre for the Arts

१७३ स्वामिनेतत्समंदाप्योदंडश्चैद्विगुणंनृपे। व्यासः। मध्यहीनद्रव्यहारीपुष्पमूलफलस्यच।
दाप्यस्तद्विगुणंदंडमथवापंचकृष्णलान्। मध्यहीनद्रव्यंलवणादि। कृष्णलशब्देनयव
मितद्रव्यमभिप्रेतमितिरत्नाकरः। मनुः। सूत्रकार्पासकिण्वानांगोमयस्यगुडस्यच
।दध्नःक्षीरस्यतक्रस्यपानीयस्यतृणस्यच॥ वेणुवैणवभांडानांलवणानांतथैवच॥
मृन्मयानांचहरणेमृदोभस्मनएवच। मत्स्यानांपक्षिणांचैवतैलस्यचघृतस्यच॥
मांसस्यमधुनश्चैवयच्चान्यत्पशुसंभवं॥ अन्येषामेवमादीनांमद्यानामोदनस्य
चाफलानांचैवसर्वेषांहरणेद्विगुणोदमः॥ इदमल्पस्यसूत्रादिहरणे। अन्यत्पशु
संभवं। अन्येषामेवचर्मादीनामादि। ग्रंथलिखितं॥ कृतुकाष्ठाश्मकौलालचर्मवेत्र राम·
भांडेषुमृत्स्नासुअगुणः त्रयोवाकार्षापणाः॥ एकचक्रापहरणेचत्वारिंशाच्छक १७३
टेऽशीतिशतं। कृतचक्रापहरणेचत्वारिंशाच्छकटेऽशीतिशतं। कृतकाष्ठंघटितकाष्ठं

कौलालंकुलालनिर्मितंमृन्मयमितियावत्। भांडमश्वादीनां। एकचक्रमेकरथांगंचत्वा
रिंशत्पणाएवअशीतिशतं अशीत्यधिकशतंदंडयेद्राजायश्चाग्निंचोरयेद्गृहात्
अग्निंश्रौतंस्मार्तंवा। इतिविवादचिंतामणिः। नारदः। काष्ठभांडतृणादीनांमृन्म
यानांतथैवच। वेणुवैणवभांडानांतथास्नाय्वस्थिचर्मणां। शाकानामार्द्रमूलानांहर
णेफलपुष्पयोः। गोरसेक्षुविकाराणांतथालवणतैलयोः॥ पक्वान्नानांकृतान्नानांम
द्यानामोदनस्यच। सर्वेषामल्पमूल्यानांमूल्यात्पंचगुणोदमः। इतिप्रचुरकाष्ठा
दिविषयं॥ स्वामिनेपिअपहृतद्रव्यसमंदाप्यः। अल्पमूल्यापहरणेक्षीरेणद्विकृतौ
तथा॥ स्वामिनेतत्समंदाप्योदंडंचद्विगुणंनृपे। इतिव्यासवचनात्। मनुः॥ यस्तु
रज्जुंघटं। कूपाद्धरेद्भिन्द्याच्चयःप्रपां॥ सदंडंप्राप्नुयान्माषंतच्चतस्मिन्समाहरेत्॥
रज्जुघटमितिसमाहारद्वन्द्वः॥ रज्जुंघटंवाकूपाद्योहरतिसकूपेतन्नियोजयेत्॥

Indira Gandhi National
Centre for the Arts

१७५ माधंचदंडंप्रणामैश्चरद्यादिति पारिजातचिंतामणौ॥ रत्नाकरे त्वेतज्जुघटमितिपठि
त्वा तत्त्वं रत्नात्मकं द्रव्यं च। तस्मिन्कूपे समाहारे चौर्ये जयेदित्याह। विष्णुः॥ अनुक्तद्रव्या
णामपहर्तीन् सत्वसमेक्ष्य। दाप्यः दत्वानुरूपं॥ साहसेषु य एवोक्तस्त्रिषु दंडो मनीषि
भिः। स एव दंडः स्तेयेषु द्रव्येषु त्रिष्वनुक्रमात्॥ त्रिषु प्रथममध्यमोत्तमेषु द्रव्येषु त्रि
षु क्षुद्रमध्यममहत्सु। एष प्रथममध्यमोत्तमोत्तमसाहसदंडातिदेशः। क्षुद्रमध्यममहत्त्व
द्रव्येषु। विहृदंडारनवहरुद्देपुद्द्रव्याः। शंखलिखितौ। अब्राह्मणो ब्राह्मणस्य स
मिधाग्न्याग्निकाष्ठतृणपुष्पफलमूलान्यपहरणावलादविज्ञाते वा हस्तच्छेदन
मामुयात्॥ ब्राह्मणोत्र न मयाग्नारिपरः। अन्ये तेषां विप्रोषस्य वस्य मात्रामात्॥ राम:
समिधादीन्यत्र यागार्थमानीतानि। अत्र विषये चहस्तिः॥ तृणं वा यदि वा काष्ठं पु १७५
ष्पं वा यदि वा फलं। अनापृच्छं तु गृह्णानो हस्तच्छेदनमर्हति॥ दूरमप्युत्कृष्टस्वामिकत्वा

विषयमिति वाचस्पतिमिश्राः। गौतमः। ब्राह्मणस्य न शारीरो दंडः। वियोगविख्यापनवि
वासनांकरणानि। अवृत्तौ प्रायश्चित्ती तु सः। कर्मवियोगः। चौरेण ब्राह्मणेन सह
तां क्रियानारंभः। विख्यापनं खलतो हरणादि चौरस्यं तस्य ख्यापनीयं। विवासनं देशा
द्बहिः करणं। अंककरणं। ललाटे चौरचिन्हकरणं। अवृत्तौ प्रायश्चित्ती सः। प्रकारांतरेणाजी
वनाक्षमो ब्राह्मणश्चौर्णपमानेन हस्तछेदनादिदंडः। किंतु हृतं वस्त्रं स चौर्यप्रायि
श्चित्तं कुर्यादित्यर्थः॥ एतानि पानिमारिप ब्राह्मणो। आपस्तंबः। पुरुषवधस्तेयभ
म्याहाने घु वध्यः। चक्षुर्निरोधश्चैतेषु ब्राह्मणस्य सेयं स्वर्णहरणं। एतेषु त्रिषु ब्राह्मणे
तरस्य वधः। ब्राह्मणस्य चक्षुरुत्पाटनं दूरमधम ब्राह्मणानां। विष्णुः। स्तेनाः सर्वत्र बा
पहृतं धनिकस्य धनं दाप्यः। ततस्तेषामभिहितदंडप्रयोगः। याज्ञवल्क्यः॥ चौरं प्रद
प्यापहृतं घातयेद्विविधैर्वधैः। सचिन्हं ब्राह्मणं कृत्वा स्वराष्ट्राद्विप्रवासयेत्। चिन्हं

Indira Gandhi National
Centre for the Arts

२७५

ललाटे भगाद्यंकनं। दूरं मध्यविध ब्राह्मणानां। ब्राह्मणाधिकारे कात्यायनः। सहोढमसद्भो
ढुंवा तस्याधिगतसाहसं। प्रगृह्य चिन्हमावेद्य सर्वस्वैर्विनियोजयेत्। अयः सन्त्वानयु
क्ताश्च मन्दभक्तवलान्विताः। कुर्युः कर्मक्षिणं पतेत्तामसत्येरितिकौशिकः। होढं लोप्त्रं
तत्वेनाधिगमितं हापितं साहसं चौर्य्ययस्य नश्यात्तं कुर्युणमसत्येरिति योजना। दूरं तु
सर्वस्वैरिति। दूरं तु वृत्तस्वाध्यायरहितधनवरब्राह्मणापरं। अयः संतानयुक्ताः। लो
हमंदभक्ताः। कर्म्ममात्रोपपत्तिकरणान्नेनकनिगडवन्धनं किंचिद भक्ष्यणजकर्म्मा
णिणजस्यामि। दूरं तु तादृशनिर्धनब्राह्मणपरं। वृहस्पतिः। वृत्तस्वाध्यायवान्
स्तेयी बंधनात् क्लिश्यते चिरं। स्वामिने तद्धनं दाप्यः प्रायश्चित्तं न कार्यते॥ इति अ राम
प्रकाशतस्करदंडः। अथ चौरान्वेषणं॥ ७ ॥ तत्र रत्नाकरधृतं नारदः। सहोढग्रहणा २७५
त्स्तेयं होढस्य तु पयोगतः। शंकासज्जनैः कार्य्योद्नायव्ययतस्तथा। सहोढाभिमर्षं

श्चोरा न गृहीतपदिशंकया। तयोपधाभिश्चित्राभिर्युक्त्या यथा हितो। देशग्रामंदिशा
नामं जातिवासः प्रतिश्रयं। कृतकार्यसहायास्त प्रष्टव्याः स्युर्निगृह्यते। वर्णस्वराका
रभेदान्त संदिग्धविनिवर्त्तनात्। अदेशकाल दृष्टत्वान्निवासस्य विशोधनात्। अ
सद्व्ययात् पूर्वचौर्य्यादसत्संसर्गकारणात्। शेषं रत्न गं तव्यान होढेनैव केवलं।
सहोढग्रहणात् सलोप्त्रग्रहणात्। होढस्य सत्सु पयोगतः। असति होढलोप्त्रोपयो
गतः अन्यथा लभ्यकर्णादुपयोगतः। स्तेयं ज्ञेयं शंकानुस्तेयस्य असज्जनैः कार्य्या
त् असज्जनैर्मद्यपानाद्यादिभिः ऐक्यार्थात्। एकप्रयोजनकत्वात् अनायव्ययत
स्तथा शंका इति प्रथमवचनार्थः। अहोढानहोढरहितानत्रयागृहीतपदिशं
कया। उपधाभिश्चित्राभिर्व्याजैर्नानाविधैरैश्वादिकं। प्रष्टव्यास्तेय यथा बुद्धि
युक्त इवचनार्थः न होढेनैव चौरा अन्वेष्टव्याः किं तु वर्णस्वराकारभेदादिभ्योऽपी

Indira Gandhi National
Centre for the Arts

१७६ तितदुत्तरवचनार्थः। विवादरत्नाकरे। याज्ञवल्क्यः। ग्राहकैर्गृह्यते चौरो लोप्त्रेणाथपदे
न वा। पूर्वकर्मापराधी च तथा चाशुद्धवासकः। अन्येपि शङ्कया ग्राह्या नामजात्या
दिनिह्नवैः। द्यूतस्त्रीपानसक्ताश्च भिन्नमुखस्वरास्तथा। परद्रव्यगृहाणां च प्र
श्नकागूढचारिणः। निराया व्ययवंतश्च विनष्टद्रव्यविक्रयाः। ग्राहकैर्गृह्यते चौ
र इति ग्राहकैः चौरोयमिति निर्दिष्टः सन् गृह्यते। ध्रियत इत्यर्थः। परेन हरणा
द्रष्टापादचिह्नानुसारेण। असद्वासकः। अपरिचितः देशावासकः। ना
मजात्यादिनिह्नवैः स्वस्य नाम्नो जात्यादिर्वापलापैः आदिपदेन ग्रामादिपरिग्रहः। राम
। निराया व्ययवंतः आयशून्याः संतो व्ययवंतः विनष्टद्रव्यविक्रयाः हृतद्रव्यकरे
श्मनतद्रव्यविक्रयकर्तारः। नारदः। गवादिषु प्रनष्टेषु द्रव्येष्वपहृतेषु चापरे १७६
नान्विषणं। कुर्युस्तमसा तु दृष्टिरोजनाः। ग्रामे व्रजे विवीते वा तत्परं निपतेत्तेन ग्रा

मादिभिस्तानहो द्रव्यं। परेकियद्दृष्टेऽन्येतथा अपरिचिते तत्सन्निहितग्रामनिपातयेत्। सन्निहितग्रा
मद्धेर्ध यत्र ग्रामे यत्तेनाश्रयादिर्जनो वर्ततेसति ग्रामे व्रजे विवीते वा यत्र तन्निपाततत्पदं
तथावो द्रव्यं। तर भवेत्तेन नायं सोन्यत्र तन्नयेत्। परे प्रमृष्टे भग्ने विषमस्वाज्जनाकीर्णे।
यस्त्वासन्नतरो ग्रामो व्रजो वा तत्र पातयेत्। यत्र ग्रामे स्तेनाश्रयादिर्जनो वसति तत्र पात
येत्। अनाकस्पनं युनस्तद्द्वादि। अन्यान्यपि बहूनि रत्नाकरधृतानि नारदमनुकात्या
यनाः। याज्ञवल्क्यवचनानि। लौकिकत्वेन नोपेक्षितानि ग्रन्थगौरवभियात्र नेह लिखि
तानि॥ ७॥ अथ स्तेनातिदेशः॥ ७॥ तत्र मनुः। यो रत्नादायिनो हस्तात्लिप्सेत ब्राह्मणो
धनं। याजनाध्यापनेनापि यथा स्तेनस्तथैव सः। तथा अग्निदान्भक्तदांश्चैव तथाश
स्त्रावकाशदान्। सन्निधातृंश्च मोषस्य हन्याच्चौरमिवेश्वरः। यो रत्नादायिनश्चौर
स्यापिशब्देन प्रतिग्रहादिपरिग्रहः। अग्निरत्र चौर्यानुकूलः भक्तं चौरभक्ष्यं शस्त्रं चौ

१७७ र्थांगं। अवकाशः चौरावस्थानं सन्निधानं नचौरचौरपितव्ययोः सन्निधापकालादूति
विवादचिंतामणिः। रत्नाकरकारस्तु सन्निधानं ग्राममोषस्य मोषकारिणीभूतद्रव्यस्य
पहारानुकूलसन्निधानकारणमित्यर्थ इत्याह। याज्ञवल्क्यः। भक्तावकाशाग्न्युदकमंत्रो
पकरणव्ययान्। दत्वा चौरस्य हंतुर्वा जानतो दंड उत्तमः। भक्तावकाशौ व्याख्याता
र्थौ। अग्निरुदकं च चौर्यापयोगि भक्तं। मंत्रः चौर्योपायोपदेशः। उपकरणं चौर्यसाधनं
खनित्रादि। व्ययोपहर्तुर्गच्छतः। पाथेयं जानतश्चौरं ज्ञात्वा एवं कुर्वतो उत्तमसाहस
दंडः हंतुरप्येवं कुर्वतो मीदृशो दंडः। नारदः। भक्तावकाशदातारस्तेनानां ये प्रसर्प
तां। शक्ताश्च य उपेक्षंते तेपि तद्दोषभागिनः। ये भक्ताद्यनंतरं। चौराय ददति ये वाधार
णक्षमा अपि चौरं समुपेक्षंते तेपि चौरवद्दंड्याः। तथाह्वायकादेशकरास्तथा चौ एम.
राश्रयकाः समदंड्याः स्मृता ह्येते सर्वे ये च प्रच्छादयंति तान्। आह्वयंति आदिशं १७७

ति स्थानेस्थापयंति चौराणां। गोपायंति वा ते सर्वे चौरसमाः चौराणामित्यनुषंगः। कात्यायनः
क्रेतारश्चैव भक्तानां प्रतिग्राहिण एव च। समदंडाः स्मृता ह्येते ये च प्रच्छादयंति ता
न्। चौरितद्रव्याणां तथा ज्ञातानां। क्रेता ग्रहीता संगोप्ता च चौरसमदंड्या इत्यर्थः। ह
न्यादिरनुषज्यते। विष्णुः। प्रसह्य तस्कराणां अवकाशभक्तप्रदः। अन्यत्र राजाऽश
क्तेः। राजा चेच्चौरनिराकरणाक्षमः। तदा चौराणामत्ययरक्षार्थं भक्तादिदानेपि न दोष
इत्यर्थः। विवादरत्नाकर विवादचिंतामणौ मनुः। राष्ट्रेषु रक्षाधिकृतान् सामंता
श्चैव देशितान्। अभ्यागतेषु मध्यस्थान् शिष्याच्चौरमिव द्रुतं। देशावेक्षकस्तादृश
एव सामंतोपि चौराणां नामवेक्षयामुदासीनो भवन् चौरवद्दंड्य इत्यर्थः। तथा न
यः सराव ग्रामघाते हिताभंगे पथि मोषाभिमर्दने। शक्तितो नाभिधावंतो निर्वास्याः
सपरिछदाः। ग्रामघाते ग्रामोपद्रवे हिताभंगे — हितस्य कृतस्य भंगे स्थोसनुक

Indira Gandhi National
Centre for the Arts

१०८ लजनरक्षणादेर्विरामे यो चौरितद्रव्यस्य चौरहस्तस्थस्य ध्वनिर्ष्टोनेवायथाशक्ति
तत्प्रतीकारमकुर्वाणोऽनियुक्तोऽपि सधनो दैन्याल्लिः साध्यः ॥ ७ ॥ अथ चौरापवारः
॥ ७ ॥ तत्र मनुः ॥ द्विजोऽध्वगः क्षीणवृत्तिर्द्वाविक्षु द्वे च मूलके । आददानः परक्षेत्रा
न्न दण्डं दातुमर्हति ॥ क्षीणवृत्तिः पाथेयशून्यः तथा वानस्पत्यं मूलफलं दार्वग्न्य
र्थं तथैव च । तृणं च गोभ्यो ग्रासार्थमस्तेयं मनुरब्रवीत् । फलानि अन्यस्य परिगृही
तानि फलानि वा गृहीतानीति गौतमवचनात् । तथा होमाग्निसंदीपनाय परि
न्धनं । तथा गोग्रासार्थं परतृणग्राह्यं । राजकृतं आपस्तम्बः । ग्रामेषु नगरेषु चा
र्यान् शुचीन् सत्यशीलान् प्रजागुप्तये निदध्यात् । तेषां पुरुषास्तथागुणा एव एम:
स्युः सर्वतो योजनं नगरं तस्करेभ्यो रक्ष्यं क्रोशो ग्रामेभ्यः ग्रामनगरयोरक्षकाः १०८
। ससहायाः साधवः कार्याः तेषु नगरात् परितोऽभ्रमो योजनमितायां नगरे च

यश्चौरैरपहृतं तद्देयं । एवं ग्रामरक्षकेण ग्रामे क्रोशमिते तत्परिसरेपीत्यर्थः । इति मि
श्राः । कात्यायनः । गृहेषु मुषितं राजा चौरग्राहांस्तु दापयेत् । आरक्षकांस्तु दिक्पाला
न्यदि चौरा न लभ्यते । गृहेष्वित्युपलक्षणं यदि चौरोऽन्विष्यमाणो न लभ्यते तदा तद
नुसन्धापकद्वारा संरक्षपतिद्वारा वा चौरितधनं राजा दापयेदित्यर्थः । आरक्षक
। कोटवाल इति प्रसिद्धः । दिक्पालो दिक्षु नियुक्तो देशपतिरिति यस्य प्रसिद्धिः ।
रत्नाकरविवादचिंतामण्योः कात्यायनः । ग्रामान्तेषु हृतं द्रव्यं ग्रामाध्यक्षं प्रदापयेत् ।
विवीते स्वामिना देयं चौरोद्धर्त्ता विवीतके । विवीतेऽप्यपि स्वामिना त्वा चौरोद्धर्त्ता
चौराश्रयी भर्तेना विवीते क्षेत्रादौ । कात्यायनः । स्वदेशे यस्य यत्किञ्चित् हृतं देयं
नृपेणातत् । गृहीयात्तत् स्वयं नष्टं प्राप्तमन्यस्य पार्थिवः । चौरैर्हृतं प्रयत्नेन स्वरूपं प्र
तिपादयेत् । तदभावे तु मूल्यं स्यादन्यथा किल्विषं नृपः । लब्धं तु चौरे यदि च मोषल

Indira Gandhi National
Centre for the Arts

१०८ स्मान्न लभ्यते। स्यात्तदर्थं वा चौरं दापयेद्यथोदितः। चौरं वा धनं चेति विकल्पः। विवादर-
त्नाकरे तु मनुः। यस्मादपहृतात्तद्रव्यं दद्यात्तत्स्वं तु स्वामिना। तच्छेषमाप्नुयात्तस्मात्
प्रत्यये स्वामिना कृते। मुषितं द्रव्यादल्पं स्वामिना यस्मात् पुरुषात्तद्रव्यं तच्छेषमपि स्वा-
मी न तदा वाप्नुयात् किं तु स्वामिना प्रोषां प्रोचौरविसते चौर्यगतद्वेन प्रापयेत्कृते सति
त्यर्थः। यश्चौरलाभिगतस्य शेषापहारे प्रमाणं। नास्ति तदा तु क्षाव्यवस्थेति द्रष्ट-
व्यं। याज्ञवल्क्यः। शौल्किकैः स्थानपालैर्वा नष्टापहृतमाहृतं। अर्वाक् संवत्सरं स्वामी
हरेत्तु परतो नृपः। शौल्किको रक्षाधिकारी स्थानपालो द्वारपतिः अनाख्यायां वाका-
रः। नष्टं अनवधानगतं अपहृतं चौरेण। तेनायमर्थः नष्टमपहृतं वा शौल्किकेनापि त- एम
द्स्वामिना समानीतं राज्ञा वर्षपर्यन्तं धारयितव्यं। तदभ्यंतरे स्वामी चेदायाति तदा १०८
सदा वा नो चेदूर्ध्वं परित्यक्ता राजस्तदा गृह्णीयादिति मिश्राः॥ चंडेश्वरस्तु शौल्किकैः स

ल्काधिकृतैः स्थानपालैः स्थानरक्षाधिकृतैर्वा नष्टमपहृतं वा द्रव्यं यदाहृतं। प्राप्तं तद्यदा
संवत्सराभ्यन्तरे स्वामी नायाति तदा राज्ञा धारयितव्यं। संवत्सरादनन्तरं। शौल्किका
दिभ्यो वक्ष्यमाणगोत्तमोक्तमंशं दत्त्वा राजा स्वयमेव गृह्णीयात्। संवत्सराभ्यन्तरे च
राज्ञो याज्ञवल्क्य एव पणानि षडादिना। भागमाह। पणानेकशफे दद्याच्चतुरः पंच-
माषके। महिषोष्ट्रगवां द्वौ द्वौ पादं पादमजाविके। एकशफे एकखुरे। अश्वादाविति
यावत्। पणान् चतुरः तस्य व्ययः। पादं चतुर्थभागं पादं। पणमिति यावत्। गौतमः। प्रण-
ष्टमस्वामिकमधिगम्य राज्ञे ब्रूयुः। विख्याप्य संवत्सरं राज्ञा रक्ष्यमूर्ध्वमधिगन्तुश्च-
तुर्थं राज्ञः शेषं चतुर्थं शेषं षड्भागं भवतीति शेषः। इति प्राह मनुः। मासमेकमिति यो ब्रू-
यात् सोनुयोज्यो यथाविधि। संवाद्य रूपसंख्यादीन् स्वामी तद्द्रव्यमर्हति॥ अवेदयं-
स्तु नष्टस्य देशं कालं च तत्त्वतः। वर्णं रूपं प्रमाणं च तत्समं दण्डमर्हति। अनुयोज्यः

Indira Gandhi National
Centre for the Arts

१९० प्रष्टव्यः रूपं मुक्तादि रूपं संख्याच तुष्कादिका। आदिग्रहणादुपकृतज्ञानादिकं। अथ
साहसं॥ ७ ॥ तत्र विवादरत्नाकरे। नारदः। मनुष्यमारणं चौर्यं परदाराभिमर्षणं
। पारुष्यमुभयाञ्चेति साहसं पंचधा स्मृतं। एतत्केषाञ्चित्साहसानुकीर्त्तनं स्वा
भिमतमाह विवादचिंतामणौ॥ सहसा क्रियते कर्म यत्किंचिद्बलदर्पितैः। त
त्साहसमिति प्रोक्तं सहो बलमिहोच्यते। अत्र च साहसे रक्षितुर्न ज्ञानवारणं। चौ
र्य्ये तु न स्य ज्ञानमावारणामिति विशेषः। तदग्रे नारदाव वक्ष्यति व्यक्तीकरिष्यति। त
था नारदः। तत्पुनस्त्रिविधं प्रोक्तं प्रथमं मध्यमं तथा। उत्तमं चेति शास्त्रेषु तस्यो
क्तं लक्षणं पृथक्। तद्धि भजते सएव फलमूलोदकादीनां क्षेत्रोपकरणस्य च। राम
भंगाक्षेपावमर्द्दाद्यैः प्रथमं साहसं स्मृतं। वासः पश्वन्नपानानां गृहोपकरणस्य १९०
च अनेनैव प्रकारेण मध्यमं साहसं स्मृतं। व्यापादो विषशस्त्राद्यैः परदारप्रधर्षणं

प्राणोपरोधि यच्चान्यदुक्तमुत्तमसाहसं। अत्रादिग्रहाद्यार्थो वक्ष्यमाणतत्तन्मूल्यं तदव
चनाद्बोद्धव्यः। क्षेत्रोपकरणं हलादि तस्यैव लेन यत् गृहोपकरणं भूषणादि। तथा
नारदः। तस्यैव भेदं स्तेयं स्याद्विशेषस्तत्र कीर्त्तितः। आधिः साहसमाक्रम्य स्तेयमाधि
च्छलेन तु॥ अत्र अनयोः रक्षितृस्माने सत्येव बलेन यदाधिः। पीडनं यत्तत्साह
सं। छलेन स्वामिनो ज्ञाने आवरणेन यदाधिः। यत् पीडनं तत्स्तेयमिति सर्थः॥
तेषु दंडमाह मनुः। हीनमध्योत्तमत्वेन त्रिविधं संप्रकीर्तितं। द्रव्यापेक्षो दण्डस्त
त्र प्रथमो मध्यमोत्तमः। क्षेत्रोपकरणं सेतुं पुष्पमूलफलानि च। विनाशयन्
हरणा दंड्यः। शतान्यनुरूपतः। विनाशितापहृतेमूल्यानुसारेण। विवादरत्ना
करे। मनुः। चर्मचार्म्मिकभांडेषु काष्ठलोष्टमयोपि च मूल्यात्पंचगुणो दंडः
पुष्पमूलफलेषु च। चार्मिकस्तु पानदादि। प्रथमचर्मपरं। पुष्पार्थमिति चंडेश्वर

Indira Gandhi National
Centre for the Arts

१८१ वाचस्पतिमिश्रौ। काष्ठमयं तंडुलादिपरिमाणपात्रं। लोष्ठमयं घटादि तेषु सहस्रावि
नाशे तेषु मूल्यस्य पंचगुणो दंडः। यस्तु पुष्पाराम्नाताच वोरंडा मनुनोक्तः। सोपि प्रशस्तपुष्पादि
परं। अल्पेनानेव विरोधः। विवादचिंतामणौ कात्यायनः। शतं भंगावमर्दे वा कुर्याद्द्रव्येषु
योनरः। प्राप्नुयात्साहसं पूर्वं द्रव्यभाक्स्वाम्युदाहृतः। क्षतं किञ्चिन्नाशः। भंगोर्द्धनाशः।
अवमर्दः। सर्वनाशः द्रव्यमिह स्फटिकादि तेन अवघातेन यथा भेदच्छेदे कुप्यादिघातने।
इत्यादि वक्ष्यमाणयाज्ञवल्क्येन न विरोधः। नापि लघुगुरूणां क्षतादीनां समानदंड
ताप्रयोजकत्वमिति रत्नाकरः। द्रव्यभाक्स्वामी स्वामिने च स्फटिकादि देयमित्यर्थः। राम
विष्णुः। गृहकुड्यादिभेत्ता मध्यमसाहसं तच्च योजयेत्। पातनभित्त्यादिभिदारको १८१
मध्यमसाहसं राज्ञा दंड्यः। स्वभग्नवधमित्यादिकं सपूर्ववत्कुर्यादित्यर्थः। याज्ञव
ल्क्यः। अवघातेन यथा भेदच्छेदे कुड्यादिघातने। पणान्दाप्यः पंचदशविंशतिं द्विषंत

घ्या। परकीयकुड्यादिघातने शिथिलीकरणे पंचदशपणाः भेदे वंधशिथिलीकरणे विंश
तिः छेदे द्विधाकरणे तथा वर्द्ध अवघातने त्रयमप्यत्रापि चत्वारिंशत्पणा दंड्याः। ईहनुकु
ड्यमात्रे संबंधि निर्भेदमात्रे पंचदशपणाद्य—दंडः विष्णुवचने च गृहसहितकुड्यादिगते
स्फोटविदारणे मध्यमसाहसमिति न विरोध इति विवादरत्नाकरः। याज्ञवल्क्यः। दुःखो
त्पादि गृहे द्रव्यं क्षिपन् प्राणहरं तथा। षोडशाद्यः पणान्दंड्यो द्वितीयो मध्यमं दमं। दुः
खोत्पादिकं कंटकादि गृहे परगृहे प्राणहरं सर्पादि षोडशपणान् आद्यः दुःखोत्पा
दिद्रव्यप्रक्षेपे दंड्यः। द्वितीयो मध्यमं साहसं दंड्य इत्यर्थः। विष्णुः। गृहपीडाकरं द्रव्यं
क्षिपन् दंड्यः पणशतं। अत्र पीडां उत्कटादि मत्वा तेन पंचपीडाद्रव्यस्य गृहे क्षेपं
कुर्वतः षोडशपणदंडस्याभिधानाद्याज्ञवल्क्यः। तत्रैव पणशतदंडाभिधानाद्विष्णु
नाविरोधो निरस्त इति रत्नाकरः। मनुः। संक्रमध्वजयष्टीनां प्रतिमानां च भेदकः। प्र

Indira Gandhi National Centre for the Arts

१८२ तिकुर्यात् स तन्न सर्वं दद्यात् संचशतानि च । संक्रमः जलोपरिगमनार्थं तिरःकाष्ठादिबंधः
। स लोके पूति प्रसिद्धः । ध्वजो देवस्य गरुडध्वजादिः । यष्टिः दृष्टादिचिन्हभूता प्रतिमा दे
वस्य प्रतिकृतिः । प्रतिकुर्यात् एवं वत्कुर्यात् । नरस्ततमस्य यो विनाशं करोति स पं
चशतानि दंड्यः । विष्णुः । अभक्ष्यस्याविक्रेयस्य विक्रयी देवप्रतिमाभेद अग्रउत्त
मसाहसं दंड्यः । शंखः । आराम प्रतिमा कूप संक्रम ध्वज सेतु निपान भंगेषु तत्
समुत्थानं । प्रतिसंस्कारोष्टशतं च निरानं । कूपादिसमीपे पशुजनपानस्थानं ।
एतेषां समानामन्यतमभंगे कृते तत्कर्त्ता अवोपात्तैः पुनः सज्जीकरणं कार्यं
अष्टशतं पणा विप्रवतस्य दंड इत्यर्थः । कात्यायनः । हरेद्दिभ— द्वापि देवानां प्रति एम:
मां यदि तद्गृहश्चैव यो विंद्यात् प्राप्नुयात् पूर्वसाहसं । अत्र प्रतिमाद्युत्कर्षापक १८२
र्षाभ्यां दंडकल्पः । परिस्थापनीयादृतिमिश्राः । हन्यादित्यनुवर्तते । विष्णुः । सेतुभेद

कृतश्चैवदंतु महासेतुविषयं । मनुः । यस्तु बद्धं निविष्टस्य तडागस्योदकं हरेत् । आग
मं वाप्यपां भिन्द्यात् निहृष्टोगं तस्य पूर्वसाहसं दंड्यः । याज्ञवल्क्यः । क्षेत्रवेश्मवनग्राम
विवीतखलदाहकाः । राजपत्न्यभिगामी च दग्धव्यास्तु कटाग्निना । क्षेत्रादीनां पञ्चानाम
न्यतमस्यापि दाहको नृपभार्याभिगामी वा वीरणाग्निना दहेत्पितव्यः । मनुः । प्रकारस्य
भेत्तारं परिखाणां च पूरकं । द्वाराणां चैव भेत्तारं क्षिप्रमेव प्रमापयेत् । नगरादर्याश्च
यस्य प्राचीरस्य परिखाया द्वारस्य वा नाशकं त्वरवाप । मोचयेत् । तथा अवध्यं य अव
ध्याति वध्यं य अप्रमुंचति । अप्राप्तव्यवहारं च स दाप्योरम उत्तमं । यो धिकृतः अवध्यं
अनपराधित्वेन निर्णीतं । वध्याति वध्यं सापराधित्वेन निर्णीतं । सजति । अपराधित्वे
न निरपराधित्वेन वा निर्णीतं यो वध्याति सजति वा स हत्वं प्रमाणान् दंड्य इत्यर्थः । वि
ष्णुः । दंड्यमुन्मोचयन् दंडात् द्विगुणं दंडमाहरेत् नियुक्तश्चान्यदंडानां दंडकावीत्वा

Indira Gandhi National
Centre for the Arts

९८३ धमः। दंडाधिकारी दंडमुन्मोचयन् अदंड्यान् दंडयन् अदंड्यान् दंडयित्वा तद्दंडात् द्विगुणं दंड्यः
।बृहस्पतिः। एकस्य बहवो यत्र प्रवहंति रुषान्विताः। मर्मप्रहारदो यस्तु घातकस्स त
दाहृतः। मर्मघातीनु यस्तेषां यथोक्तं दापयेद्दमं। आरंभकृत्सहायश्च दोषभाजस्त
दर्धतः। क्षतस्यास्य महत्त्वं च मर्मस्थानं च यत्नतः। सामर्थ्यं चानुबंधश्च ज्ञात्वा चि
न्हैः प्रवदायेत्। एकस्य मर्मघाती स्याद् बहवो यत्र प्रहारं कुर्वंति। तत्र मर्मघाति
नःमेव यथोक्तं यज्ञाता यस्य प्रहारेणोपघातकृतामधिकृत्य यो दंड उक्तस्तं दंडं दा
पयेदित्यर्थः। आरंभः कृतः सहायकारिणः अप्रत्येकं तदर्द्धरूपः। क्षतस्य सा
रिमर्मघातित्वनिर्णयार्थमिदं तथा च क्षतस्य महत्त्वेन मर्मत्वेन मर्मस्थेनवासा राम
मर्थ्येनापि भावकत्वादिरूपेण अनुबंधेन चोनः पुण्येन सर्वघाते त्वमेव सेयमि ९८३
तिरत्नाकरादयः। शंखः। मातापित्रो गुरुश्चातिक्रमेद् छेदः। अतिक्रमस्ताडनं। चे

नांगेन ताडयेत् तदंगस्य छेद इत्यर्थः। याज्ञवल्क्यः। सामान्यप्राभवद्रव्यहरणात्साहसं।
स्मृतं। तन्मूल्यात् द्विगुणो दंडो निन्हवे च चतुर्गुणः। समान्यप्राभवं नामास्वामिकं हर्तुं
वन्यस्वामिकत्वविवक्षा तेन परद्रव्यमात्रस्य साहसेवाहृतद्रव्यमूल्यात् द्विगुणः
।तत्रैवाग्रे निन्हवे चतुर्गुण इति रत्नाकरः। मनुः। हीनमध्योत्तमत्वेन त्रिविधं तत्प्र
कीर्तितं द्रव्यापेक्षारमस्तत्र प्रथमो मध्यमोत्तमः। क्षेत्रोपकरणं सेतुं पुष्पमूलफ
लानि च। विनाशायन हरणादंडः। शतादामनुरूपतः। पशुवस्त्रान्नपानानि गृहोपक
रणां तथा हिंसयन् चौरयन् राज्ञो द्विशताद्यं दमं तथा। स्त्रीपुंगोहेमरत्नानि देवविप्र
धनं तथा। कौशेयं चोत्तमं द्रव्यमेषां मूल्यसमो दमः। द्विगुणो वा कल्पनीयः। पुरुषा
पेक्षया नृपैः। हर्तारं घातनीयः स्यात् प्रसंगविनिवृत्तये। तत्साहसं अनुरूपतः। विना
शितापहृतमूल्यानुसारेण क्षेत्रोपकरणं हलादि गृहोपकरणं शिलापट्टादि शता

१८४ द्वंशतावरः। नारदः। तस्य दंडः क्रियापेक्षः प्रथमस्य शतावरः। मध्यमस्य तु शास्त्रज्ञैः दृ
ष्टः पंचशतावरः। बधः सर्वस्वहरणं पुरान्निर्वासनांकने। तदंगच्छेद इत्युक्तो दंडउ
त्तमसाहसे। तदयं संक्षेपः। अस्यापधनस्यापहरणे विनाशे वा शतावरो दंडः। उ
क्षेत्र से व्या देस्तु चौर्येण साहसेन वा विनाशने विनाशितसमं धनं चौरः साहसी
वा धनस्वामिने दाप्यः। हीनपुरुषस्तु द्विगुणं दंड्यः इत्यर्थः। अथ घातकान्वेष
णं॥ ७ ॥ तत्र याज्ञवल्क्यः॥ अविज्ञात हतस्याशु कलहं सुतबांधवाः। प्रष्टव्या
योषितश्चास्य परं पुंसि रताः पृथक्। स्त्रीद्रव्यवृत्तिकामो वा केन वायं गतः स
हा। तत्र प्रदेशसमापन्नां पृच्छेत्स्वामिजनं शनैः। तत्र प्रदेशसमापन्नं हननप्रदे रम
शसमीपगं। अत्र चतुर्थचरणे पृच्छेद्वापि शनैः शनैरिति विवादरत्नाकरे पाठः १८४
।बृहस्पतिः। हतं संदृश्यते यत्र घातकश्चात्र दृश्यते। पूर्ववैरानुसारेण ज्ञातेन ज्ञा

तव्यस्समहीभुजा। प्रतिवेशानुवेशौ च तस्य मित्राधिबांधवाः। प्रष्टव्या राजपुरुषैः समादि
भिरुपक्रमैः। विज्ञेयो साधुसंसर्गाच्चिन्हहोढेन मानवैः। होढा निगादितः एषोदितो
घातकानांत स्कराणां च भावना। गृहीतः शंकया यस्तु न तत्कार्यं प्रपद्यते। शपथे विशो
ध्यः॥ सर्ववादेष्वयं विधिः। शंकया इत्यत्र शंकयानइति पाठो रत्नाकरे दृष्टः। तत्
कार्यहननरूपं। न प्रपद्यते पृष्टः सन्नानुमन्यते विवादचिंतामणिधृतो व्यासः।
ज्ञात्वा तु घातिकं सम्यक् ससहायं सबांधवं। हन्याच्चित्रैर्वधोपायैरुद्वेगजननैर्नृ
पः। बृहस्पतिः। द्रव्यैर्विमुक्तेन मोच्यः स्यादमुक्तो वधमर्हति। निग्रहानुग्रहाद्रा
ज्ञः कीर्तिधर्माभिवर्द्धते। असाधुनिग्रहात् साधोश्चानुग्रहणाद्राज्ञः कीर्तिधर्मयो
रुपचयो भवतीत्यर्थः। रत्नाकरप्रभृतयोप्येवं। अथ स्त्रीसंग्रहणं॥ ७ ॥ तत्र व्या
सः। संग्रहस्त्रिविधो ज्ञेयः प्रथमो मध्यमस्तथा। उत्तमश्चेति शास्त्रेषु तस्योक्तं ल

Indira Gandhi National
Centre for the Arts

१८५ क्षणांपृथक्।तदेवाहसणंवा।अदेशकालेसंभाषाश्चरणंचपरस्त्रिया।अपांगप्रेक्ष
णांहास्यंपूर्वसंग्रहणंस्मृतं।सर्वमिदंत्रिविधंसयेतिबोध्यमेवं।परत्रापिबृहस्प
तिरपि अपांगप्रेक्षणंहास्यंदूतीसंप्रेषणंतथा।स्पर्शोभूषणवस्त्राणांप्र
थमःसंग्रहःस्मृतःनारदः।परस्त्रियामहाकाले अदेशेवापूरुषस्यतु।स्थानसंभा
षणंमोदाख्यःसंग्रहणाक्रमाः।नदीनांसंगमेतीर्थे आरामेषुवनेषुच।
स्त्रीपुंसौयत्समीयातांतच्चसंग्रहणंस्मृतं।दूतीसंप्रेषणैर्वापिलेखसंप्रेष
णैरपि।अन्यैर्वापिव्यभीचारैराद्यंसंग्रहणंस्मृतं।अकालदेशोव्याख्याता
थोस्थलेमेकत्रस्थितिः।आमोदःपरीहासःवनमालामारभ्यतसंग्रहणमि एम
तिसंग्रहात्तेनत्वनुरक्ततयाप्रमीयते आग्रायोयेनतत्संग्रहणं अनन्यथासि १८५
दूपरस्त्रीसंलापादितेनकर्मणावचसाचपरस्परमनुरक्ततावनुमीयते अग्रं न१

नि१ ना१

यामिदूतवत्लादेशात्तयाश्रुततयाकार्यो।अकृत्यादिनाअन्यथासंधिर्वाकृतः।संलापादिर्न
संग्रहणं एततपरमेवमनुवचनमपिभिक्षुकावन्दिनश्चैवदीक्षिताकारवस्तथा।सम्भा ना २
सैनंगहोस्त्रीभिःकुर्युरप्रतिवारिताः।इतिवंदिनस्तवकाः।दीक्षिताःयज्ञार्थकृतदि
क्षाः।कारवःशिल्पिनः।अप्रतिवारिताः।अनिषिद्धाःतथाचयेनव्यापारेणदुष्टचित्त संजातन४ ते
।स्खलितमनुमीयते।तदाद्यंसंग्रहणमितिवहुलार्थः।मध्यमेत्वाहबृहस्पतिः।प्रे
षणंगंधमाल्यानांफलमद्यान्नवाससां।संभाषणंचरहसिमध्यमंसंग्रहणंविदुः।
व्यासोपिप्रेषणंगंधमाल्यानांधूपभूषणवाससां।प्रलोभनंचानुपानैर्मध्यमः
संग्रहःस्मृतः।सम्भाषणमितिपूर्वापेक्षयातिशयितमभिमतं।गंधेत्यादिरप्य
सद्व्यापारपतयापूर्वापेक्षयाऽधिकृतमितिभावः।उत्तमेपुनराहविवादचिं
तामणौविवादरत्नाकरयोर्बृहस्पतिः।एकशय्यासनंक्रीडाचुम्बनालिंगनंतथा।

Indira Gandhi National
Centre for the Arts

ज्ञेय उत्तमसंग्रहः उपकारः क्रियाकेलिः स्पर्शो भूषणवाससां

९६ एतत्संग्रहणं प्रोक्तमुत्तमं शास्त्रवेदिभिः। निगदव्याख्यानमेतत्। व्यासः। ग्राम्या
रण्ये विविक्ते तु परस्य रमयाश्रयः। केशाकेशिग्रहश्चैव सहशय्यासनं चैव सर्वं
संग्रहणं स्मृतं॥ स्त्रियं स्पृशेददेशे यः स्पृष्टो वा मर्षयेत्तया। परस्परस्यानुमते
सर्वं संग्रहणं स्मृतं। उपकारक्रिया हिताचरणक्रिया। उपचारेति क्वचित्पाठः। त
त्र तांबूलादिप्रेषणमर्थः। केलिः नर्मसंग्रहणमुत्तम- मिति शेषः। प्रतिलोमसं
ग्रहे तु मनुः। अब्राह्मणः संग्रहणे प्राणान्तं दंडमर्हति। इदं तु उत्तमसाहसविष
यं। इदं च लिखितो। येन येनांगेनापराधं कुर्यात्तदस्य छेत्तव्यमष्टसहस्रं वा त्र दंडोन्य४ धम
६२ ब्राह्मणीं द्रुहि ब्राह्मणाः बाह्यं वात्र व्यवहितविकल्पपरः। तेन उत्तमयानी
चेन मध्यमसंग्रहे दंड गच्छेरः। प्रथमसंग्रहे त्वेष सहस्राणि स्यादर्थः। इति लक्ष्मीध ९६
रः। अरं उः शाहि रंडा नहीं ब्राह्मणादितिरत्नाकरः। त्र यातामिति मपि चैतेषां प्र



थमो मध्य उत्तमः। विनयः कल्पनीयः। स्यादधिको द्विगुणाधिकः। एषु एषु संग्रहेषु यथाक्र
उत्तम२ मो प्रथममध्यमसाहसा दंडाः। अधिकधनस्य त्वधिको दंड इत्यर्थः। एवं प्रकारानि बह
नि विवादरत्नाकरकारधृतानि कात्यायनवचनानि नातिप्रयोजनकतयात्र पूर्वहिला
भिया च न लिखितानि। ज्ञेय उत्तमसंग्रहः। चंडेश्वरोध्वतो मनुरप्याह। उपकारक्रिया
केलिः स्पर्शो भूषणवाससां। सामप्रतिमसीथां दंडाभिधीयते। तत्राह बृहस्पतिः।
मनुः। परपत्न्या तु पुरुषः संभाषां योजयन् रहः। पूर्वमाक्षारितो दोषैः प्राप्नुयात्पूर्वसाहसं।
यथा सहपूर्वयस्याभिलीयो भत्तया सहार हस्यपितृश्चितीवादाद्धिकं आलापमात्रे कु
र्वाणः। पूर्वसाहसं दंडः इत्यर्थः। मनुः। यस्त्वनाक्षारितः पूर्वमभिभाषेत कारणा
त्तान दोषं प्राप्नुयात्किंचिन्नहि तस्य व्यतिक्रमः। अनाक्षारितेति निमित्तवशात् संचिती
रहोऽधिकेप्यालापे न दोष इत्यर्थः। अनाक्षारितस्यापि निषेधे परस्त्रिया सह संलापे दोष

Indira Gandhi National
Centre for the Arts

देशाकुलैः कामक्रोधादिः प्रवर्तितं [illegible] एकपुरुष। स्त्रितस्य परस्य यार्थ पस्याचार हि [illegible]

१२० एवं साहसएव परस्त्रियं योभिवदेत्तीर्थेरण्ये गृहेपि वा। नदीनां वापि संभेदे स संग्रहण
माप्नुयात्। याज्ञवल्क्यः। स्त्रीनिषेधे शतं दद्यात् द्विशतं तु दमं पुमान्। प्रतिषेधे तयो
र्दंडो यथा संग्रहणे तथा। स्त्री चेन्निवारिता पुरुषेण संभाषमाणा पतिता शतं पणा
न्दंड्या पुरुष एव चेन्निवारितः स्त्रिया सहालपति तदा द्विशतं पणान्दंड्यः। उभा
वपि निवारितौ चेत्परस्परमालपतितदा द्विशतं प्रत्येकं। प्रथमसाहसं दंड्यावित्यर्थः।
तथा च मनुः। किंचिदेव हि दाप्यः स्यात् संभाषां ताभिरेव स्त्रां सहालपन्न किंचि
देव पूर्वोक्तान्यतरं दाप्य इत्यर्थः। रत्नाकरे यो व्येवं। मात्स्ये यत्र संचारकस्तत्र पुरुषः। राम
सतथा भवेत्। पारदारिकवद्दंड्यो यश्च स्यादवकाशदः। संचारकोभिसारयिता अव १२०
काशदोभिसारस्थानदाता। तथा च यः स्त्रियं पुरुषं वाभिसारस्थानं प्रापयति यो
वा स्त्रीपुरुषयोरभिसारस्थानदाता तावुभौ पारदारिकवद्दंड्यावित्यर्थः। अनियतभ

र्तृकयोस्तु संग्रहणे दंडो नायमित्याह मनुः। नैष चारणदारेषु विधिर्नात्मोपजीविषु।
सज्जयंति हि ते नारीर्निगूढश्चारयंति च। चारणा नटः भार्य्यापुत्राः। स्त्रि[illegible]का तनुस
निसादिस्वरणाहि ह आत्मा भार्या तेन आत्मानं भार्याजीवनार्थमुपजीवंति आत्मो /१३
पजीवी शैलूषादिः। एते हि स्वस्त्रियमप्यलंकृत्य व्यभिचारयंत[illegible]तो नैतत्संग्रहो
दंडः। यदि तु ताभिरपि निगूढः। संभाषणं कुरुते तदा दंडनेयो दाप्यः। नारदः। ना
थवत्या परगृहे संयुक्तस्य स्त्रिया सह। दृष्टं संग्रहणं तज्ज्ञैः नागतयोः स्वयं गृहे।
नाथवत्या सह तावत्संग्रहणं दृष्टं दंड्यास्तावीर्जं यदि सैव संग्रहीतुं गृहं स्वेच्छया स
मागत्य संग्राहयति तदा तत्रापि न दुष्टमित्यर्थः। आपस्तंबः। अबुद्धिपूर्वमलंकृतो यु
वा परदारानुप्रविश्य कुमारीं वा वाचा बाधते बुद्धिपूर्वं तु दंड्यः। अस्यार्थः। यद्यद्द
छाया युवा पुराज्ञानादलंकृतः। परस्त्रिया परकन्यायाश्च समीपमुपसर्पति।

Indira Gandhi National
Centre for the Arts

१८८ तदा सवर्णा वाध्यो भर्त्सनीयः। यदि तु दुष्टभावतया तथा कुरुते तदा वित्तानुसारेण दं-
डनीयः। अयथाभिगमने दण्डः। तत्र बृहस्पतिः। सहसा कारयेद्यस्तु धनं तस्याखि-
लं हरेत्। उत्कृत्य लिंगवृषणौ भ्रामयेद्गर्दभेन तु। छद्मना कारयेद्यस्तु तस्य स-
र्वहरो दमः। अंकयित्वा भगांगेन पुरान्निर्वासयेत्ततः। दमोऽतिमः। समयोत्तमे ही-
नायामर्द्धिकं स्ततः। पुंसः कार्योऽधिकार्यानुगमने संप्रमापनं। यः सहसा वले-
न परस्त्रियः सन्निष्ठं। तीमेवाभिगच्छति तस्य सर्वस्वं गृहीत्वा लिंगवृषणौ छित्वा ग-
र्दभेन भ्रामयित्वा कारयेत्। इदं तु वलछलाभ्यां समानायनीपरां। यः सहसा वले-
न परस्त्रिय सन्निष्ठंतीमेवाभिगच्छति तस्य सर्वस्वं गृहीत्वा लिंगवृषणौ छित्वा ग- राम·
र्दभेनाभ्रामयित्वा कारयेत्। इदं तु वलछलाभ्यां समायानीचायाश्च गमने बोध्यं। १८८
उत्तमायागमने तु पुंसकार्यः। इत्यादिना विशेषस्य वक्ष्यमाणत्वात्। यस्तु छद्म-

नाछलेन परस्त्रियमनिच्छंतीमभिगच्छति तस्य सर्वस्वमादाय भगांकेनांकयित्वा पुरान्नि-
र्वासनं दंडः यस्तु वलछले विहाय दूत्यादिप्रेषणद्वारा समानजातीयां परस्त्रियं गच्छति
तस्यांतिमः उत्तमसाहसो दंडः। हीनवर्णायां तु वलछले विहाय गच्छतो मध्यमसाहसो
दंडः। उत्कृष्टजातीयां तु भर्तृदूत्यादिप्रेषणद्वारा वलछलाभ्यां गच्छतो मारणमेव त-
थ्यः। विवादरत्नाकरेऽप्येवं। सन्निपातेऽभिगमने एतदपि प्रागुक्तविषयं। कात्याय-
नः। स्त्रीषु वृत्तोपयोगस्य प्रसह्य पुरुषो यदा। वधस्तत्र प्रवर्त्तेत कार्यातिक्रमणं हि त-
त्। स्त्रीषु उत्कृष्टजात्यापासु वृत्तोपयोगं जाताभिगमः। प्रसह्य हठेन इति रत्नाक-
रः। विवादचिंतामणौ याज्ञवल्क्यः। स्वजातावुत्तमो दंडश्चानुलोम्ये तु मध्यमः। प्रा-
तिलोम्ये वधः पुंसो नार्याः कर्णादिकर्त्तनं। वक्षितः स्वजातीयसकामं परस्त्रीग-
मने ब्राह्मणादीनामुत्तमो दंडः। मातृस्व— हीनां गमने तु वध एव वक्ष्यते। अथ

Indira Gandhi National
Centre for the Arts

१८९ क्षितानुलोम्यानुगमनेतुमध्यमःवक्ष्यमाणोमनुवचनात्।रक्षितानानुलोम्यागमनेतूत्
तमसाहसः।सहस्रंब्राह्मणोदाप्यः।इत्यादिवक्ष्यमाणमनुवचनात्।प्रतिलोमगम
नेवधइत्यर्थः।तेनचहस्पतिवाक्योपि।पुंसःप्रमापणंस्त्रियाःकर्णकेशच्छेदनेसह
इष्टव्यामितिमिश्राः।कर्णादिइत्यादिशब्दःकेशादिपरः।विष्णुः।पारजायीसवर्णा
गमनेतूत्तमसाहसंदंड्यः।हीनवर्णागमनेमध्यमंगोगमने – जागमनेवावधः
।उत्तमागमनेतुअ – जागमनेअस्पृश्यागमनेपारजायीपारदारिकः।मनुः।
शूद्रोगुप्तमगुप्तंवाद्वैजातंवर्णमावसन्।अगुप्तमंगसर्वस्वैर्गुप्तंसर्वेणहीयते।
वैश्यसहस्रंदंड्यःस्यात्संवत्सरनिरोधनः।सहस्रंक्षत्रियोदंड्योमौंडंमूत्रेण राम
गर्हति।ब्राह्मणींयद्यगुप्तांतुसेवेयातांमितिस्थितिः।गुप्तायांशूद्रवद्दंड्यौदग्धव्यौवा १८९
कटाग्निना।द्वैजातंवर्णद्विजातिस्त्रियंआवसन्अतिगच्छन्।अगुप्तमंगसर्वस्वैःअ

गुप्तयोमेकांगंयानशिश्नरूपेणसर्वस्वेनचहीयते आर्य्यास्त्रीगमनेलिंगोद्धारइतिवचनै
कवाक्यत्वात्।सर्वेणाङ्गेनसर्वस्वेनचसर्वस्वहरणंगुप्तांचेत्वधोधिकइतिरत्नाक
रः।कुल्लूकभट्टस्तुभर्त्रादिरक्षितामरक्षितांवाद्विजातिस्त्रियंयदिशूद्रोगच्छेत्तदा
रक्षारहितां।वागच्छेन्नलिंगसर्वस्वाभ्यांवियोजनीयाः।क्षेत्रांगपाविशेषाश्चवर्णा
आर्यास्त्र्यभिगमनेलिंगोद्धारः।सर्वस्वहरणमितिगौतमवचनात्।लिंगच्छेदः।
रक्षितांमैथुनंगच्छन्शरीरधनहीनःकार्यइत्याह।अगुप्तब्राह्मणीगमनेवै
श्यःसंवत्सरवहवासहस्रेणदंड्यः।क्षत्रियस्तुसहस्रदंडोमतेनाभिशेभिषिच्य
मुण्डनीयः।गुप्तांचेदितिरक्षितांब्राह्मणींगच्छतोवैश्यक्षत्रिययोःशूद्रवद्दंडोदाहो
वाकटाग्निना।इदानींवधप्रकारमाह बौधायनः।शूद्रंकटाग्निनादाहःद्विजः
स्त्रीगमनेइतिविशेषः।ब्राह्मणीवन्तारमित्यनुवर्त्तीयमः।शूद्रस्यघातयेद्ब्राह्म

Indira Gandhi National
Centre for the Arts

९० यनेनसमायसे। इहैतपापकृतं तत्रकांक्षंः परोक्षलेनतया। तथाचंडेश्वरधृतं मनुः। क्षत्रि
यायामगुप्तायांवैश्यापंचशतोदमः। सहस्रंत्रैशूद्रोदंड्यः संगछिशूद्रक्षत्रियोदंडमेववा। य
दिक्षत्रियः परक्षत्रियामगुप्तांसंगछेत्तदामुत्रेशतमोदंड्यः यद्वावैश्यवत्सर्वंपणान्दं
ड्यएवेतिविवादरत्नाकरः। नारदः। मातामातृष्वसाश्वश्रूर्मातुलानीपितृष्वसा। पि
खि५ तृव्यसखिशिष्यपत्नीभगिनीतत्सखीस्नुषा। दुहिताचार्यभार्याचसगोत्राशरणा दी५
गता राज्ञीप्रव्रजिताधात्रीसाध्वीवर्णोत्तमाचया। आसामन्यतमांगत्वागुरुतल्प
गउच्यते। शिश्नस्योत्कर्तनात्तत्रनान्योदंडोविधीयते। मातात्रजननीव्यतिरि
क्तापितृपत्नीसगोत्राशरणागतयोर्विशेषणं। एवंधात्रीसाचापितथेतिबोध्यं। अ एम·
तोनबालधात्रीस्वदासीचेतिप्रागुक्तेनविरोधइतिविश्वरूपः। याज्ञवल्क्यः। पि ९०
तुःस्वसारंमातुश्चमातुलानींस्नुषामपि। आचार्यपत्नींस्वसुतांगच्छंस्तुगुरुतल्पगः। छि

त्वालिंगंवधस्तस्यसकामायाःस्त्रियातथा। सकामायाइतिउक्तानांसर्वासांयथोक्तं
प्रतियोगिनंवावमयतितस्याअपिलिंगछेदनपूर्वकवधोदंडइत्यर्थः। व्यासः।
गुप्तायाःसंगहेदंडोयथोक्तःपरिकल्पितः। इच्छन्त्यमोगतयोनुगच्छतोद्विदमःस्मृतः।
यथोक्तउक्तमसाहसरूपः। एषत्वदंडः स्त्रीवादिभार्याव्यतिरिक्तासुयथानुग
मानुगन्तोविष्णुः। अदुष्टस्त्रीकदारस्यक्लीबस्याक्षमकस्यच। स्वेच्छालुपेषुवोदा
रान्तदोषोःसाहसंभवेत्। स्वेच्छानुवानुपयूषइत्यन्वयः। तेनक्लीबस्याक्षमः
स्यवासेच्छयानस्वच्छंदानतथाचात्मदुष्यसत्कृदारस्यक्लीबस्याक्षमस्यचस्वच्छ
न्दावानुपेयुषः तपछेदः तपागछतः पुरुषस्यनदंडइत्यर्थः। मनुः। सहस्रंब्रा
ह्मणोदंड्योगुप्तांविप्रांबलाद्व्रजन्। शतानिपंचदंड्यःस्यादिच्छन्त्या सहसंगतः।
मौण्ड्यंप्राणान्तिकोदंडोब्राह्मणस्यविधीयते। इतरेषांतुवर्णानांदंडःप्राणान्तिको

Indira Gandhi National
Centre for the Arts

२९१ भवेत्। वैश्यश्चेत्क्षत्रियां गुप्तां वैश्यां वा क्षत्रियो व्रजेत्। यो ब्राह्मण्यामगुप्तायां तत्समं
दण्डमर्हतः शूद्रायां क्षत्रियविशोः साहस्रो वै भवेद्दमः। बलादिति दण्डद्वयत्वन्वयो। ब्र
तोर्मौलिमः समायामिति बृहस्पतिवाक्येन सजातावुत्तमो दण्ड इति याज्ञवल्क्य
वाक्येन पारजायीसवर्णागमने उत्तमसाहसमिति॥ विष्णुवाक्येन च न विरो
ध इति विश्वरूपः मौञ्ज्याभिमितियन्नाभिगमने प्राप्नोति को दण्डं उत्कः सगुरा
वैश्यस्य स्यात्तं तन्निगुप्ता क्षत्रिया। तत्र ब्राह्मणस्य क्षीरांमुण्डनमेव दण्डः दण्डमर्हेत
शूद्रः त्रदण्डो मध्यमसाहसः वैश्यस्य निर्गुप्ता क्षत्रियागमनेऽन्यथा तत्रापि सह
स्रं दण्ड इति मिश्राः अयं च दण्डः। नगुप्तावैश्यस्यान्तर्गुप्ता क्षत्रियागमनेऽन्यथाव राम
धः। अतः पुंसः कार्याधिकायामित्यनेन प्रातिलोम्यवधः। पुंस इत्यनेन गोग—ग २९१
मने उत्तमागमने च इत्यनेन वैश्योरजन्यायं मैथुनमाचर इत्यनेन च न विरोधः इति प्रा

हुः। गुप्तामित्यस्य क्षत्रियामित्यनेनान्वयः गुप्तायागमने वधस्योक्तत्वादित्यपि केचित्।
इदानीं वधप्रकार उच्यते। बौधायनः। शूद्रं कटाग्निना दहेत् द्विजस्त्रीगमने इति विश्वे
षः। ब्राह्मणीं तदेमित्यनुवर्त्तीयमः। शूद्रं तु घातयेद्राजा ब्राह्मण्यानेत प्रसक्तायसे। दहेत्
उत्पापकृतं तत्र कटाग्निः। वर्णोत्कृष्टोत्तमथा। हारीतः। अयसः शयनशायिनं राजा वह्न्याश्व
भिः खादयेत्। काष्ठैश्चैनं दाहयेत्। अयसः उत्कृष्टवर्णस्य शापनशापिनं स्त्री
गामिनं। एतामुत्कृष्टस्त्रियं। गौतमः। श्वभिः खादयेद्राजा हीनवर्णागमे स्त्रियं श्च
त्रश्वभिः खादयेद्राजा हीनवर्णागमने स्त्रियं प्रकाशं पुमांसं घातयेत् यथोक्तमि
ति पारिजातरत्नाकरयोः पाठः। तत्र यथोक्तमिति पुंसोऽपि वा श्वभिः खादनमि
ति रत्नाकर रत्ना व्याख्यातं यथोक्तं लिंगोद्धारः सर्वस्वहरणं चेति पारिजातं व्या
ख्यानं वसिष्ठः। शूद्रश्चेद्ब्राह्मणीं गच्छेत् वीरणैर्वेष्टयित्वा शूद्रमग्नौ गछेत ब्राह्म

Indira Gandhi National Centre for the Arts

१९२ णाः शिरसिवापनंकृत्वासर्षपाभ्युक्ष्यनंखरमारोप्यमहापथमनुव्राजयेत्।एता
भवतिइतिज्ञापयेत् वैश्यश्चेद्ब्राह्मणींगच्छेल्लोहितनरपे–वेष्टयित्वावैश्यम
ग्नौप्राक्ष्येत्। ब्राह्मण्याःशिरसिवापनंकृत्वासर्षपाभ्युक्ष्यलग्नांखरमारोप्यम
हापथमनुव्राजयेत्।एताभवतीतिविज्ञायते राजन्यश्चेद्ब्राह्मणींअभिग.
च्छेत् शरपत्रैर्वेष्टयित्वाराजन्यमग्नौप्राक्ष्येत् ब्राह्मण्याःशिरसिवापनंकृत्वास
र्षपाभ्युक्ष्यलग्नांखरमारोप्यमहापथमनुव्रजेत् एताभवतीतिविज्ञायते।ए
वंवैश्योराजन्यायांमैथुनमाचरेत्।अस्य इतरराजन्यवैश्ययोः महापथोराजपथः
।यमः वृषलीमेवतेयानुब्राह्मणीमरमोहिता।तांश्वभिःखादयेद्राजासंस्थाने राम:
वध्यघातिनो।वैश्यंवाक्षत्रियंवापिब्राह्मणीमेवतंतुया।शिरसोमुंडनंतस्याः १९२
प्रयाणंगर्दभेनतु।वध्याघातिनांस्थानेवध्यानयेघातयंतिचांडाराःमः।तिवधिपि

नेरन्नुरतिचंडेश्वरः।बृहस्पतिः।गृहमागत्ययानारीप्रलोभ्यस्पर्शनादिना।काममेनत्र
साराज्ञानरस्याद्वैरमः स्तनःछिन्ननासौष्ठकर्णौतांपरिभ्राम्याप्सुमज्जयेत्।स्त्र
रयेद्दारमेयैःसंस्थानेबहुसंस्थिते।अत्रसारंज्ञायःस्त्रियंप्रालभ्यसंगच्छतःपुरुष
स्तेहंदस्तेनदंज्ञानहंडाहंपुरुषस्याछिन्नेत्यादिनातस्याराबाधिकोवैकल्पिकत
कःबहुसंस्थितेबहुभिराकीर्णेरवमेवरत्नाकरः।यमः मनुः भर्तारंलंघयेद्यानुस्त्री
ज्ञातिबलदर्पिता।तांश्वभिःखादयेद्राजासंस्थानेबहुसंस्थिते।लंघयेत्पतिमव
ज्ञायपुरुषान्तरंगच्छेत् तथाचधनभ्रात्रादिभिर्दर्पादिदर्पितायापतिमवमन्याव्य
भिचरेत्।तांराजालोकमध्येकुक्कुरैःखादयेदित्यर्थः।इत्यादिरनुक्तोविष्णुः।स्त्रि
यमसक्तभर्तृकांनरतिक्रामतिना अत्र असक्तभर्तृकांपत्याअनुपभुक्तांनरतिक्रा
मतिनीपुरुषांतरगामिनीमिलितमिदंहननंहानवर्णोपभुक्तायास्त्ववध्या

Indira Gandhi National
Centre for the Arts

१९३ यथाभवेतसमेगतांसमवर्णांपुरुषेसंगतां।धनदंडेविशेषयति।कात्यायनः।नस्वतंत्राः
स्त्रियोग्राह्याःपुमांसस्तत्रापराध्यति।प्रभुनाज्ञासनायस्माराजाचपुरुषंनयेत्।अस्व
तंत्राःसस्वामिकाःस्त्रियोनग्राह्याःनकर्षणी।याराजानुपुरुषंनयेत्।स्त्रीस्वामिनंपु
रुषंप्रतितांप्रापयेस्वामिसावैवतद्दंडोग्राह्यइतितात्पर्यं।तथाकात्यायनः।प्रो
षितस्वामिकानारीप्राविताप्रपतिगृहे।तावत्साबन्धनेस्थाप्यायावत्स्यादागतः
प्रभुः।अतिगृहेअतिसारनिमित्तगृहे।सतिराजपुरुषैर्यैरिराजगृहमानिता
।मत्स्यपुराणे।बलात्संदूषयेद्यस्तुपरभार्यांपुनःक्वचित्वधदंडोभवेत्तस्यना
पराधोभवेत्स्त्रियाः॥नापराधइतितुअनुलोम्येवोध्यं।मनुः।योकामांदूषयेत् एम:
त्ससद्योवधमर्हति।सकामांदूषयेत्तुल्योनवधंप्राप्नुयान्नरः।तुल्याभिगमात्सजा १९३
तीयइतिचंडेश्वरः।अभिलषंतीकन्यांअभिगच्छन्तत्सवर्णोवध्यः।नच्छिंतीम

पात्सर्थः।एवमेवविवादचिंतामणिः।उत्तमांभजमानस्तुजघन्योवधमर्हति।शुल्कंदद्या
त्सेवमानःसमइच्छेतपितायदि।उत्कृष्टवर्णांकन्यामिच्छंतीमनिच्छंतीमधमर्णोभि
गच्छनवध्यः।तस्मात्तत्पितुरिच्छतियंतीमभिगच्छनसवर्णःशुल्कंतत्पित्रेदाप्यः
इछ्या किंतुसवर्णत्रशुल्कंतेनैवविवाह्याइतितदाहनारदः।सकामायांतुकन्यायांसवर्णेना
स्त्यतिक्रमः।किंतुअलंकृत्यसत्कृत्यसएवैनांसमुद्वहेत्।शंखः।समांशुल्कमभिरतांहि
गुर्वात्स्त्रीधनंचदत्वाप्रतिपद्येत।समांकन्यांस्वयंवरमितांशुल्काभरणात्स्त्रीधनानि
द्विगुणानिदत्वाविवहेदित्यर्थः।मनुः।अभिसह्यतुयःकन्यांकुर्याद्दर्पेणमान
वः।तस्याशुकर्त्येअंगुल्यौदंडंचार्हतिषट्शतं।सवर्णामनिच्छंतीकन्यांअभिभवयो
नावंगुलिप्रक्षेपेनैवमैथुनवर्तीकुर्यात्तुस्यांगुलिच्छेदः।षट्शतंपणादंडंचेत्स
र्थः।सकामायांतासहसैवसकामांदूषयंस्तुल्योनांगुलिच्छेदमाप्नुयात्द्विशतंतुर

Indira Gandhi National
Centre for the Arts

१९४ मंदाप्यः प्रसंगविनिवृत्तये। सकामामिच्छंतीं दूषयन् योनावंगुलिप्रक्षेपेणारमयन् तुल्यः
सवर्णः नारदः। कन्यायाममकामायां द्व्यंगुलस्यावकर्तनं उत्तमायां वधस्त्वेवं सर्व
स्वहरणं तथा। द्व्यंगुलस्य अंगुलिद्वयस्याध्य मैथुनविषयमेतत्। येन येनांगेन
पराभुयात् तत्तदेवास्य कर्त्तयेदिति सामान्यप्राप्तावारिनिपातिज्ञातः। दृष्टो कस्या
प्यत्रैव स्वरसः। हरिहरस्तु द्व्यंगुलपरिमाणलिंगछेदः इत्याह नारदः। कन्यां भजं
तीमुत्कृष्टां न किंचिदपि दापयेत् जघन्यं सेवमानां तु संयतां वासयेद्गृहे। कन्यैव
२८ कन्यां या कुर्यात्तस्याः स्याद्द्विशतो दमः। शुल्कं च द्विगुणं दद्याच्छिफाश्चैवाप्नुया
दृशा।। भजंतीमनेन सकामामनुगम्यते। तेनानिच्छायां दंडलोपोऽस्तीति बोध्य राम
मिति कुर्यात् नखेनांगुलिप्रक्षेपेणादूषयेत्। शिफा जटाकारवज्जादिप्रहार १९४
न इत्यर्थः इति चंडेश्वरः। या तु कन्यां प्रकुर्यात्स्त्री सा सद्यो मौण्डमर्हति। अंगुल्यो

देवच्छेदं खरेणोद्वाहनं तथा। स्त्रीकन्यातिरिक्ता योषित् तथा च या पुनः स्त्री कन्यां न
द्योनावंगुलिप्रक्षेपेणादूषयेत् सा तत्क्षणादेव शिरोमुण्डनं। तदभावेंगुल्योश्छे
दनं गर्दभेन च राजमार्गगमनमर्हतीत्यर्थः। इति मिश्राः। याज्ञवल्क्यः। अलंकृतां
हरन्कन्यामुत्तमं ह्यन्यथाऽधमं। दंडं दद्यात्सवर्णासु प्रातिलोम्ये वधः स्मृतः। स
कामास्वनुलोमासु न दोषस्त्वन्यथा दमः। दूषणे तु करच्छेदः उत्तमायां वधस्त
था। अलंकृतां अन्यस्मै दातुं प्रसाधितां। उत्तमं साहसं। अलंकृतां चेत्तदा अध न५
मं प्रथमसाहसं। प्रातिलोम्ये तु उत्तमायां वधो हीनवर्णस्यान्यथेति तस्या अका
मत्वे इति मिश्राः। अलंकृतामिति कन्यामलंकृतामनिच्छंतीमभिगमनार्थं हर
णे उत्तमसाहसं स्यात्। अन्यथा हरणेऽधमसाहसं तच्च सजातीयासु प्राति
लोम्ये तु हन्तुर्वध एव सकामास्विति। इच्छंतीस्वानुलोमासु इति गमनार्थं हरणे न दोषः।

Indira Gandhi National
Centre for the Arts

१८५ समानजातीयासु कन्यासु गमनवर्ज्जं अहंकारेणांगुलिप्रक्षेपसाधनमृषभोहंतु
छेदः। उत्तमायां वधएव इतिदीपकलिकाः। अथ वंधक्यादिगमनदंडः॥ ७॥
तत्र वंधक्याधिकारे विवादरत्नाकरे यमः॥ परदारेषु वर्णेषु दंड्याः स्युः पंचकृ
ष्णलाः। असवर्णास्वानुलोम्येन दंडो द्वारप्राकोरमः। परदारेपरदारगमे॥ यत्र
त्रयंकृष्णलद्वारप्राकोद्वारमपणाः। व्यासः। वहुभिर्भुक्तपूर्वे यो गच्छेत्तुस्तांनरा
धमः। तस्यवेश्यावदिच्छंति दंडनंननुदारवत्। दारवत्कुलस्त्रीवत्। कात्याय
नः। कामातीस्वैरिणी यानुस्वयमेव प्रकामयेत्। राजाद्देशेन भोक्तव्याविख्या राम
प्यजलसन्निधौ। नारदः। स्वैरिण्यब्राह्मणीवेश्यादासीनिष्कासिनीचया। १८५
गम्याः स्युरानुलोम्येन स्त्रियोन प्रतिलोमतः। आस्वेवतु भुजिष्यासु दोषः
स्यात्परदारकः। गम्यास्वपि हि नोपेयात्यतस्ताः सपरिग्रहाः। अस्यार्थः। स्वैरि

णीस्वरसा पुंश्चलतस्याविशेषेणामब्राह्मणीतिक्षत्रियाद्येतियावत्। दासीस्वीयाकर्मकरी
निष्कामणीकुटुंविनी॥ निर्गतापुंश्चलीगम्याः स्युरिति दंडनिषेधमात्रं। ननुपापनिषेध
।भुजिष्यासु अन्येनावरुध्यभुज्यमानासु सपरिग्रहाः। परेणावरुद्धाः इति चंडेश्वरधृतपाठ
ज्ञवल्क्यः। अवरुद्धासु दासीषुभुज्यासुप्यासु तथैव च। गम्यास्वामीपुमानदाप्यः पंचाशत्
पणिकंदमं। अवरुद्धासु दासीषु अन्येनानावरुध्यधृता दास्यः। तासु गम्यास्वपि अनुलो
मजातास्वपीति चंडेश्वरः। परावरुद्धासु दासीषु भोगार्थमवरुद्धासु सतीष्विति आनु
लोम्येनगम्यास्वपि गच्छन्पंचाशत्पणितं दंडं दाप्य इति दीपकलिका। व्यासोपि
परावरुद्धागमने पंचाशत्पणिकोदमः। प्रसह्य वेश्यागमने दंडोदशपणाः स्मृतः
सेछात्यान्वाय्यमेतत्। याज्ञवल्क्यः। प्रसह्य दास्यागमने दंडो दशपणाः स्मृतः वहूनां
यद्यकामासौ चतुर्विंशतिकः पृथक्। असौ दासी यद्यकामासती नेवन्तर्य्या वहुभिर्ग

२९६ मते। तदा तेषां प्रत्येकं चतुर्विंशति पणात्मको दंडः। नारदः। पशुयोनावतिक्रामन् विनेय
सरमंशतं। मध्यमं साहसं गोषु तद्देवन्द्यो वत्सादिषु। अतिक्रामन् मैथुनं गच्छन् प
णशतं दंड्य इति विवादचिंतामणिः। लक्ष्मीधरकल्पसरमंशतमिति। विकल्पं पठति
तत्र कल्पतो न कश्चिद्विशेषः। विवादरत्नाकरे कल्परमंरशमंशतमिति पठित्वा सर
शाधिकशतपणात्मकं दंड इति व्याख्यातवान्। तन्न समीचीनतया प्रतिभाति। लक्ष्मी
धराद्यसम्मतत्वात्। पशून् गच्छन्निति तल्लिखितनारदवचनविरोधाच्च। मध्यमं
साहसमिदं। वेश्यपक्षस्त्रिययोः स्वरूपगोगमने पूर्ववधाभिधानं। मनुजोत्तमसाश्च
सत्तास्याग्रे नारदेनैव सवर्णोत्कृष्टदंडाभिधानात्। यथा सवर्णोत्कृष्टवेदंडो गोव्रज दम॰
नमनुजोत्तमः। नारदः। पशून् गच्छन् शतं दंड्यो हीनां गोश्च वमध्यमं। हीनां गोभिन्न २९६
नासादि। विष्णुः। पशुगमने पणशतं दंड्यः। मत्स्यपुराणे। तिर्यग्योनौ तु गोवर्ज्यमैथु

नं योनिषेवते। स पणान् प्राप्नुयाद्दंडं तस्याश्च यवसोदकं। पणाः शतसंख्यामिति चंडेश्वरः।
वेश्यागामी द्विजो दंड्यो वेश्याशुल्कसमं दमं। यद्वेश्याभिगमनेषु शुल्कं पंचशतपणात्म
कं तावान् वेश्याभिगामिनो ब्राह्मणस्य दंडः। एवं च प्रसह्य वेश्यागमने दंडो दशपण
न्यूनः इति तु स्फुटतरमिति निर्णीयते। नारदः। अगम्यागामिनः शास्तिर्दंडो राज्ञा
प्रकीर्तितः। प्रायश्चित्तविधानं तु पापानां स्याद्विशोधनं। चौरादिरहितस्तु हर्तुरा
ज्ञः प्रशंसामाह चंडेश्वरधृतो मनुः। यस्य स्तेनः पुरे नास्ति नान्यस्त्रीगो न दुष्टवाक्।
न साहसिकदण्डघ्नः स राजा शक्रलोकभाक्। एतेषां निग्रहो राज्ञः पंचानां विषये
स्वके। साम्राज्यकृत् सजात्येषु लोके चैव यशस्करः। दुष्टवाक्वाक्पारुष्यकृत् दं
डघ्नो दंडेन हत्वा दंडपारुष्यकृदिति यावत्। समानेषु सजातीयेषु यमः। दुष्टाः सा
हसिकाश्चंडालकितवाबाधकास्तथा। यस्य राष्ट्रेण संतीह स राजा शक्रलोकभाक्॥

Indira Gandhi National
Centre for the Arts

१९० ७॥ अथ स्त्रीपुंधर्मः॥ तत्राह बृहस्पतिः॥ ७ ॥ एतत्संग्रहणस्योक्तं विधानं संग्रहस्तथा॥
स्त्रीपुंसयोर्नु नोपायः श्रूयतां गदतो मम। तत्र मनुः। पुरुषस्य स्त्रियाश्चैव धर्मे वर्त्मनि
नितिष्ठतोः। संभोगे विप्रयोगे च धर्मान्वक्ष्यामि शाश्वतान्। अवश्यकार्यानत
थाऽस्वतन्त्राः स्त्रियः कार्याः पुरुषैः स्वैर्दिवानिशं। विषयेषु च सज्जन्त्यः संस्था
प्या ह्यात्मनो वशे। सज्जन्त्यः प्रसक्ता भवंत्यः। विवादचिंतामणौ नारदः। स्वातंत्र्या
द्धि प्रणश्यंति कुले जाता अपि स्त्रियः। अस्वातंत्र्यमतस्तासां प्रजापतिरकल्पयत्
।कुले सत्कुले। अत एवाह मनुः। पिता रक्षति कौमारे भर्त्ता रक्षति यौवने। पुत्रस्तु
स्थाविरे भावे न स्त्री स्वातंत्र्यमर्हति। याज्ञवल्क्यः। रक्षेत्कन्यां पिता विन्नां पतिः एम:
पुत्रस्तु वार्द्धके। अभावे ज्ञातयस्तेषां न स्वातंत्र्यं क्वचित्स्त्रियाः। विन्नां विवाहि १९१
तां। तेषां पुत्रादीनां स्त्रियाः स्वातंत्र्यतायां निरासमाह। मनुः। सूक्ष्मेभ्योऽपि प्रसंगेभ्यः

स्त्रियो रक्ष्याः प्रयत्नतः। द्वयोर्हि कुलयोः शोकमावहेयुररक्षिताः। इमं हि सर्ववर्णानां पश्यं
तो धर्ममुत्तमं। यतंते रक्षितुं भार्यां भर्त्तारो दुर्बला अपि। दुर्बलैरपि भर्तृभिर्भार्यार
क्षणाय यत्नं कार्यमित्यर्थः। तद्रक्षणप्रशंसामाह। स एव। स्वां प्रसूतिं च वित्तं च कु
लमात्मानमेव च। स्वधर्मं हि प्रयत्नेन जायां रक्षन् हि रक्षति। नारदः। मृते भर्त्तर्य
पुत्रायाः पतिपक्षः प्रभुः स्त्रियाः। विनियोगार्थरक्षासु भरणे च स ईश्वरः। परि
क्षीणे पतिकुले निर्मनुष्ये निराश्रये। तत्सपिंडेषु चासत्सु पितृपक्षः प्रभुः स्त्रियाः
।पक्षद्वये चावसन्ने राजा भर्त्ता स्मृतः स्त्रियाः। स तस्या रक्षणं कुर्यात् निगृह्णीयात्
पथच्युतां। मनुः। काले दाता पिता वाच्यो वाच्यश्चानुपयन् पतिः। मृते भर्त्तरि पुत्र
स्तु वाच्यो मातुररक्षिता। वाच्यो गर्हणीयः। बृहस्पतिः। अप्रयच्छन् पिता काले प
तिश्चानुपयन्नतो पुत्रश्चाभुक्तरो मातुर्धर्मदंड्यश्च धर्मतः। मनुः। शय्यासनमलंका

Indira Gandhi National
Centre for the Arts

९८ रं कामं क्रोधमनार्जवं। द्रोहभावं कुचर्य्यां च स्त्रीभ्यो मनुरकल्पयत्। नाग्निस्तृप्यति काष्ठा
नां नापगानां महोदधिः। नांतकः सर्वभूतानां न पुंसां वामलोचना। अत्र तस्यार्थ
धातुयोगे तु षष्ठी। यदि रक्षिताः स्त्रियो विमुच्यंति कथं ता रक्षणीया इत्या
कांक्षायामाह मनुः। न कश्चिद्योषितः शक्तः प्रसह्य परिरक्षितुं। एतैरुपाया
योगैश्च शक्याः स्ताः परिरक्षितुं। उपायमाह विवादरत्नाकरे। अर्थस्य संग्रहे
चैनां व्यये चैव नियोजयेत्। शौचे धर्मे च पक्त्यां च पारिणाह्यस्य चेक्षणे। अर
क्षिता गृहे रुद्धाः पुरुषैराप्तकारिभिः। आत्मानमात्मना यास्तु रक्षेयुस्ताः सुरक्षि
ताः। पारिणाह्यं कुंडलकटकादि आप्ताश्च ते कारिणश्चेति कर्मधारयः। बृह एम·
स्पतिरपि। आयव्यये च संस्कारे गृहोपस्कररक्षणे। शौचाग्निकार्य्ये संयोज्या र ९८
क्षा स्त्रीणामियं स्मृता। स्त्रीणामियं रक्षा स्मृतेत्यन्वयः। गर्भिण्या दोहददाने सं

षमाह याज्ञवल्क्यः। दोहदस्याप्रदानेन गर्भो दोषमवाप्नुयात्। वैरूप्यं मरणं चापि तस्मा
त्कार्यं प्रियं स्त्रियाः। स्त्रियो वृत्तिमभिधाय प्रोषिते दोषमाह मनुः। विधाय वृत्तिं भा
र्यायाः प्रवसेत्कार्यवान्नरः। अवृत्तिकर्षिता हि स्त्री प्रदुष्येत्स्थितिमत्यपि। प्र
जानार्थं स्त्रियः सृष्टाः संतानार्थं च मानवाः। तस्मात्साधारणो धर्मः श्रुतौ पत्न्या स
होदितः। स्थितिमती सीमादिसम्पत्तिमती। प्रजनशब्दोऽत्र गर्भग्रहणपरः।
संतानशब्दस्तु गर्भाधानपर इति विवादरत्नाकरः। भर्तृभार्ययोः परस्परं तोष
फलमाह विवादरत्नाकरे मनुः। संतुष्टो भार्यया भर्त्ता भार्या तथैव च। (संतानशब्द भर्त्रा र
स्तु गर्भाधानपर इति विवादरत्नाकरः) यस्मिन्नेव कुले नित्यं कल्याणं तत्र वै ध्रुवं
। तयोः पुनरतोषे दोषमाह स एव। यदि हि स्त्री न रोचेत पुमांसं न प्रमोदयेत्। अ
प्रमोदात्पुनः पुंसः प्रजनं न प्रवर्त्तते। स्त्रियां तु रोचमानायां सर्वं तद्रोचते कुलं

Indira Gandhi National
Centre for the Arts

१९९ स्यानवोचमानायां सर्वमेवनवोचतेऽरक्षः। अनुकूलादुष्टा रक्षासाध्वी प्रजाप
ती। एभिरेवगुणैर्युक्तः स्यादेवस्त्रीनसंशयः। तथाचव्यासः। पूर्वोत्थानपरार
क्षाजयास्यासनशायिनी अवाद्यदुष्टानुकूलास्त्रीभवेद्गुणपकर्मणाः। मनुः
।संवत्सरमुदीक्षेतद्विषन्तीं योषितं पतिः। ऊर्द्ध्वं संवत्सरादेनां रयां। नसंव
सेत्। साधव्यास्सा गेरगदा या व्यभिचारादृतेस्त्रियाः। स्त्रीधनद्रव्यस
र्वस्वां गर्भस्त्रीभ्रंशिनी तथा। भर्तुश्चवधमिच्छंतीस्त्रियंनिर्वासयेद्गृही। एगः
पापं स्त्रीधनहेनभ्रष्टं सर्वस्वं यस्य विग्रहः। कस्यनहृकारस्त्रीधनहेनभ्रष्टं
भ्रंशितं सर्वस्वं यया। सातथा प्रपद्यमिति॥ अंतर्भृतण्यर्थकमिति वर्णयन्ति। तथा रामः
अनर्थजननीनित्यं तथैवाप्रियवादिनीं। पूर्वाशिनीच याभर्तुस्तां स्त्रीं निर्वास १९९
येद्गृहात्। व- स्त्रीजननीनित्यं। प्रतिकूलांचसर्वदा। मतोनाभिनंदेतकुर्वन्नेवस

दोषभाक्कुर्वन्तितास्यभिनंदनमित्यादि। मनुः। क्रतुस्नानानुयानारीभर्त्तारंनोप
गच्छति। तांग्राममध्येविख्याप्यभ्रूणघ्नीं चविवासयेत्। मनुः। स्वच्छंदगाचयाना
रीतस्यास्त्यागोविधीयते॥ नचैवंस्त्रीवधंकुर्यातनचैवांगविकर्त्तनं। स्वच्छंदव्य
भिचारिण्यांविवस्वांस्त्यागमब्रवीत्। नवधंनचवैरूप्यं। वध्यांस्त्रीणां विवर्द्धयेत्
नवधंनचवैरूप्यं इतिअब्रवीदित्यन्वयः। पृथिवीप्रतिलक्ष्मीवाक्यं। विष्णुः।
नारीषुनित्यंसुचिरंस्थितास्मिप्रियवादिषु। असुक्तहस्तासुप्रजान्वितासुसुगु
प्तभाण्डासुवलिप्रियासु। सुसंस्थवेश्मासुजितेन्द्रियासुकलिव्यपेतासुवि
लोलपासु। धर्मव्यपेक्षासुदयान्वितासुस्थितासदाहंजगतां विधात्री। वलिः
पूजोपहारः विलोलुपालोभग्रस्ताजगतां विधात्रीति पृथिव्याः संबोधनं। अंखलि
खितौ। स्त्रीणामनुज्ञावहिर्निःक्रामेत्। नानुत्तरीयपरिधापयेत् नचेतसवेगधमाप

Indira Gandhi National
Centre for the Arts

२०० स्यातरत्नानि विहृतानि वासांसि विभृयात्। न परपुरुषमभिभाषेत अन्यत्र वालकप्र
व्रजितवृद्धेभ्यः। न नाभिं दर्शयेत्। कुलवधु वा गुल्फाभ्यां वासः परिदध्यात् न स्त
नौ विवृतौ कुर्यात् न हसेत् अनावृता। अनावृते मुखमाच्छाद्य मनुः। वा न यावा
युवत्यो वा वृद्धया वापि योषिता। न स्वातंत्र्येण कर्त्तव्यं किंचित्कार्यं गृहेष्वपि
। वाल्ये पितुर्वशे तिष्ठेत् पाणिग्राहस्य यौवने। पुत्राणां भर्त्तरि प्रेते न भजेत्
स्त्री स्वतंत्रतां। पित्रा भर्त्रा सुतैर्वापि नेच्छेद्विरहमात्मनः। एषां हि विरहेण
स्त्री गर्ह्ये कुर्यात् उभे कुले। याज्ञवल्क्यः। संयतोपस्करा दक्षा हृष्टा व्ययविवर्जि
ता। कुर्यात् श्वशुरयोः पादवंदनं भर्तृतत्परा। स्त्रीधर्माधिकारे विष्णुः। भर्त्तुः राम
समानचारित्वं श्वशुरगुरुदेवतातिथीनां। पूजनं सुसंस्कृतोपस्करता अगु २००
प्तता मंगलाचारतत्परता भर्त्तरि प्रोषिते अप्रतिकर्मक्रिया परगृहेष्वनभिगम

नं द्वारदेशगवाक्षेष्वनवस्थानं सर्वकर्मास्वतंत्रता। वाल्ययौवनवृद्धेषु पितृभर्तृपुत्रपरा
धीनता। न भर्तुरग्रेनाश्नीयादित्यन्वयः। अन्यत्र प्रतिकारौषधात्। रोगप्रतिकारौषधा
त्। रोगप्रतिकारकारणमौषधास्तु भर्तुरग्रेप्यश्नीयादित्यर्थः। मनुः। पानं दुर्जनसंस
र्गः पत्या च विरहोटनं। स्वप्नोन्यगृहे वासो नारीणां दूषणानि षट्॥ सर्वाण्येतानि दू
षणोपपिकानि विवक्षितानि। स्वप्नो दिवास्वप्नः। पराणोपनदिवास्वप्नमक्रियादूषणं
त्रियामिति वृहस्पतिवचनैकवाक्यत्वात्। अक्रियमाह गृहक्रियानाचरणं॥ अ
थमृतभर्तृकाधर्मा उच्यंते। तत्राह नारदः। मृते भर्त्तरि या नारी समारोहेद्धुताशनं
। साहंधती समाचारा स्वर्गलोके महीयते। तिस्रः कोट्यर्द्धकोटी च यानि रोमाणि
मानवे। तावन्त्यब्दानि सा स्वर्गे भर्त्तारं यानुगच्छति। व्यालग्राही यथा व्यालं बलादुद्धु
रते विलात्। तद्वद्भर्त्तारमादाय तेनैव सह मोदते। क्रीडते पतिना सार्द्धं यावदिंद्रा

Indira Gandhi National
Centre for the Arts

२०१ अनुद्दिश्य। ब्रह्महा वा कृतघ्नो वा मित्रघ्नो वापि मानवः। तं वै पुनाति सा नारी इत्यंगिर
सभाषितं। साध्वी नामेव नारीणामग्निप्रपतनादृते। नान्यो धर्मोस्ति विज्ञेयो मृते
भर्त्तरि कर्हिचित्॥ यावन्नाग्नौ दहेद्देहं मृते पत्यौ पतिव्रता। तावन्न मुच्यते नारी
स्त्रीशरीरात्कथंचन। विष्णुः। मृते भर्त्तरि ब्रह्मचर्यं तदन्वारोहणं वा। बृहस्पतिः
। व्रतोपवासनियता ब्रह्मचर्ये व्यवस्थिता। दमदानरता नित्यमपुत्रापि दिवं व्र
जेत्। मनुः। कामन्तु क्षपयेद्देहं पुष्पमूलफलैः शुभैः। न तु नामापि गृह्णीयात्
मृते पत्यौ परस्य तु। आसीतामरणात्क्षान्ता नियता ब्र—चारिणी। यो वि—ए
कपत्नीनां कांक्षन्ती तमनुत्तमं। अथ द्यूतसमाह्वयः। तत्राह मनुः॥ अप्राणिभि एम:
र्यत्क्रियते तल्लोके द्यूतमुच्यते। प्राणिभिः क्रियते यस्तु स विज्ञेयः समाह्वयः। २०१
अप्राणिभिः पाशकाद्यैः समाह्वयनक्षत्रं व्यक्तमाह बृहस्पतिः। अन्योन्यं परिगृही

ताः। पक्षिमेषवृषादयः। प्रहरन्ति कृतपणास्तं वदन्ति समाह्वयं। मनुः। प्रकाशमेतत्तास्क
र्यं यद्देवनसमाह्वयौ। तयोर्नित्यं प्रतीघाते नृपतिर्यत्नवान् भवेत्। द्यूतं समाह्वय
सं—व यः कुर्याद्यश्च कारयेत्। तान् सर्वान् घातयेद्राजा शूद्रांश्च द्विजलिंगि
नः। द्यूतसमाह्वयौ यः कुर्यात् यो वा सभिकः कारयेत्। तेषामपराधोपि क्षया
राज्ञा नस्तेनाधिकं कुर्यादित्यर्थः। द्यूतमेतत्पुराकल्पे दृष्टं वैरकरं महत्। त
स्माद्द्यूतं न सेवेत हास्यार्थमपि बुद्धिमान्। प्रच्छन्नं वा प्रकाशं वा तन्निषेवेत यो
नरः। तस्य दण्डविकल्पः स्याद्यथेष्टं नृपतेस्तथा। दण्डविकल्पो दण्डप्रकारः। यथे
ष्टं नृपतेर्विद्यानुसारेण। बृहस्पतिः। द्यूतं निषिद्धं मनुना सत्यशौचधनापहं।
तत्प्रवर्त्तितमन्यैश्च राजभागसमन्वितः। सभिकाधिष्ठितं कार्यं तस्करज्ञाप
कं हितं तत्। एवमेव विधिर्ज्ञेयः प्राणिद्यूतसमाह्वयः। अस्यायमर्थः। द्यूतं तावन्म

Indira Gandhi National
Centre for the Arts

२०२ नुनानिषिद्धंद्यूतंयेनतस्करनिरूपणार्थंतद्विहितंतदपिसभिकंसराजपुरुषमित्य
र्थः।याज्ञवल्क्यः॥द्यूतमेकमुखंकार्यंतस्करज्ञानकारणात्॥एषएवविधिर्ज्ञेयः
प्राणिद्यूतसमाह्वयः॥एकमुखंएकराजाध्यक्षप्रधानपुरुषरूपसभिकाधिष्ठि
तंकार्यमित्यर्थः।अस्यैवप्राणिद्यूतसमाह्वयेएववचनेनातिदेशः॥बृहस्प
तिः॥द्वन्द्वयुद्धेनयःकश्चिदवसादमवाप्नुयात्।तत्स्वामिनापणोदेयोयत्तस्य
मनिरूपितः।द्वंद्वयुद्धमत्रमेषादिद्वंद्वयुद्धं।अवसादंपराजयं॥नारदः॥अ
निर्दिष्टस्ययोराज्ञाद्यूतंकुर्वीतमानवः।नसततप्राप्नुयात्कामंविनयंचैव
सोऽर्हति।परिहासकृतंयच्चयच्चाप्यविदितंनृपे।नसतंप्राप्नुयात्कामंमथ एम·
वानसतनस्तयोः।अथवेतिसमुच्चये।बृहस्पतिः।गूढाःप्रकाशाःकर्तव्योनिर्वा २०२
स्याःकूटसाक्षिणः।गूढोद्यूतपराःसहस्याङ्काःकर्तव्याः।तथासभिकोग्राहक

स्तस्पदघाज्ज्ञेत्रेनृपायच।याज्ञवल्क्यः।प्राप्तेनृपतिभागेतुप्रसिद्धेद्यूतमंडले।जितंसस
भिकेस्थानेदापयेदन्यथानतु।बृहस्पतिः।कूटाक्षदेविनःपापाराजभागहराश्चये।
गणान्वंचकश्चैवदंड्यास्तेकितवास्मृताः।विष्णुः॥द्यूतेकूटाक्षदेविनांकरच्छेदः
॥उपधिदेविनांसंदंशच्छेदः।विवासमानिकूटाक्षदेविनामपराधनाय्यो।उ
पधिश्छद्मासंदंशांगुष्ठतर्जन्यौ।कात्यायनः।राज्ञाप्रवर्तितान्धर्मान्योनरोना
नुपालयेत्।गर्ह्यःसपापोदंड्यश्चलोपयन्राजशासनं॥ ७ ॥अथप्रकीर्णकमु
च्यते॥ ॥तत्रतत्स्वरूपमाहकात्यायनः॥पूर्वोक्तादुक्तशेषंतुयत्तत्प्रकी
र्णकमुच्यते॥तत्रादौनिधिः॥मनुः॥ममायमितियोब्रूयान्निधिंसत्येनहेतुना
॥तस्याददीतषड्भागंराजाद्वादशमेवच॥निधिरत्रपूर्वनिखाततिरनष्ट
धनं॥षड्भागद्वादशभागयोर्ममायमितिब्रुवतोर्गुणावत्ताभ्यांविकल्पःस्वनिधा

Indira Gandhi National
Centre for the Arts

२०३ नाद्यात्ताद्दादशार्द्धिदोनं। ब्राह्मणधनवर्जं स्वनिहिताद्राजब्राह्मणधनवर्जं द्वादशमंशं
दद्युरिति विज्ञानेश्वरात्। स्वनिधानं प्राप्तमपि राज्ञि निवेद्यग्राह्योऽस्य यमप्यर्थं तथा
नष्टं लब्धं कैरा राज्ञि निवेदयेत्। गृह्णीयात्ततः षड्भागं षड्भागः स्यादन्तेऽन्यथा इति नार
दीयात्। षड्भागस्तेषां कथा भवेदित्यर्थः॥ अथ परनिहितः॥ ७॥ अज्ञायमानं
वित्तं योऽधिगच्छेद्राजा तस्मै अष्टमांशं प्रदाय ब्राह्मणश्चेदधिगच्छेत् षट्स्वक
र्मेऽधिगच्छेद्राजानं। हरेदिसाह वशिष्ठः। अप्रज्ञायमानं वित्तं योऽधिगच्छेद्रा
जा तस्मै अष्टमांशं दत्त्वा तदितवरं गृह्णीयात् षट्कर्मयुक्तो ब्राह्मणश्चेदधि एम·
गच्छेद्राजा न हरेदिसाह षट्स्वकर्मसु वर्तमानो न राजा हरेत्। अप्रज्ञायमानं
अज्ञातमान स्वामिकमस्वामिकं अषट्कर्मातिरिक्त ब्राह्मणस्य विशेषमा २०३
ह गौतमः। निध्यधिगमने राजा धनं ब्राह्मणस्याभिरूपस्य अब्राह्मणा आख्याता

षष्ठमांशं लभते इत्येके। अभिरूपस्य षट्कर्मनिरतस्य ब्राह्मणस्याभिरूपब्राह्म
णादन्यः आख्याता कथयिता ब्राह्मणस्याप्यनिवेदने दोषमाह ब्राह्मणोपि
निधिं लब्ध्वा क्षिप्रं राज्ञे निवेदयेत् तेन दत्तं तु भु— तस्तेनः स्यादनिवेदने। राजा
निधिं लब्ध्वा द्विजेभ्योऽर्द्धं दद्यात्। यथा याज्ञवल्क्यः॥ राजा लब्ध्वा निधिं दद्या
त् द्विजेभ्योऽर्द्धं द्विजः पुनः। विद्वानशेषमादद्यात् स सर्वस्य प्रभुर्यतः इतरेण निधौ लब्धे
कृते षष्ठांशमाहरेत् राजा निधिस्वामिकं चिरनिहितं लब्ध्वा ब्राह्मणेभ्योऽर्द्धं भागं द
द्यात् विद्वांस्तु ब्राह्मणः सर्वमेव गृह्णीयात्। न राज्ञे भागं दद्यात्। हेतुमाह सर्व
स्य धनजातस्य प्रभुः। तथा च मनुः। सर्वं स्वं ब्राह्मणस्येदं इति परनिहितमप्य
नत। यथा नारदः। परेणानिहितं दृष्ट्वा राजन्युपहरेन्निधिं। राजगामी निधिः
सर्वः सर्वेषां ब्राह्मणादृते। इति दीपकलिका। इतरेण विदुषा। मनुरपि। यस्तु

Indira Gandhi National
Centre for the Arts

२०५ पश्चेप्तिधिं राजा पुराणं निहितं क्षितौ। तस्माद्विजेभ्यो दत्वार्द्धमर्द्धं कोशे निवेशयेत्। क्षत्रि
यादीनां विशेषमाह। मनुः ॥ क्षत्रियश्च चतुर्थमंशं राज्ञे दद्याच्चतुर्थमंशं ब्राह्म
णेभ्यो दत्वार्द्धमाददीत। वैश्यस्तु चतुर्थमंशं राज्ञे दद्यात्। ब्राह्मधाविभज्य पं
चांशं राज्ञे दद्यात्। ब्राह्मणेभ्यो शूद्रय मेवाददीत। निवेदि चावि— तमन्तस्मा
वैश्यमाददीत। मनुर्विशेष यतिसहव शूद्रश्चाबाशांद्वादशधा विभज्य पंचा
शानां मेध्य दद्यात्। ब्राह्मणेभ्यो शूद्रय मे वाददीत। ब्राह्मणेभ्यः शूद्रस्तत्रापि पञ्चां
शानि स्वयम्। मनुः। निधानानां पुराणानां धातूनामाकरस्य च। रक्षणाद
र्द्धभाग्राजा भूमेरधिपतिर्हि सः। पुराणानां चिरंतनानां ननु विद्यविद्यमान सम
स्वामिकानां आकरमाणिक्यादिभूमयः। तत्रोत्पन्नद्रव्यमप्युप्लुत २०४
वा। ततश्चधातूनाकरयोरन्योन्यपारितद्रव्यस्यार्द्धं राजा गृह्णीयात्॥ ७ ॥

अथ प्रकीर्णं ॥ तत्र याज्ञवल्क्यः। प्ररोहिशाखिनां शाखास्कंधसर्वविदारणे। उपजी-
व्यद्रुमाणां तु विंशतेर्द्विगुणो दमः। चैत्यश्मशानसीमासु अन्यस्थाने सुरालये।
जातद्रुमाणां द्विगुणो दमो वृक्षे च विश्रुते। गुल्मगुच्छक्षुपलताप्रतानौषधिवी
रुधां। पूर्वस्मृतादर्धदंडः स्थानेषु च प्रकर्तने। प्ररोहिणोशाखिनो यस्य शाखा
अपि प्ररोहंति वटादयः। स्कंधो मातामागात् शाखोत्तरयते। सर्वदारणं मूल
छेदनं उपजीव्यद्रुमा येषां छायादि उपजीव्यते। आ— पिप्पलादं उद्दस्थः चैत्य
मायतने विश्रुते पलाशादौ गुल्मा अनतिदीर्घाः नताः मालसादयः। गुच्छाश्च व
धीरूपाः अल्पवनाः प्रकांडेच कुरुंटादयः। क्षुपाद्र स्वशाखोत्क्षिप्ताः। शाकोटार
यः। लता दीर्घाः प्रतत्ताकांडवी हवतिताः। सवल्लः सारिवाप्रभृतयः। उषध्यः फल
पाकांताः कदल्यादयः। विरूढाश्छिन्ना अपि या विविधं प्ररोहति गुडूच्यादयः। ए

Indira Gandhi National
Centre for the Arts

२०५ वैस्यतारद्वैः विंशतिवृद्धैः दशपणात्मको दंडः। स्थानेषु त्रेषु प्राग्वास्कन्दमन्त्रेषु दंड्या
उत्तमपक्रमाः। विष्णुः। फलोपभोगद्रुमच्छेदी तूत्तमसाहसं पुष्पोपभोगद्रुमच्छेदी म
ध्यमं वल्लीगुल्मलताच्छेदी कार्षापणशतं तृणच्छेद्यकं सर्वत स्वामिनां तदुत्प
त्तिं। एकं कार्षापणं कार्षापणाः पणाः कार्षापणाः कार्षिकः स्यात् कार्षिकस्ता
म्रिके पणाः। इति विवादरत्नाकरधृतवचनात्। अत्र कार्षापणाः पणा इति अग्र मा
ढ्या चास्तु कर्षस्येति रत्नाकरः। तदुत्पत्तिर्यदिति शेषः। वसिष्ठः। फलपुष्पोपगा
न्वृक्षान्न हिंस्यात् कर्षपणार्थं वोपहन्यात्। गार्हस्थ्ये पंके च कर्षपणार्थं क
षिहेतुच्छन्नाद्यर्थं वा प्राहुः सम्भवासंभवं निमित्त कल्पितकल्पपरः। गार्हस्थ्यांगो रम
चेतिरहस्यक्रमे दृष्टमद्युं वा येन परोपकरणां यज्ञोपकरणां च सिद्धानि २०५
नक्षिन्निसर्थः। विष्णुः। अरेशापणा — — ग्रो द्वशसमा द्यात् पणार् शापणापा च

विंशतितमं। हवदेशोत्क्रोशान्यविक्रीते यावन्नवृद्धिः प्राप्तास्यादशमं भागतापरदे
शोत्क्रोशास्वदेशोविक्रीते यावती वृद्धिः प्राप्तास्याद्विंशतितमं भागं राजा गृह्णी
यादिति वाक्ययोरर्थः। गौतमः विंशतिभागः शुल्कः पण्यपुष्पौषधानां स
मधुमांसधनानां नुषः स्थलादीनां समानामपि परदेशात्क्रीतानां यस्वदे
शविक्रीतानां वृद्धिः षष्ठांशोराजग्राह्य इत्यर्थः। शुल्कापि मालकं श्लोकमुदा
हरन्ति न भिन्नकार्षापणमस्ति शुल्कं न शिल्पवृत्तौ न शिशौ न दूते। न भैक्ष
लब्धे न कृतावशेषे न श्रोत्रिये प्रव्रजिते न यज्ञे अस्यार्थः। भिन्नोन्यूनः का
र्षापणः। पण्योमूल्यं यस्य तद्भिन्नकार्षापणं पण्यं तेन कार्षापणा द्वी
क यस्य मूल्यं तत्र वस्तुनि शुल्कं न ग्राह्यः न शिल्पवृत्तौ न शिल्पिना शिल्प
सात्प्राप्ते न शिशौ विक्रयणगवादि वनस्पारेयुते दोतेन प्राप्ते कृतावशेषेवा

Indira Gandhi National
Centre for the Arts

२०६ दत्तां वशिष्ठवनिजः शेषपत्ये स्त्री त्रिये प्रव्रजिते स्त्री त्रियेतौ विक्रेतरि यस्तेयस्तार्थमानी
यमाने द्रव्ये युराजग्राह्ये नास्तीति। विष्णुः। पितापुत्रविरोधे तु साक्षिणां दशपणो दं
डः। यस्तयोः सान्तरः। तस्योत्तमसाहसं सांतरस्तयोर्मध्यगो भूत्वा विवोधिमुपेदेयं
ता। याज्ञवल्क्यः॥ पितापुत्रविरोधे तु साक्षिणां त्रिपणो दमः। अंतरे तु तयोर्यस्य
तस्याप्यष्टशतो दमः॥ अष्टशतः अष्टशतानि यस्मिन् सोऽष्टशतो दमः। अत्र विज्ञ
तः याज्ञवल्क्य तयोर्विरोधो पि पितुरुत्कृष्टगुणाभ्यां परिहरणीयः। एवमेव र
त्नाकरः। मिताक्षराकारस्तु याज्ञवल्क्यवचने चतुर्थचरणे तस्याप्यष्टगुणो दम
इति पठित्वा पितापुत्रयोः कलहे यः। साक्ष्यमंगीकरोति न पुनः कलहं वारयति। दम:
तस्य परादूर्ध्वं दण्डपुत्रापराधेन पिता श्ववानमुनिर्दण्डभाक्॥ दंडद्रव्यानुवृत्तौ २०६
विष्णुः॥ ७ ॥ अभक्ष्येण ब्राह्मणं दूषयित्वा षोडश सुवर्णान् जात्यपहारिणा तस्य

रया ब्राह्मणं दूषयित्वा वध्यः। क्षत्रियं दूषयितुस्तदर्द्धं वैश्यं दूषयितुस्तदर्द्धं शूद्रं दूषयि
तुः। प्रथमसाहसं अभक्ष्यं निष्ठाद्दिजात्यपहारिस्तराभिन्नं लशुनादि सुरा प्रसिद्धैव
तदर्द्धं तदर्थोमित्यन यो व्यवहितस्तत्परार्थः शूद्रस्याभक्ष्यं कपिलादुग्धादि ऊ
दमुत्कृष्टब्राह्मणादिविषयं। याज्ञवल्क्यः॥ द्विजं प्रदुष्याभक्ष्येण दंडउत्तमसाह
सः। क्षत्रियं मध्यमो वैश्यः प्रथमः शूद्रमार्द्धकं। शूद्रस्याभक्ष्यं कपिलादुग्धादि अ
र्द्धिकं पणानां मयादण्डं तं दूरमनुत्कृष्टब्राह्मणादिपरः। मनुः। अभक्ष्यमथवादे
यं वैश्यादिग्राहये द्विजान्। जघन्यमध्यमोत्कृष्टान् दंडनीहु यथाक्रमं। पणाः श
द्रैभवेद्दंडप्रतुः पंचाशदेव तु। इदमल्पधनशूद्रविषयं। अन्यत्र याज्ञवल्क्यवला
त्तेयं। विष्णुः। जातिभ्रंशकरस्याभक्ष्यस्य भक्षयित्वा विवास्यः स्वयं स्वस्तादितो
क्ता ब्राह्मणो देशाद्द। ए। कार्य इत्यर्थः। शद्रमुपक्रम्य नारदः। धर्मोपदेशं दर्पेणा

Indira Gandhi National
Centre for the Arts

२०७ द्विजानामस्यकुर्वतः। ...मासेचयेतेलेवक्ते श्रोत्रेचपार्थिवः। अस्यशूद्रस्यगोत्तमः।
अथास्यवेदमुपशृण्वतः त्रपुजतुभ्यां श्रोत्रपूरणम् उदाहरणे जिह्वाछेदः धारणे
शरीरछेदः अन्यशूद्रस्यधारणे तस्यावजनिकयोस्तानूनौविवादरत्नाकरविवा
दचिंतामण्योर्याज्ञवल्क्यः। विप्रत्वेनतुशूद्रस्यजीवतोष्टशतोदमः। विप्रत्वेनवि
प्रलिंगधारणेनजावतोजीविकांकुर्वतः मनुः। योलोभादधमोजात्याजीवेदुत्कृष्ट
जन्मभिः। तंराजानिर्धनंकृत्वाक्षिप्रमेवप्रवासयेत्। यत्तुशूद्रादिःक्षुद्रादिचर्य
याजीवतितस्यसर्वस्वहरणंविवासनेदमइत्यर्थः। मनुः। ब्राह्मणानबाधमानं
तुकामादवरवर्णजं। हन्याच्चित्रैर्वधोपायैरुद्वेगजननैर्नृपः। बाधमानमतिपी दम·
डनं। अवरवर्णजंशूद्रं चित्रैर्विचित्रैः शूलाग्रनिवेशनादिभिरितियावत्। चंडे २०७
श्वरधृतःकात्यायनः। प्रव्रज्यावसितंशूद्रंजपहोमपरंतथा। वधेनशासनंपापं रा

ज्यो

प्योवाद्विगुणोदमः। प्रव्रज्यासंन्यासः नचशूद्रस्यतिभ्यांशूद्रस्यप्रव्रज्यायाअविधाना
त्तस्याप्रव्रज्यावसितत्वमुन्मत्तप्रलपितंस्यादितिवाच्यं। शूद्रस्यप्रव्रज्यायोः सेवाग
मोजात्वेनतस्यतद्रूपतयोअपिसंभवात्। चंडेश्वरेणविवादरत्नाकरयद्यपीत्यादिनाप
वेपक्षयित्वातथापीत्यादिनाएवमेवसमाधितं द्विगुणोवधाद्धस्यपाक्षिकोयोदंड
उक्तस्तदपेक्षया। वसिष्ठः। मनुः॥ ब्रह्मतेजोमयंदंडमसृजत्पूर्वमीश्वरः सराजापु
रुषोदंडः सनेताशासिताचसः। चतुर्णामाश्रमाणांचधर्मस्यप्रतिभूः स्मृतः। दंडः
शास्तिः प्रजाः सर्वाः सर्वाएवाभिरक्षति। दंडः सुप्तेषुजागर्ति दंडंधर्मंविदुर्बुधाः।
यत्रश्यामोलोहिताक्षोदंडश्चरतिपापहा। प्रजास्तत्रविवर्द्धन्तेनेताचेत्साधुपश्
यति। ब्रह्मतेजोमयंहिरण्यगर्भतेजः प्रकृतिकं। इयंस्मृतिवादरवाया। राजाप्र
जारक्षणात्पुरुषः परमपुरुषतुल्यः प्रजानांहृदिस्थितानांत्वात्मणवत्स्वधर्मप्र

Indira Gandhi National
Centre for the Arts

२०८ वर्त्तयिता। जागर्ति चौरादिनिवारणात् प्रजाग्रनकार्यकारित्वात्। यत्र श्यामो लोहिता
क्षो दंडोधिष्ठात् देवताचरति तत्र प्रजा विवर्द्धंते। नेता शास्ता न कर्त्ता साधु पश्यति
सम्यक् चेत् विचारयति दंडप्रणयने समर्थमाह मनुः॥ ७ ॥शुचिना सत्यसं
धेन यथाशास्त्रानुसारिणा दंडः। प्रणयितुं शक्यः सुसहायेन धीमता। तस्या
हुः संप्रणेतारं राजानं सत्यवादिनं। समीक्ष्यकारिणं प्राज्ञं धर्मकामार्थकोविदं।
असहायेन मूर्खेन लुब्धेनाकृतबुद्धिना। न शक्यो न्यायतो वर्त्तुं सक्तेषु विषये
षु च। मनुः। दंडो हि सुमहत्तेजो दुर्द्धरश्चाकृतात्मभिः। धर्माद्विचलितं हंति नृपमे राम·
व सबांधवं। ततो दुर्गं च राष्ट्रं च लोकं च सचराचरं। अंतरीक्षगतांश्चैव बधाधी
नू देवांश्च पीडयेत्। स मतेजा अक्षात्मयानतः सबांधवान् पपुनन्नामंतरं। मनुः। २०८
यदि न प्रणयेद्राजा दंडं दंड्येष्वतंद्रितः। अन्यो काकः पुरोडाशं श्वा चलेह्यात् हविस्तथा।

अंगिराः॥ राजा गुरुर्यमश्चैव शास्ता धर्मेषु युज्यते। कर्त्ता च मुच्यते पापात् न नश्यापेन यु
ज्यते। मनुः। निग्रहेण च पापानां सत्यानां संग्रहेण च। द्विजातयवेज्याभिः पूज्यंते स
ततं नृपाः। पापकृद्युक्ताः साधवा यथाशास्त्र बंधनैः। याज्ञवल्क्यः। यो दंडं दंड्ये
षु राजा सम्यक् साधुश्च पातयेत्। इष्टं स्यात् क्रतुभिस्तेन सहस्रशतदक्षिणैः।
इति संचिंत्य नपतिर्दानतुल्यफलं पृथक्। व्यवहारान् स्वयं पश्येत् सभ्यैः परिवृतो
न्वहं। तथा अधर्मदंडनं लोभकरं कीर्त्तिकं नाशनं सम्यक् च दंडनं राज्ञः स्वर्गा
कीर्त्तिजयावहं॥ ७ ॥ अथ रत्नकः॥ ७ ॥ राजनि निवेद्य व्याहृतिभिर्हुत्वाज्यादीन्
त। तथा रत्नकपुत्रान्तरकरणं। तत्र द्वादशविधपुत्राणां हितस्यपतंत्रत्वात् न
थाचरला करधनं। असुतेन सुतः कार्यो यादृक्तादृक् प्रयत्नतः। पिंडोदकक्रि
याहेतोर्नामसंकीर्त्तनाय च। असुतेनौरसादिपुत्रसामान्यरहितेन नस्यौरसमा

Indira Gandhi National
Centre for the Arts

२०९ रहिते तत्तथा सति स्वभ्रात्राद्यन्यतमसत्वेन तत्र वक्रियासिद्धिहेतोर्लग्नकात्तापत्तेः।
अत एव भ्रातृपुत्रादिसत्वेतिरिक्तपुत्रकरणनिषेधः कुल्लुकभट्टसहायो दयक
राद्युक्तः साधु संगच्छते। इति प्राहुः भ्रातृपुत्रसत्वे दत्तकपुत्रकरणवत् दत्तकादि
पुत्रसत्वे पि दत्तकांतरमित्यपि। आचारात्कांचनं। हेमंतिकस्त्वधान्यं दत्वा कृतचू
डादिसंस्कारकं पंचवर्षीदनदूर्ध्व पुत्रकं बालकं। पितृदत्तं तदनुज्ञया मातृदत्तं वा
सति च तयोः पुत्रांतरेण गृह्णीयात्। यथा चूडाद्या यदि संस्कारा निजगोत्रेणैव कृता
ः दत्ताद्यास्तनयास्ते स्युरन्यथा दास उच्यते॥ ऊर्ध्वं च पंचमाद्वर्षान्न दत्ताद्याः सुता
न पाणिगृहीता पंचवर्षीयं पुत्रेष्टिं प्रथमं चरेत्। तथामुक्तं शौनकेन सर्वैः। पुत्रो राम
माता पितृनिमित्तकः। तस्य दानविक्रयत्यागेषु मातापितरौ प्रभवतः न त्वेकं पुत्रं द २०९
द्यात् प्रतिगृह्णीयाद्वा स हि संतानाय पूर्वेषां न स्त्री पुत्रं दद्यात् प्रतिगृह्णीयाद्वा अन्यत्रा

नुज्ञानाद्भर्तुः। पुत्रं प्रतिग्रहीष्यन्बंधूनाहूय राजनि निवेद्य निवेशनस्य व्याहृतिभि
र्हुत्वा प्रतिगृह्णीयादित्यर्थः। अत्र स्त्रिया अपि पत्यनुमत्या दानग्रहणयोः श्रुतेर्व्र
तप्रतिष्ठादिवत्। ब्राह्मणद्वारा होमो न विरुद्धः। एवं शूद्रस्यापीति प्राहुः। वि
वादचिंतामणौ तु न स्त्री भर्तुरनुज्ञाने पि स्त्रिया न ग्रहणाधिकारः। तद्व्याहृति
होमवाधादिति बहुनार्थः। नन्वत्रानुज्ञानाद्भर्तुरित्यविशेषश्रवणात् दा
नवद्ग्रहणेपि तस्याधिकारसिद्धौ नरंगविद्याप्रयुक्तिरपि तस्याः कल्प्यतेति
चेत् सत्यं सत्वेन तस्या अधिकार इष्टिवत्तन पृथक्केद्दलइति॥ नारदः॥ पुत्राप
राधेन पिताश्वालमुनि न दंडभाक् स्तस्तमकटे तु तत्स्वामी तेनैव प्रहितो न
चेत्। याज्ञवल्क्यः॥ क्रीतो यो मोक्षयन् स्वामी दंपत्रीणां संगिरांतथा॥ प्रथमं सा
हसं दद्यात् द्विकुष्टं गुणांतथा। स्वादिस्वामी शक्तः सन्नश्वादिग्नलं यदि न रक्षेत्

Indira Gandhi National
Centre for the Arts

२९० द्राप्रथमंसाहसं स्वायभ्मौलमपसायवे। युक्तोपिनचेनत्रक्षेत्रामध्यमंसाहसंदंड्य
इत्सर्थः। बृहस्पतिः॥ श्रौतानत्सुधान्तीनत्पषितानकालेवाहयेत्तुसः। सगोघ्नोनिष्कृ
तिकार्य्यीदाप्योवामध्यमंदमं॥ श्रादितुप्रायश्चित्तयोर्विकल्पइत्यापराणंदंडो
पिपापक्षयहत्युक्तं। भवतीतिरत्नाकरादयः॥ याज्ञवल्क्यः॥ संभूयकुर्वतामर्घं
सबाधंकारुशिल्पिनां। अर्घस्यह्रासंवृद्धिंचसहस्रोदंडउच्यते। कारवोत्रप्रति
माघटकाः। शिल्पिनश्चित्रकारादयः। तेषांसबाधमितिपीडाकरमर्घंयेवणि
जःस्थूयप्रकुर्वंतिचेवोजस्थापितस्यमूल्यस्यह्रासंवृद्धिंचसंभूयकुर्वंतिते
षांसहस्रपणात्मकोदंडइत्सर्थः। तथासंभूयवणिजांपण्यमर्घ्येणाहृद्धत राम·
मं। विक्रीणतांवाविहितोदंडउत्तमसाहसः॥ येवणिजोमिलिताःस्थानांत २९०
रपण्यमुचितार्घ्येणाहारयित्वाधावयंति। येनर्घ्येणावहुमूल्येनास्वामूल्यं

विक्रीणांतितेषांमप्युत्तमसाहसोदंडइत्सर्थः। मनुः। राजप्रख्यातभांडानिप्रतिसि
द्धानियानिच। तानिनिर्हतोलोभात्सर्वहारंहरेन्नृपः। यानिविजुरगादीनिग्र
तिग्रायराजभोग्यानियानिवा। राज्ञानिवारितक्रयविक्रयादीनितानिराजास
नवेसरेणविक्रीणानस्यतद्विक्रयप्राप्तंसकलमेवधनंराजागृह्णीयादित्स
र्थः। याज्ञवल्क्यः॥ अर्घ्योक्षेपादिक्रमकृतभ्रातृभार्यापहारकः। संदिह्यस्या
प्रदाताचसमुद्रगृहभेदकः। सामंतकुलिकादीनामपकारस्यकारकः। पञ्चा
शत्पणिकोदंडएषामितिविनिश्चयः। स्वच्छंदविधवागामीविक्रुष्टेनभिधा
यकः। अकारणेचविक्रुष्टोचंडालश्चोत्तमानस्पृशन्। शूद्रप्रव्रजितानांच
दैवेपैत्रेचभोजकः। अयुक्तंशपथंकुर्वन्नयोग्योयोग्यकर्मकृत्। वृक्षक्षुद्रपशू
नांचस्तागीश्चव्रातदंडभाक्। अर्घ्यः अर्घ्याहःपूजाहेतियावत्। आचार्यादिःत

Indira Gandhi National
Centre for the Arts

२११ स्याक्रोशमतिक्रमं अग्न्यंतःलंघनरूपं वा यः करोति प्रहारस्ताडनं सन्निरुंध्य वितंसमु
द्रंमुद्रासहितं गृहे सामंताः स्वग्रहक्षेत्रादिस्थायिनः। कुलिकाः सकुलजाताः
आदिशब्दान्योपि स्वग्रामोद्भूतास्वदेशोद्भूताश्च गृह्यंते इति रत्नाकरः। स्व
च्छंदेपि अनियुक्तः सन् विधवागामी अयं तु अनियोगे हेतुको दंडः व्यभिचा
रहेतुकस्त्वन्य एव। विक्रुष्टे चौरधाक्रोशे दाख्याने कृतेन तिधायकः। शक्ति
सत्वे प्रतिवचनादतोभ्युत्कंठापथं मातरमभिगच्छामीत्यादिरूपं अयोग्यः
अक्षमः शूद्रादिः योग्यकर्म यागादि तेन यो यत्कर्म कर्त्तुं न शक्नोति स चेत्त
त्कर्मकर्त्तुं प्रवर्त्तते। तदा स दंड्यः। वृक्षस्य पुष्पफलार्जनं जीवधादिनात राम
दुपघाति क्षुद्रत्वं हस्त्याद्यपेक्षयाति चंडेभ्यवः। साधारणेति अन्यसाधारण २११
समाधारणीकृत्य गृहीता पितापुत्रयोः। सुहृदयोर्भ्रात्रोर्दम्पत्योर्वाचार्यशिष्य

योर्मध्ये त्यागवीजकदुष्कर्माभावे अन्योन्यत्यागीतेषां शतपणः प्रत्येकं दंड्याः। मनुः
नमाता न पिता न स्त्री न पुत्रस्त्यागमर्हति। त्यजन्नपितानेतान्राज्ञादंड्यः। शता
निषट्। स्त्री भार्य्यास्त्यागो विहितभरणापोषणाद्यकरणं एतावानेव प्रकृत
ऽर्थः। पुत्रादीनः यस्य जनेतकामात् सद्धिशतं दंडं प्राप्नुयात्। अत्र याज्ञवल्क्यो
क्तो दंडो विदुषोरन्योन्यत्यागे मन्तव्यः अविदुषा एव कामादेकतरस्य विदु
षस्त्यागे ऽर्धदंडो वक्तव्यः कामात् अविदुषाकतरस्य त्यागे इति सम्प्रदायः। एवं वि
दुषोरन्योन्यत्यागे मन्तव्य न पैर पिशाचकृह्यं। विष्णुः। येषां देयः पंथास्ते
षामप्पथदायी कार्षापणानां विंशतिं दंड्यः। आसनार्हस्यासनमदत्त्वाप
जार्हमपूजयं अप्रातिवेश्य ब्राह्मणानिमंत्रणातिक्रामी च निमंत्र्य चाभो
जनादायी च। निमंत्रोलस्त्योत्सुक्त्वा अभक्ष्यानः। स्वर्णमासैकं निकेतनिमित्त

Indira Gandhi National
Centre for the Arts

२९२ अद्विगुणं मतं। अस्यार्थः येषां पंथा देयो भवति तेषामप्यर्थदायी पथदायी न भवतीत्य
र्थः। महाभारते। अंधस्य पंथाः बधिरस्य पंथाः स्त्रियः पंथा भारवाहकस्य पंथा राज्ञ
ः। पंथाः राज्ञस्तथैव ब्राह्मणेनासमेतेन तु ब्राह्मणस्यैव पन्थाः प्रातिवेश्य ब्राह्मणानि
मंत्रणातिक्रमी च असपिंडेषु प्राप्तेनिमंत्रणावसरे निरंतरगृहवासिब्राह्म
णानिमंत्रणाकारी निकेतनेपितुः निमंत्रयितुः मत्स्यपुराणे आमंत्रितो द्विजो यस्तु
वर्तमानः प्रतिग्रहे। निष्कारणं न गच्छेत्तु स दाप्यो पणानष्टौ॥ न विक्रोनदारि
संतरणाम्भुल्कग्रहणानियुक्तः याज्ञवल्क्यः॥ जातं चौरेणाभिवेदनदाप्यः पंचश
तं दमं। उपजीव्य धनं मुंचंस्तदेवाष्टगुणीकृतं। कुलाकीर्तिभयात् स्वरूपतो जातं एमः
।चौरत्वेन निर्दिश्य जारापहृतं कुर्वन् पालानां पंचशतं दंडः उतक्रोचारष्टगुणमि २९२
ति विवादरत्नाकरः। तथा शुल्कं गृह्णन् विक्रेतुर्गुणं दत्वा तथापि तुस्तथा। राजयानसेनावो

दुर्दंडो मध्यमसाहसः। सतां गतस्यानंमतेकं बलादित्तन्नथा लेना प्राकाश्यपविक्रेतुः तावुभौ
तुरिसस्यताडनहेतोरनुपस्थिते इति विशेषः। राजेयालाद्यारोहणं राजाज्ञां वि
ले सर्थः। मनुः। अभिचारेषु सर्वेषु कर्तव्यो द्विशतो दमः॥ मूलकर्मणि चानाप्ते
कृत्यासु विविधासु च। अदूषितानां दूषणे छेदनेन तथा। मलीनाम परोधेतु दंडः
प्रथमसाहसः। योलोभारधर्मो जासानीदुत्कृष्टकर्मभिः। तं राजा निर्द्धनं कृत्वा क्षि
प्रमेव प्रवासयेत्। अभिचारे मारणे अन पराधिनं प्रतिसेनादि कर्तुः मूलकर्मणि
भेषजादिप्रयोगे अलारेभवहितेषिभिः। क्रियमाणा कृत्यास्त्वायोस्य व्यानां
रिरूपास्तु कृत्यां कुर्वतो द्विशतो दमः। यत्तु द्रव्यमसंत्रस्य मेलकेन मंत्रीकरो
ति भेदनाम हं मन्यादिभिनर्तिवा। मेशाहमपि मुक्तादि मंत्र प्रदेशो विध्यति
बातस्य साईप्रशतरूपो दमः॥ नारदः। अविक्रेयाणि विक्रीणन् ब्राह्मणाः प्रच्युत

Indira Gandhi National Centre for the Arts

२९३ पथः। मार्गे पुनरवस्थाप्यो राजा दंडेन मध्यमसा। प्रच्युतः पथः मार्गाच्चलितः दंडेन उत्त
मसाहसरूपेण। तथा च विष्णुः। अभक्ष्यस्याविक्रयस्य विक्रयी देवप्रतिमाभेद
कश्चोत्तमसाहसं। दंड्यः विवादचिंतामणौ याज्ञवल्क्यः॥ कोषाणामपहर्तॄं
श्च प्रतिकुलेषु वस्थितान्। घातयेद्विविधैर्दंडैररीणां श्चोपजापकान्। ये का
र्येभ्योर्थमेवं हि गृह्णीयुः। पापचेतसः। तेषां सर्वस्वमादाय राजा कुर्यात् प्रवा
सनं। विनियुक्ताश्च कार्येषु हन्युः कार्याणि कार्यिणां। धनोष्मणा पच्यमाना
स्तान् निःस्वान् कारयेन्नृपः। कोषो राज्ञा मधुसंचयः। अंगनाद्युपजापकान्
शत्रूणां स्वसस्य पनादिकृतवतः। कार्यिभ्यः व्यवहारिभ्यः। एवं येन केनवि एम
तच्छलेना कार्यिणामर्थिप्रत्यर्थिनां ग्राहकः। वापीकूपतडागादि पानमार्ग २९३
वसेद् व्यदूषणोऽग्रदासीदाससंप्रदानकरणो चा। अस्यार्थः मार्गस्य तक्षणाग्र

लाकादिना रसद्रव्यस्य विषादिनाऽश्वदास्याश्वदासाय दानेन च दूषणो दुष्टाकरणो
नतकर्तुः। प्रमापणं गच्छेद्वा अत्राभ्यासानभ्यासाभ्यां दंड विकल्पः संगनीयः
।विवादरत्नाकरे कात्यायनः। राजाक्रीतास्तु ये द्रव्याः राजा वस्तुपजीविनः। अपि
यस्य च वक्तारो वधं तेषां प्रकल्पयेत्। प्रतिरूपस्य कर्त्तारः प्रक्षेपप्रकरश्च ये
।राजार्थमोषकाश्चैव प्राप्नुयुर्विविधं वधं। राजक्रीडाहरराजसाधारणक्रीडा
सु ये द्रव्याः राजानुमतिं विनेति शेषः। एवं राज्ञां प्रजापालनादिरूपां वर्त्तिं तदनु
मतिं विनाय अश्रीलं वदतो ये च राज्ञे रात्रावास्त्रियवारनश्रीलाः प्रतिरूपस्य कर्त्तारः
राजानुमतिं विना राजवद्रूपस्य कारकाः प्रेक्षकाः स्वकर्त्तव्यराजकार्यविरोधेन न
त्यादि प्रेक्षकाः। प्रकाशायेदं द्रव्याभ्यां राजकरं स्वभावतो निरतिशायं द्रव्यातिशायी
कृत्य गच्छंतिते सर्वे नानारूपैर्वधप्रकारैर्वध्याः। वध्याद्रुत्यनुवर्त्तो विष्णुः। येचा

Indira Gandhi National
Centre for the Arts

२१४ कुलीना राज्यमभिकामयेयुः। अकुलीनाः राज्ञोपकुलं तत्प्रसृताः। याज्ञवल्क्यः॥
न्यूनं वाप्यधिकं वा पि लिखेतो राजशासनं। पारदारिकचौरं वा मुञ्चतो दंड उत्त-
मः॥ राजशासनमित्यनेन यमियरग्राह्यमित्यादिमषालेखकस्यापहस्तंप
णादंडः। शंखलिखितौ। कूटशासनप्रतिषेधकूटतुलामानव्यवहारेच प्रा
णहींगछेदो वा। शासनमात्रं मत्वा मयि कृतं कृत्वा प्रकाशयति राजाज्ञाम
तिक्रामति कटयातुलया कूटेन वा मानेन प्रस्थादिना व्यवहरति सादरा
मंगच्छेदो वा अपराधीनत कर्षापकर्षाभ्यां मध्यं विकल्पः। अदन्तयेनांगप
राधः क्रियते तत्। मनुः। कूटशासनकर्तॄंश्च प्रकृतीनां च दूषकान् स्त्रीबाल एम·
ब्राह्मणघ्नांश्च हन्यात् द्विट्सेविनस्तथा॥ शासनं राजदेशाः। प्रकृतीनामना २१४
त्यानां दूषकान् विनाशोधं दोषोद्भावकान् द्विट्सेविनो राजविरोधिसेवकान्

हलायुधधृतनारदः॥ अयुक्तं साहसं कृत्वा प्रत्यासत्तिं करोति यः॥ ब्रूयात्स्वयं वा वद
सितस्यार्द्धविनयः स्मृतः। गृहमानस्तद्दोः शीलं यदि वा ततः स जीवति सभ्यः श्वा
स्यमनुष्यं तितीव्रो दंड उत्तमः साहसे। प्रत्यासत्तिं विना यः कर्ता सान्निध्यं ब्रूयात्वा सद
सि स्वकृतमपराधं स्वयमेव प्रकाशयति गृहमान इति स्वयं कृतमपकर्म विने
त्रादिना स्वचः सन अपन्हवः मे सोह्यापकर्मतो वजीविकां करोति तदा लघुस्व
पकर्मणि तीव्रतरो दंड उत्तमस्य कार्य इत्यर्थः। याज्ञवल्क्यः॥ विषाग्निदां स्त्रिया
श्चैव पुरुषघ्नीमगर्भिणीं। सेतुभेदकरीं चाप्सु शिलां बद्ध्वा प्रवेशयेत्। विष
दामग्निदां पुरुषघ्नां सेतुभेत्त्रीं वा स्त्रीं अगर्भां चेत्तदा शिलां बद्ध्वा अप्सु प्रवेश
येदित्यर्थः। तथा सदवधि प्रदुष्टां पतिगुरुनिजापत्यप्रमापणीं। विकर्णकरना
साष्ठीं कृत्वा गोभिः प्रमापयेत्। विशेषतः प्रकर्ष्यता च दोषवती तथा पत्युः पित्रा

Indira Gandhi National
Centre for the Arts

२२५ दैः अस्तस्य वामरोणकर्णौ कर्णनासिकौष्ठछेदनं पूर्वकं गोद्वारा मारयेत्। एवमेवमिता
क्षरविवादचिंतामणिप्रभृतयः॥ विनाक्रामुपक्रम्य मनुः॥ चर्मचार्मिकभांडेषु
काष्ठलोष्ठमयेष्वपि च। मूल्यात् पंचगुणो दंडः पुष्पमूलफलेषु च। चार्म्मिकं उप
नत्रादि प्रथमचर्मपरं स्पष्टार्थं काष्ठमयं तनुलादि परिमाणमात्रं लोष्ठम
यं घटादि एतेषु सहसा विनाशितेषु मूल्यपंचगुणो दंडः पुष्पादौ च विज्ञेय
नुएव विवादरत्नाकरः यः साहसंकारयति स दाप्यो द्विगुणो दमः। यश्चैवंमु
क्त्वाहं दाता कारयेत् स च तद्गुणं। यश्चैवमितिएतद्दाभियोगे यन्तु गिति त
दहं दातास्वं तावत् कुर्विस्तु त्वायः। कारयति तस्य चतुर्गुणो दमः। यश्चैवमु राम
क्त्वाहं दाता कारयेत् स चतुर्गुणं। यश्चौरमितिएतदभियोगे। कात्यायनः॥ २२५
आरंभकृत्सहायश्च तथा मार्गानुदेशकः। आश्रयः शस्त्रदाता च भक्तदाता वि

कर्मिणां। युद्धोपदेशकश्चैव तथा नाशप्रवर्त्तकः। उपेक्षाकार्ययुक्तश्च दोषवक्ता
नुमोदकः अनिषेद्धाक्षमोपः स्यात् सर्वे ते कार्यकारिणः। यथाशक्त्यनुरूपं तु दंडमे
षां प्रकल्पयेत्। अस्यार्थः। अपरं मंक्रियाचिकीर्षुं ज्ञात्वा यस्तदुद्यमं तत्साहाय्यं वा
करोति स अपकर्मिणां आश्रयभूतो वा तदनुकूलं शास्त्रदाता वा भोजनदाता वा कृ
तापकर्मणां स्त्रीणां यत्नस्मै युद्धोपदेशं दोषं वा करोति अपकारिणां विषाद्यर्पणे
न तत्परनाशप्रवर्त्तयति वा साहसिकारिणा जने पीड्यमाने स्वयमक्षमोपि
यः परः द्वारान्प्रति करोति वा अयुक्तोपाश्चानियुक्तः सन्ननियुक्तवत्पीडयति
वा दोषवक्तापीडनीयस्य दोषवक्ता वा। अनुमोदनकः। पीडकस्यानुमंता वाक्ष
मः सन् पीडकस्याप्रतिषेद्धा वा एते तदपराधकर्तारः एवं शक्त्यनुरूपं दंड्याः
।विवादरत्नाकरे कात्यायनः। प्राणात्ययेतु यत्र स्यात् कार्यकरणं स्मृतं। दण्डस्त

Indira Gandhi National
Centre for the Arts

२९६ व्रतेनैव स्यादेव धर्मः स्मृतो भृगुः । प्रायश्चित्तस्य ये प्राप्ता इति शेषः ॥ अकार्यकरणां पाप
कर्म भृगुणा हेति शेषः । क्वचिद्भृगोरिति पाठः । स च स्फुट एव । तथा स एव । तथा
सद्वृत्तानां तु सर्वेषामपराधो यथा भवेत् । अवशेनैव दैवाद्वा तु तत्र दंडं न कल्प
येत् । अवशेन भयादिवशात् यादैवात् प्रमादतः । कात्यायनः ॥ आरंभ प्रथमं
दद्यात् प्रवृत्ते मध्यमः स्मृतः । यस्य यो विहितो दंडः पर्याप्तस्य स एव भवेत् । अ
स्यार्थः आरंभे तत्फलावच्छिन्नकलत्वात् अल्पैककर्मफलकृत्वां प्रथमः
कथितः संपूर्णदंडचतुर्थभागः । प्रवृत्ते तथाविधानेककर्मफलकृत्वां मध्य
मस्तादृशाद्दंडाद्द्विरूपः । पर्याप्तस्य पर्याप्तिरूपस्य तादृक सकलकर्मजनकत्व एम
निरूहतः पुरुषस्य संपूर्णदंडः । एकपापफलावच्छिन्नानेककर्माणि प्राय २९६
मिरभिति चंडेश्वरः । कात्यायनः ॥ दंडनीयः सशेषोऽपि स्यात् प्रथमं नेति गौतमः ।

शेषोऽपि स्यात् दंडहेतुकर्मणोर्न यशेऽपि स्यान्न तरनिर्णयादिति यावत् ॥ कात्यायनः ॥ सम्भू
हस्ताः प्रवृत्ताः पापेषु पुरुषाधमाः । यथोद्दिष्टं गुणं दंडमेकैकं च प्रदापयेत् । स
महस्ता मिलिताः यथोक्तादेकादिनः । पुरुषस्य पापे प्रवृत्तस्य यो दंड उक्तस्त
स्मात् विवादरत्नाकरे नारदः शारीरश्चार्थदंडश्च दंडस्तु द्विविधः स्मृतः ॥ शा
रीरो द्विविधः प्रोक्तो ह्यर्थदंडोऽप्यनेकधा । शारीरस्त्ववरोधादिजीवितांतकर
स्तथा । काकिन्यादिस्तु यो दंडः स तु माषपरः स्मृतः । काकिन्यादिः काकिन्यवरः
माषपरः । माषांतः तेन यथापराधे काकिन्यादिको दंड उक्तस्तत्रानुबंधगौर
वात् सातिशये माषपर्यंत एव दंडः कार्यः तथा स एव माषावरार्द्धं । यमोक्तः
कार्षापणः परस्मः । पूर्वसाहसः पणसहस्रद्वयं सार्द्धं तस्मात् प्राक् यो दं
डविशेषास्तेनुबंधगौरवात् । पापातिशये चतुर्गुणा ग्राह्याः । पूर्वसाहसादौ च

Indira Gandhi National
Centre for the Arts

२१७ त्तुर्गुणं नास्तीति विवादरत्नाकरकारः ॥ मनुः ॥ कार्षापणो भवेद्दण्डो यत्रान्यः प्राकृ
तो जनः। तत्र राजा भवेद्दण्डः सहस्रमिति धारणा। कार्षापणाः। षोडशपणाः। रा
ज्ञामन्तरत्नपतीनां। कात्यायनः ॥ अस्पृश्यधूर्तदासानां नराणां पापकारि
णां। प्रातिलोम्यप्रसूतानां ताडनं नार्थतो दमः। धूर्तमायाविनः। प्रातिलोम्य
प्रसूताः सूतमागधादयः। तथा सत एव परतंत्राश्च ये केचिद्दासवर्गे ये च संस्थि
ताः। अनाथास्ते तु निर्दिष्टास्तेषां दण्डस्तु ताडनं। परतंत्रा भार्यापुत्रादयः। सं
स्थिताः प्राप्ताः अनाथाश्च नीश्वराः निर्दिष्टा निर्धना इति रत्नाकरः। तत्रापि
विशेषयति स एव ताडनं बंधनं चैव च विडंबनं। एष दण्डस्तथा सम्यनार्थ एम
दण्डो विधीयते। ताडनं काष्ठाद्यभिघातः बंधनम् आख्यानं गम्यं विडंबनं मु २१७
डनं खरारोहादि। शंखलिखितौ। शिल्पिनः कारवः शूद्रास्तेषां व्यभिचारेषु

पित्रोल्पोपकरणानि रक्षेत तुलामानसमुत्थानि वर्णिकपण्यानां क्षेत्र बीजभु
क्तागोश्रुकटकर्षणाद्व्याणि कर्षकाणां वाद्यभांडालंकारवासांसि शैलोपजी
विनां। गृहद्वायनालंकारवासांसि वेश्यानां शस्त्राणि चायुधोपजीविनां स
र्वेषां कारणाद्व्यानि नाहार्याणि राज्ञा धार्मिकेन अस्माद्धि पुरुषाः पापबहुला
श्चाविधेयाश्च भवंति तेभ्यः पापं राजा भाक्। राज्ञा तस्मात्ताधनानि नानुपकारणानि कुर्या
त् तन्मूलाहि वृत्तिमूलो निवासः। ते निवसति भस्फीतं राष्ट्रमित्युच्यते। अस्यार्थः।
शिल्पिनः स्वर्णकारादिकर्त्तारः। कारवस्तदन्यः व्यभिचारेष्वपि सर्वस्वापहारयोग्येष्वप्य
पवादेषु। तुला उद्धरमानं सुवर्णादि तुलानोपकरणं प्रतिमानं प्रस्थादि भक्तं कृ
षिसिद्ध्यर्थमलं कर्षणाद्व्यं हलादि वाद्यभांडं पटहादि वद्धोपजीविनां न सर्वनी
नां वृहस्पति कात्यायनौ। वधार्हः सवर्णो ज्ञातं रसंदाय्यलपुरुषः अंगच्छेदार्हस्तद्ध

Indira Gandhi National
Centre for the Arts

२९८ सन्दशीहस्तस्तर्द्दुकं। सुवर्णशतमेकं तु वधार्हो दंडमर्हति। अंगछेदे तदर्द्धं तु विवासे पंच
विंशतिः। अंगछेदे विवासे द्रूसेन यो वर्हद्रूतिशेषः। विवासे द्रूसत्रविनाशे द्रूतिक
चित्कर्तृपाठः तत्र तद्देश विनाशोर्थः॥ कश्चिविशिष्टो गुणवान् एतेषु निकृष्टेषु
स्वस्वधनेषु वधार्हेषु अनुसारतः सुवर्णशतानां भवेद्दं। अभ्यासे सर्वस्वं विधा
सन श्रेति। एवमन्यत्रापि यत्र एकस्मिन्नपराधे बहुविधो दंडः श्रूयते तत्र सधन
सनिर्धनत्वानुबंधगौरवादिना विशेषपद्धतिर्लक्ष्मीधरः। तथा स एव धार्हे छेद
र्होविप्रोनिः संगो बंधने विशेषः। तदा कर्मनियुक्तो सौधतस्य परमो हितः॥ व
धांगछेदार्होयस्मिन्नपराधे वधांगछेदौ वा द्रूतितद्वा। विप्रोत्र सदाचारनिष्ठः धर्म·
निःशंकेक्रियायोगमन्यत्र वद्धा। सन् अधर्मकर्तुं न शक्नोति स एव सदाचा २९८
रस्य परमो यस्य धर्म्मविषयो जननं नाम। वंडेश्वरधृतोमनुः॥ अत्र विदृश्य द्योनिष्क

रदुं दातुमशक्नुवन्। आनृण्यं कर्म्मणा गच्छेद्विप्रो दद्यात् शनैः शनैः। कर्मणा अर्थनिष्ठा
एनुकूलव्यापारेण विप्रस्तु न कर्मणा। आनृण्यं गच्छेत्। किंतु क्रमेण दद्यादित्यर्थः।
कात्यायनः॥ स्त्रीधनं दापयेद्दंडं धार्म्मिकः पृथिवीपतिः। निर्धनाप्रासरोषात्स्त्रीत
डनं दंडमर्हति। अस्यार्थः यदि धनवती स्त्री दंडार्हा तस्या धनं दंड्याः। यद्य धनाधा
नुसारेणाशिफाटिनेरेनु ग्रालाकारज्ज प्रभृतिसाडनेन राजा नियमं कुर्यादिति
भट्टः। ब्राह्मणमुपम्पाहनारदः। भैक्षहोताः परागारे प्रवेशश्चानिवारितः। समि
तपुष्पकुशादानेष्वस्तेयं सपरिग्रहात् नदीष्ववेतनस्तारः। पूर्व युक्तारसांत
था। नवेष्टसुल्कदानं चनचेतवानिन्त्पसस्यतत। भैक्षहोताः परागारे तन्निवारि
तः प्रवेशश्च निवारणो पुनरपराध एव अस्तेयमचौर्यं अन्तरा वस सपराधः
सपरिग्राहात् परिग्रहविषयसमिदादीनामप्यादानात् अवेतनः भृतिमन्यः

Indira Gandhi National Centre for the Arts

२९८ तावत्तु पारगमनं पूर्वं अब्राह्मणेभ्यः तरेषु पारं प्रापणं। येषु वस्त्रादिषु अशुल्कदानं
शुल्कदानाभावः न चेदिति यदि यस्य ब्राह्मणस्य न वस्त्रादि वाणिज्यार्थं स्यात्तत्र
इदं चेत् तेषामपि शुल्कदानं विद्यत एवेति भावः। बृहस्पतिः। लवणस्नेहम
ध्येषु वृद्धिरष्टगुणाः स्मृताः॥ गुडमधूनि चैवैको प्रयुक्तो चिरकालिको। तथा
सएव उक्ताः पंचगुणाः शाके वीजेक्षौ षड् गुणाः स्मृताः। विष्णुः संततिः स्त्रीपशू
नां स्त्रीणां दास्यादीनां गोमहिष्यादीनां अपोषणासामर्थ्यस्य कस्मैचित् स्त्री
णादिकं वृद्धिं व्यवस्थाप्य पोषणासमर्थप्रयुक्तानां चिरकालावस्थाने संतति
रेव वृद्धिरित्यर्थः इति रत्नाकरः। वशिष्ठः अनुलाधतमष्टगुणं तुलाधतम णम·
पि सुवर्णादि व्यतिरिक्तं कर्पूरादि विषयं तेषामन्यविध विशेषस्योक्तत्वात् २९८
छलगृहीतार्थे वृद्धिनिषेधमाह। नारदः। पण्यमूल्यं भृतिर्न्यासो दंडो यश्चाति

हारिकं। वृथादानाक्षिकपणावर्द्धं तेनाविवक्षितः। अभिहारिकं छलादिनागृहीतं
आक्षिकपणाद्युत्तेनार्जितधनं अविवक्षितः। उभाभ्यामपरिभाषिता वृद्धयः।
यदि तभाभ्यां सैवापि वृद्धिः। परिभाषितास्यात्तदा स्यादेव। बृहस्पतिः। भुक्तेचासा
वतं प्राप्ते मूलहानिः प्रजायते। बहुमूल्यं यत्र नष्टं धनिकं तत्र तोषयेत्। बहुमूल्यं ल
ल्पधनापेक्षया देवराजोपघाते न यद्याधिर्नाशमाप्नुयात्। तत्रान्यं दापयेद्बंधं
धयेत् वा धनं धनी। नाशमाप्नुयात् सर्वथा व्यवहाराक्षमतां गच्छेत्। नारदः।
वक्ष्यमाणोपि चेदाधिः कालेनेयादसारतां। आधिरन्योथवा कार्यो देयं वा धनि
ने धनं। याज्ञवल्क्यः। क्रोतं सोदयकं नष्टे त्वे राजदैवोपहारिते। आधिरन्यः प्रदात
व्यो देयं वा धनिने धनं। आधिरन्य इति क्षेत्रं रूपाधिर्देयः। यदि तन्न रक्षितस्त
स्सवृद्धिकं धनं देयं। तथाच कात्यायनः। आधिकृतं तु यत्किंचित् विनष्टं राजदै

Indira Gandhi National
Centre for the Arts

२२९ वतः तद्दणं सोदयं दाप्यो धनिनामधमर्णिकः। यदा तु पिता सर्वथैव धनादिदाना
समर्थः। पुत्रस्तु समर्थस्तदा पुत्रेणैव दातव्यं व्याधितेवन्मत्तरुद्धानां तथा दीर्घ
प्रवासिनां। इत्यादि प्रागुक्तकात्यायनवचनात्। विष्णुः न स्त्री पतिपुत्रकृतं पति
पुत्रकृतमृणं स्त्री दद्यादित्यर्थः। अन्यत्र यादृशं स्त्रियाः दत्तं तत्राह याज्ञवल्क्यः
।प्रतिपन्नं स्त्रिया देयं पत्या वा सह यत्कृतं स्वयंकृतं वा यदृणं नान्यत् स्त्री दातुम
र्हति। भर्त्रा पुत्रेण सार्द्धं वा केवलं वात्मना कृतं। धनमेवंविधं दद्यान्नान्यथा तत्
कृतं स्त्रिया॥ तत्कृतं भर्तृपुत्रकृतं यद्युत्तमर्णधारणमोचनार्थं पादावपरिभा
षितं निर्दिष्टं कर्म कारयेन्न दासो राजपूर्वं साहसं दंडं इत्यर्थः। कात्यायनः॥ य एम·
द्दिशा दावला दिष्ट सम्भुं कर्म कारयेत्॥ प्राप्नुयात् साहसं पूर्वं मृणान्मुच्येत व २२९
र्णिकः। नारदः॥ अथ शक्तिविहीनः स्यात् धनिकालविपर्ययात्। शक्त्यपेक्षमृणं

दाप्यः काले काले यथोदयं॥ शक्तिविहीनइत्यस्य धनं दातुमित्यादिः कालविपर्ययात् दुर्भि
क्षादेः। यो योरन्निन्हवीतार्थं मिथ्या यावति वा वदेत्। तौ नृपेणांह्यधर्मज्ञौ दाप्यौ तद्द्वि
गुणं दमं धनं॥ योभियुक्तश्चाप्ययदीयराणि निन्हवं करोति अभियुक्तो वा मिथ्याभियो
गं करोति ताबुभावप्यधर्मव्यवहारिणौ नृपेण विवादविषयाद्धनाद्विगुणं दंडनी
यावित्यर्थः॥ इदं सधनविषयं दंडस्यास्य धनविषयोऽप्याह याज्ञवल्क्यः॥ निन्हवे भा
वितं दद्याद्धनं वाटे वततत्समं मिथ्याभियोगी द्विगुणामभियोगाद्धनं हरेत्। द्द
द्यादित्यस्य धनमित्यादिः। यस्य द्रव्येण यत्पणं साधितं यो विभावयेत्। तद्द्रव्यमृ
णिकेनैव दातव्यं तस्य नान्यथा॥ अन्यद्रव्याभावे तस्यैव कृतेन तद्देयमित्यर्थः। याज्ञ
वल्क्यः॥ तद्धनं पाठयेत्त्रं ल्यं भुड्क्ते वा न्योऽध्रुकारयेत् साक्षिमच्च भवेद्यम्वा दातव्यं
ततसाक्षिकं। सम्यग्दानेधनिपत्रं पाठयेत पत्रव्यवधाने भुध्यर्थमन्यदेवलेख्यं

Indira Gandhi National
Centre for the Arts

२२१ कारयेत् साक्षिसंग्रहणं ससाक्षिकमेवर्णाध्यमिति दीपकलिका। विनष्टे वाप्युपका
रोपितमुपरतेस्यमेत॥ इत्यादिवचनात्। पतितधने पुत्रादेरधिकारः॥ पतितानां
मपि स्वधनस्य साध्यप्रायश्चित्तत्वकृतेः। अकृतप्रायश्चित्तानां तेषां धनानधिकारः॥
एकां स्त्रीं कारयेत्कर्मयथांशेन गृहे गृहे। मनुः। जनन्यां संस्थितायां तु समं स
र्वे सहोदराः॥ भजेरन् मातृकं धन–भगिन्यश्च सनाभयः॥ अत्र सहोदरपदोपा
दानात् दंडकेन सह भगिन्या नात्र भागमिति श्रीकृष्णतर्कालंकारः॥ मनुः॥ बला
द्दत्तं बलाद्भुक्तं बलाद्यच्चाभिलेखितं। सर्वान् बलकृतानर्थानकृतान्मनुरब्रवीत्
। याज्ञवल्क्यः॥ बलोपधिविनिर्वृत्तान् व्यवहारान्निवर्तयेत्। स्त्रीनक्तमन्त राम:
रागारबहिः। शत्रुकृतांस्तथा सत्तोन्मत्तार्तव्यसनिबालभीतादियोजितः॥ अ २२१
संबंधकृतं चैव व्यवहारो न सिद्ध्यति। उपधिश्छलमिति मूलपाणिः। उपाधिभि

यादिरिति विज्ञानेश्वरः॥ नक्तंमात्रादियोजितदस्युतरेत्यापोनहृतकमिति। बहि
र्बहिर्ग्रामः बलेन छलेन कृतान् स्त्रीकृतान् रात्रिकृतान् गृहमध्यग्रामे बहिष्कृतान्
विक्रयादीन् शत्रुकृतांश्च व्यवहारान्न निवर्तयेदिति दीपकलिका॥ मत्तो म
द्यादिना उन्मत्तो वातादिना असंबन्धा वादितन्नियुक्तः उदासीनः। आदिग्र
हणात् अस्वतंत्रदासमुद्रादेर्ग्रहणं॥ तथा च नारदः॥ मत्तंद्रोपिहि यत्कार्यं कु
र्यादप्रकृतं गतः॥ तदप्यकृतमेवाहुरस्वातंत्र्यस्य हेतुभिः॥ व्यासः॥ किंचि
न्न्यूनं प्रदाप्यं स्याद्द्रव्यमज्ञाननाशितं। कात्यायनः। न्यासादिकं परद्रव्यं प्रवक्षि
तेमुपेक्षितं। अज्ञाननाशितश्चैव येन दाप्यस्तावतत्। सएवेसनेन पुत्रदाय
दिव्यवच्छेदः। यदानुतरपदाधोपिस्यात् तदाप्यापिदाप्यः। तदुक्तं गौतमेनाध्या
भवेयुरित्याधिकृत्य निध्यन्तादितयातितावक्रीतारयोनषटाः। सर्वान्निन्दि

Indira Gandhi National
Centre for the Arts

२२२ तान्पुरुषापराधेनेतिअवक्रीतंभाटकेनानीतंसर्वान्पुत्रादीन्अनिंदितान्निर
पराधान्अत्याननासितैर्विशेषमाहव्यासः।किञ्चिन्न्यूनंप्रदाप्यःस्याद्द्रव्यमस्य
ननाशितः॥मनुः॥योनार्पयतिनिःक्षेपंयश्चानिक्षिप्ययाचते।तावुभौचोर
वच्छास्यौदाप्यौवातावत्समंदमं।अन्येवश्लोकेद्विगुणोदमइतिमत्स्यपु
राणेपाठः॥सचदमःसधननिकृष्टाचारः।विषयःमनुः॥वचनंतुनिर्धनस
चारविषयपरमितिमिश्राः।शिष्यमुपक्रम्यानारदः।समाहृतश्चगुरवेप्र
दायगुरुदक्षिणां॥प्रतीयात्स्वगृहानेषशिष्यवृत्तिरुदाहृतः॥तथागृहीत
शिल्पःसमयेकृत्वाचार्यप्रदक्षिणां॥शक्तितश्चानुमान्यैनमंतेवासीनिवर्तते एमं
।बृहस्पतिः॥कृतेकर्मणियःस्वामीनदद्याद्वेतनंभृतेः।राज्ञादापयितव्यःस्यादि २२२
नयंचानुरूपतः॥दासेनोढात्वदासीयासापिदासीत्वमाप्नुयात्॥यस्मात्भर्ता

प्रभुस्तस्याःसाप्यधीनः।प्रभुर्मतः॥दासीसत्रदासपरस्परस्वंबंधितयातदुपस्थापित
स्वामीनरावदासी॥सापिद्विविधाकस्याप्यदासीअन्यदासीचपूर्वंदासोढत्वमा
त्रेणदासेभ्यःदासीपराचततप्रभोरनुमतिसहकरेणअननुमताचनदासी
एवंतुल्यन्यायेनकस्याप्यदासोयदिदासींपरिणयतिनदास्वस्वस्वामिनोदेव
दासेदास्यौतयोरपत्यंतुद्वाभ्यांविभज्यग्राह्यं॥मनुः॥उद्याताहंतंबीजंयस्य
क्षेत्रेप्रजायते।क्षत्रियस्यैवतंबीजंनवप्ताफलमर्हति॥एषधर्मोगवाश्वस्य
स्युष्ट्राजाविकस्यच।विहंगमहिषादीनांविज्ञेयंप्रसवंप्रति।तत्रदासीपारं
परोढादासीपरं।स्वयमूढायांतुदास्यांतथाविधापत्यस्यविभाज्यत्वमेवेति।
स्मार्तमतेमप्येवं।याज्ञवल्क्यः।मिथ्यावदनपरिमाणं।शुल्कस्थानमपक्रम
न्दाप्यस्त्वष्टगुणांयश्चसव्याजक्रयविक्रयी।शुल्कस्थानेलोभेनपरिमाणांमि

Indira Gandhi National
Centre for the Arts

२२३ ख्यावरन् शुल्कस्थाने च शुल्कमदत्त्वापगच्छन् यश्च विक्रयकाले सजवंचनार्थं व्याजेन
वाकाले क्रयं विक्रयं वा करोति सोपकृतद्रव्यापेक्षयाष्टगुणं दंडं दाप्यः शुल्कस्था
नमगत्वैन विवर्त्मनान्यत्र गच्छति तदा सर्वापहारः॥ यथा विष्णुः॥ शुल्कस्थान
मपाक्रामन् सर्वापहारमेवाप्नुयात्॥ मनुः॥ क्रीत्वा विक्रीय वा किंचिद्यस्येहानु
शयो भवेत्॥ सोन्तर्दशाहे तद्द्रव्यं दद्याद्वैवाददीत वा॥ परेण तु दशाहस्य नाद
द्यान्नैव दापयेत्॥ आददानो ददच्चैव राज्ञा दंड्यः शतानि षट्॥ अनुशयो करण
मतिः॥ पश्चात्तापः तल्लिंगं दद्यात् प्रत्यर्पयेत्॥ क्रेता विक्रेतरि विशेषः। आददीत
विक्रेतेति शेषः। परेण दशाहस्य दशाहात्। षट्शतानि पणानां॥ नारदः॥ क्री एम:
त्वा मूल्येन यः पण्यं दुष्क्रीतं मन्यते क्रयी। विक्रेतुः प्रतिदेयं तत् तस्मिन्नेवाह्न्यवि २२३
क्षितं। द्वितीयेह्नि ददत्॥ क्रेता मूल्यात् त्रिंशांशमाहरेत् द्विगुणं तद्वितीयेह्नि पर

तः॥ क्रेतुरेव तत् यस्यान्यहपर्यंतं। परीक्षणमुक्तं। तत्रैदं दशदिनादेः। परीक्षणीयप्र
यमत्रिभागमध्ये यदि ददाति तदा हानिर्नास्ति तत्परं चेत् तदा त्रिंशांशं चतुर्थां
शहानिः क्रमेण्यायादिति नीतिकल्पलक्ष्मीधरः। देह्यादौ विशेषयति॥ कात्याय
नः॥ क्रीत्वानुशयात् पण्यं सप्तेदोह्यादि यो नरः॥ अदुष्टमेव कालेनु समस्तादृ
शांशं हरेत्॥ कालेऽत्युक्तापणाकाले हरेद्दद्यात्॥ दरं तु यत् क्रेतानस्ववशीकृतं तत्
परं स्ववशीकृतपरं नु भविष्यद्वाक्यं। यथा क्रीत्वा गच्छन्ननुशयं क्रयी हस्तमुप
गतं यदुभागं तत्र मूल्यस्य दत्वा क्रीतं त्यजेद्गुरुः। सीमानिर्णये महासाक्षिणो दं
उमाह मनुः॥ यथोक्तेन नयंतस्ते पूयंते सत्यसाक्षिणः॥ विपरीतं नयंतस्तु दा
प्याः स्युर्द्विशतं दमं॥ सत्यसाक्षिणः सत्यप्रधानाः सीमावोढारः॥ द्विशतं पणा
नां विशेषयति सएव सामंताश्चेन्मृषा ब्रूयुः॥ सेतुविवदतां नृणां सर्वे पृथक्

Indira Gandhi National
Centre for the Arts

२२५ पृथक्दंडान्प्राणानामध्यमसाहसं दंडनीयाः॥ एवञ्चोत्तमं तद्रूपाणां पूर्वोक्तद्विगुणो
दमो ज्ञेयः॥ इति कुल्लूकभट्टः॥ मनुः। सूत्रकार्पासकिण्वानां गोमयस्य गुडस्य
च॥ दध्नः क्षीरस्य तक्रस्य पानीयस्य तृणस्य च॥ वेणुवैणवभांडानां लवणानां त
थैव च॥ मृन्मयानां च हरणे मृदो भस्मन एव च॥ मत्स्यानां पक्षिणां चैव तैल
स्य च घृतस्य च॥ मांसस्य मधुनश्चैव यच्चान्यत्पशुसंभवं॥ अन्येषामेवमादी
नां मद्यानामोदनस्य च फलानाञ्चैव सर्वेषां हरणे द्विगुणो दमः॥ यश्चैतान्यु
पक्लृप्तानि सेतुं न यो नरः। तं प्राज्ञं दंडयेद्राजा पापं चाग्निं चारयेद्धरेत्। उपक्लृप्तानि
द्रव्याणि गृहे तानि संस्कारीणि उपभोगार्थसंस्कृतानि कार्य्यार्थसन्निधानि इत्यर्थः रामः
॥ नारदः॥ सेतुश्च द्विविधः प्रोक्तः खेयो बन्ध्यस्तथैव च। तोयप्रवर्त्तनात्खेयो २२५
बन्ध्यस्तोयप्रवर्त्तनात्॥ तत्र व्यवस्थान्तरमाह। नारदः॥ परक्षेत्रस्य मध्ये तु से

तुर्न प्रतिसिध्यति। महागुणोल्पबाधश्चेद्वृद्धिरिष्टा क्षये सति। वृद्धिर्बलवती क्षये
सत्यपि तेन परक्षेत्रे परेणाक्रियमाणो सेतुर्यदा बहुपकारः॥ क्षेत्रस्वामीनश्चा
स्यथैनीयः क्षयकरः। तदा सेतुर्न प्रतिषेधव्यः॥ यतोल्पक्षये बलवती वृद्धिः सर्वस्यो
ष्टा भवतीत्यर्थः॥ याज्ञवल्क्यः॥ स्वामिनो यो निवेद्यैव क्षेत्रे सेतुं प्रवर्त्तयेत्। उत्सन्न
स्वामिनो भोगस्तदभावे महीपतेः॥ क्षेत्रस्वाम्यनुमतिमलब्ध्वैव यत्तत्क्षेत्रे कृत
स्य सेतोर्महिम्ना यः॥ परेषां प्रस्याधिगमस्तत्र सेतुकर्त्ता न भागी किंतु क्षेत्रस्वा
मीन दभावे राज्ञा इत्यर्थः। योत्र यात्कार्य्यचिन्तामणुइति शेषः॥ राजप्रवर्त्तित
धर्मानुपालने दंडमाह। कात्यायनः॥ राज्ञा प्रवर्त्तितं धर्मं यो नरो नानुपाल
येत्॥ गार्ह्यः पापो दंड्यश्च लोपयन्राजशासनं॥ अर्हं तु दः स च काश्चमेदकृत
साहसी तथा॥ श्रेणीपूगान्पदेशाक्षिप्रं निर्वास्यते ततः॥ अर्हं तु होम मर्मस्य कश्च

Indira Gandhi National
Centre for the Arts

२२५ चकः पिशुनः ॥ कात्यायनः ॥ एकपात्रेथवापंक्त्यां संभोज्यो येन यद्भवेत् अकुर्वंस्तं त
दाहंडः स्यात् स्पर्शो षमदर्शीयन् ॥ भोजनविरोधिनं दोषमदर्शीयन् । तं तथा अकुर्वा
णो दंड्यः । बृहस्पतिः । सम्यक्येकमतिं कृत्वा राजभागं हरंति ये । ते तरद्गुणां दा
प्यो वणिजः प्रपलायिनः । राजभागं राजदेयं । कात्यायनः ॥ यत्तामुद्दिश्य यत् किं
चित् द्रव्यं भक्षितं भवेत् आत्मार्थविनियुक्तं वा देयं तैरेव तद्भवेत् ॥ गणमु
द्दिश्य गणप्रयोजनमभिधाय यथानं कृत्वा यैः कश्चिद् भक्षितं ॥ तैरेव देयं अ
प्रायोनेत्यर्थः ॥ याज्ञवल्क्यः ॥ अयोनौ गच्छतो योषां पुरुषं वापि मेहतः ॥ चतु
र्विंशतिपणो दंडस्तथा प्रव्रजितागमे ॥ अयोनौ स्त्रिया मुखादौ गच्छतः मेढ्रप्रवे रामः
शं कुर्वतः पुरुषं मेहतः । अतिरतो वा पुरुषमभिगच्छतः ॥ दंडं खलिखितौ ॥ अदं २२५
ड्यौ मातापितरौ न स्नातकपुरोहितौ ॥ परिव्राजकवानप्रस्थौ जन्मकर्मश्रुत

शीलतश्चाचारवंतश्चरणे हि धर्मप्रतिकरा राज्ञः स्त्रीबालवृद्धातपस्विनश्चाते
भ्यःकोर्धं नियच्छेत् । अस्यार्थः जन्मशुद्धकुलभाक् कर्म अग्निहोत्रादि श्रुतं वेदवेदां
गगोचरं । शीलं शौचं बाह्यमाभ्यन्तरं चरणं तद्युक्तौ एतेषां दंड्यायेन श्लेरा स्त्रा धर्मप्र
तिकराः ॥ षड्भागहृत्प धर्मार्जनं नृपकुर्वति ॥ कात्यायनः ॥ आचार्यस्य पितु
र्मातुर्बालकानां तथैव च ॥ एतेषामपराधे तु दंडो नैव विधीयते ॥ यत्तु ऋत्वि
कपुरोहितः अमात्यपुत्रसंबंधिबांधवाः ॥ धर्माद्विचलिता दंड्या राज्ञो निर्वास्याः
जहिंसकाः ॥ इति याज्ञवल्क्यवचनं ॥ तद्वाग्दंडविषयं न त्वर्थदंडशारीरदंडाभिप्रा
यमिति चंडेश्वरः ॥ बृहस्पतिः ॥ गुरून् पुरोहितान् पूज्यान् वाग्दंडेनैव दंडयेत्
॥ विवादिनो न वा शक्या न राधिप्रायोर्थेन दंडयेत् ॥ महापराधयुक्तोप्यवधदंडे
न शासयेत् ॥ उपस्थितां तु धिक्दंडमाह ॥ कात्यायनः ॥ मित्रादिषु प्रयुक्तान्वाग्दं

Indira Gandhi National
Centre for the Arts

२२६ दंधिकतपस्विनां॥ यथोक्तं तस्य तत् कुर्य्यादनुक्तं साधु कल्पितं। बृहस्पतिः॥ महापातक
युक्तोपि न विप्रो वधमर्हति॥ निर्वासनांकनं मौण्ड्यं तस्य कुर्य्यान्नराधिपः॥ महा
पातकिनमाह॥ मनुः॥ ब्रह्महा च सुरापी च तस्करो गुरुतल्पगः॥ एते सर्वे पृथ
ग्ज्ञेया महापातकिनो नराः॥ गुरुतल्पे भगः कार्य्यः सुरापाने सुराध्वजः॥ स्तेये तु
श्वपदं कार्य्यं ब्रह्महन्यशिराः पुमान्॥ तांकनानाराज्ञा ननाटेषु दाप्याः स्तु न मंसा
हसमिति मनुवचनेकतांतवणकवाक्यत्वात्। ललाठमेवांकनस्थानमवग
म्यते॥ तत्र गुरुपत्नीगमने। यावज्जीवणवस्थायी तमसृ पंकार्यं ब्रह्महीनकबं
धः। पुमानन्ते न च वारिनाः। केचित् प्रियंते दीर्घजीविनः। इत्यस्मारवांधवानां राम:
पुनर्वचनं राजन्नेन कश्चिद्भृतमुत्साद्यते इत्यर्थः। अधिकोद्रविणाधिके इति प्रा २२६
गुक्तवचनात्। धनवतः प्रोक्तापेक्षयाधिकदंडोपि कार्य्यः स चेहभयजनकोतिवस्ति

तः। येन स्वधर्मत्यागो नस्यात् तथा चरं डमुपक्रमयमनुः॥ तस्य सर्वाणि भूतानि स्थावराणि च
राणि च॥ भयात् भोगोय कल्पन्ते स्वधर्मान्न चलंति च॥ तस्य दंडस्य तथा पश्चापि धर्म
समयात् प्रच्युतो धर्माजीविनः॥ दंडेनैव समाप्रोषेत् स्वकाद्धर्म्माद्विविच्युतं। समयः।
शास्त्रमर्य्यादा धर्मजीविनो ब्राह्मणादय स्ताप्रोष्येत् रहेत् पीडयेदिति यावत्॥ याज्ञ
वल्क्यः। अष्टापाद्यं तु शूद्रस्य स्तेये भवति किल्विषं॥ षोडशैव तु वैश्यस्य द्वात्रिंशत्
क्षत्रियस्य तु॥ ब्राह्मणस्य चतुःषष्टिः पूर्णं वापि शतं भवेत्॥ द्विगुणा वा चतुःषष्टी
तद्दोषगुणविद्धि सः। अष्टापाद्यमित्यस्याष्टभिरापाद्यते गुणयते इत्यष्टापाद्यगु
णं किल्विषं दंडरूपधनं॥ तद्दोषविदितिसर्वत्रान्वितं। तेन यत्र स्तेयसमो दंडउक्त
सः स्तेये यद्दोषगुणाद्दुस्य शूद्रस्याष्टगुणः। तादृशो वैश्यस्य षोडशगुणः। तादृश
क्षत्रियस्य द्वात्रिंशद्गुणः तादृशो ब्राह्मणस्य चतुःषष्टीगुणः ततोप्यधिकं गुणा ब्राह्म

Indira Gandhi National Centre for the Arts

२२७ णस्यज्ञानगुणात्ततोप्यधिकतरगुणस्यब्राह्मणस्याष्टाविंशत्यधिकंगुणाइत्यर्थः।इति
रत्नाकरादयः।मनुः।स्तेनाःसुरापाःब्रह्मघ्नागुरुदाराभिगामिनः।नसंतियस्यरा
ष्ट्रेषुसराजाशक्रलोकभाक्॥मनुः॥अनेनविधिनाराजामिथ्याविवदतांनृणां
॥कार्य्यइत्यर्थः।इतिकुल्लुकभट्टः।विष्णुः॥नियमातिक्रमणेविहितस्याकर्त्तारं
अन्यमकृत्यकारिणंब्राह्मणंरहस्यस्थानेवन्धयेत्।आसमाप्तवचःयावदेवंनक
रिष्यामीतितस्यसंप्रतिपत्तिर्भवतिअसमापत्तौअसंप्रतिपत्तौनाश्योनिर्वि
षयइत्यर्थः।महापातकिनोधनमग्राह्यमित्याहमनुः।नाददीतनृपःसाधुर्म
हापातकिनोधनं।आददानस्तुतल्लोभात्तेनाधर्मेणलिप्यते।अप्सुप्रवेश्यतं राम·
दंडंवरुणायोपकल्पयेत्।श्रुतोवित्तोपपत्तौवाब्राह्मणेप्रतिपादयेत्।ईशः २२७
सर्वस्यवरुणोराज्ञांदंडधरोहिसः।ईशःसर्वस्यजगतोब्राह्मणोवेदपारगः।यत्रव

जयतेराजापापकृद्भ्योधनागमं।तत्रकालेनजायंतेमानवादीर्घजीविनः।निष्पद्यंतेच
शस्यानियथोक्तानिकृषीवलैः।बालाश्चनप्रमीयंतेविकृतिंनचजायते॥धार्म्मि
कोराजामहापातकिसंबंधिदंडधनंनगृह्णीयात्।लोभात्पुनःसतद्गृह्णन्महा
पातकदोषेणसंबध्यते।कातर्हिदंडप्रतिपत्तिरित्याह।अप्स्वित्यादिनातद्दंडधनंन
द्यादितिजलेप्रक्षिप्यवरुणायदद्यात्श्रुतवृत्तसम्पन्नायब्राह्मणायवाद
द्यात्महापातकिदंडधनस्यस्वामीयस्माद्राज्ञामपिदंडधारित्वात्प्रभुः।
तथाब्राह्मणःसमस्तवेदाध्यायीसर्वस्यजगतःप्रभुः।अतःप्रभुत्वात्सोदंडम
र्हतः।यत्रदेशेप्रकृतंमहापातकिधनंराजानगृह्णाति।तत्रपरिपूर्णकालेनम
नुष्याउत्पद्यंतेदीर्घायुषश्चवेम्रयानाअयथोप्तधान्यादिशस्यानिउप्तानितथै
वपृथक्स्वकालेनिष्पद्यसास्विप्रसयसिद्धानिकार्याणिसमर्तानयेनाउदितो

Indira Gandhi National
Centre for the Arts

२२८ विस्तरेणायंमिथ्याविवरमानयोः। अष्टादशास्तमार्गेषु व्यवहारविनिर्णयः। एवं
कार्य्याणि सर्वाणि सर्वान्सम्यक्महीपतिः। दैवेनानुलब्धानिप्सेतलब्धांश्च परिपा
लयेत्॥ ॥ बालेश्वरकृपाराम रामगोपालकृष्णजीवनाख्यैः वीरेश्वरकृ
ष्णचंद्रश्रीगौरीकान्ताभिधानैः सद्भिः कालीशङ्कर स्याम सुन्दर कृष्णकेशव
सङ्गैः सीतारामसंगैश्च कृतोग्रन्थः स्फुरतु सभायां ॥ ७ ॥ इत्यनेनकविषय
वासिविद्वद्भिरोपवर्णितः॥ विवादार्णवभञ्जनाख्योग्रन्थः समाप्ततांगतः॥
॥ ७ ॥ ७ ॥ संवत् १८ ६० वैशाखमासिकृष्णपक्षे ५ ॥ ॥ ॥

एम: